ISSN No.:2278-0815

# भास्करोदयः

संदर्भित ज्योतिष-शोधपत्रिका

Referred Research Journal of Jyotish

## विंशोऽङ्कः

सत्रम् 2022–23

सम्पादकः

**प्रो.मदनमोहनपाठकः**

फलित-सिद्धान्तज्यौतिषाचार्यः, प्राप्तस्वर्णपदकः

विद्यावारिधिः (पी-एच. डी), शिक्षाशास्त्री (बी.एड.)

निदेशकः(Director)

केन्द्रीयसंस्कृतविश्वविद्यालयः वेदव्यास-परिसरः, बलाहरः, तह. देहरा

मण्डलम्- काङ्गड़ा - १७७१०८ (हि.प्र.)

नवदेहलीस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रकाशितः

## भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

## भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याःरामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

# भास्करोदयः

**Referred Research Journal of Jyotish**

विंशोऽङ्कः - सत्रम्- २०२२ - २३



**संरक्षकः-**

**प्रो. श्रीनिवासवरखेड़ी**

**कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

**सम्पादकः**

**प्रो.मदनमोहनपाठकः**

**आचार्योऽध्यक्षश्च (Pofessor & Head) ज्यौतिषविभागः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ - परिसरः, लखनऊ - २२६०१० (उ०प्र०)**

## परामर्शदात्री-समितिः

**डॉ. हरिहरझाः,** (राष्ट्रपतिसम्मानितः) पूर्वप्राचार्यः, श्रीसदाशिवपरिसरः, पुरी
**प्रो. रामचन्द्रपाण्डेयः** (राष्ट्रपतिसम्मानितः) भू.पू.सङ्कायप्रमुखश्च, बी.एच.यू.
**प्रो. अर्कनाथचौधरी,** भू.पू.कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात
**प्रो. रामचन्द्रझाः-** भू.पू.कुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा
**प्रो. शिवाकान्तझाः,** भू.पू. कुलपतिः, नालन्दामुक्तविश्वविद्यालयः पटना,
**प्रो. सर्वनारायणझाः,** निदेशकः,केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ-परिसरः,
**प्रो. सुरेन्द्रझाः,** भू.पू. प्राचार्यः,राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,
**प्रो. राधाकान्तठाकुरः,** कुलपतिः i/c, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सम्पादनसहायकाः-**

**डॉ. शैलेशकुमारतिवारी, डॉ. गिरिराजः, डॉ. विकासः, डॉ. बालकिशोरतिवारी, श्रीवेदप्रकाशपाठकः, श्रीआनन्दप्रकाशपाठकः**



**प्रकाशकः-**

**सम्पादक-भास्करोदयः,** ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्

**वेदानन्द-आश्रमः (www.vedanandashram.in)** खरगापुर, नजदीक-महेशकम्पलेक्स,

गोमतीनगरविस्तारः, लखनऊ -२२६०१० (उ.प्र.)

**(विंशोऽङ्कः २०२२-२३ पृष्ठसंख्या- 1)**

**लेखपर्यवेक्षक-मण्डलम्**

**प्रो.सर्वनारायणझाः**
**निदेशकः**
केन्द्रीयसंस्कृतविश्वविद्यालयः
लखनऊपरिसरः, लखनऊ-२२६०१०

**प्रो. ईश्वरभटः**
**अध्यक्षः ज्योतिषविद्याशाखा**
केन्द्रीयसंस्कृतविश्वविद्यालयः
जयपुरम्

**श्रीतेजस्करपाण्डेयः**
**ज्योतिषाचार्यः, PCS**
उत्तरप्रदेशशासनम्
लखनऊ-२२६०१०



**प्रकाशक –**
**सम्पादकः, भास्करोदयः**
ज्योतिर्विज्ञान -अनुसन्धान-केन्द्रम्
वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स
गोमतीनगरम् (विस्तार), लखनऊ-२२६०१० (उ.प्र.)

**ISSN No:-2278-0815**

**संस्करणम् –**
प्रथमसंस्करणम् – २०००-०१ (संस्कृतवर्षे)
विंशतिसंस्करणम् - २०२२ - २३

**मुद्रकः**
गणपति प्रिन्टर
२९-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग
लखनऊ - २२६०१० (उत्तर प्रदेशः)



**(C) सम्पादकः**



**प्रो.मदनमोहनपाठकः**
मोबा. ७००७७९७८१३, ९४५५४३७०६६
e-mail:- pathak_guruji@rediffmail.com
website:- www.vedanandashram.in

# सम्पादकीयम्

महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य विंशतितममङ्कं भवतां शास्त्रानुरागिणान्तत्रापि विशेषेण ज्योतिषशास्त्र-जिज्ञासूनां ज्योतिष-विभागीयानुसन्दधित्सूनाञ्च कर-कमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतिष-विभागीयच्छात्राणां लेखन-कलायाः विकासेन सह तेषु परम्परागतज्योतिषशास्त्रस्य प्रचारः प्रसारश्च वर्तते । अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतिषशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने ।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतर्विज्ञानस्य ज्योतिःप्रसारिका वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभिवर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेऽस्मिन् संस्मरणीयास्सन्ति येषां सर्वविधं सहयोगं सम्प्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्योतिष-जिज्ञासूनां सकलं मनोऽभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलपतयः शास्त्रमूर्त्तयः **प्रो.श्रीनिवासवरखेडीमहोदयाः** येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतामेति। अनन्तरं स्मर्यन्ते केन्द्रीय-संस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो. रणजितकुमारवर्मनमहोदयाः, लखनऊपरिसरस्य निदेशकाः प्रो.सर्वनारायणझामहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायक-सम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मिणः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव अत्र वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति । अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादिति शम्।

विद्वच्चरणचञ्चरीको

मदन मोहन पाठकः

शिवरात्रिः, संवत् २०७९ (मदनमोहनपाठकः)

१९ फर. २०२३ रविवासरः

# भास्करोदयस्यानुक्रमणिका



| क्र.सं. विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| शुभसम्मतयः | | 05 - 08 |
| आयुषोऽधिकारिणः | प्रो. मदनमोहनपाठकः | 09 - 11 |
| सुखददाम्पत्यजीवने विवाहविचारः | प्रो. प्रभातकुमारमहापात्रः | 12 - 15 |
| भूपरिधिनिर्धारणम् | डा. ज्ञानेश्वरशर्मा | 16 - 21 |
| पुरुषोत्तममासविमर्शः | डॉ.विकासः | 22 - 24 |
| भारतीयगणिते उपलक्षणचिह्नानि | डॉ. यज्ञदत्तः | 25 - 28 |
| लालमणिदैवज्ञविरचित-<br>प्रश्नसुधाकरोक्तानां<br>कार्यसिद्धियोगानां विवेचनम् | विघ्नेश अय्यरः | 29 - 33 |
| अंशकायुर्दायसाधनक्रमः | डॉ. प्रसादभट्टः | 34 - 37 |
| ज्योतिषशास्त्रे सृष्टेरुत्पत्तेः क्रमः | डा. वेदप्रकाशपाण्डेयः | 38 - 42 |
| वक्री ग्रहरहस्यम् | ब्रजेशपाठकः | 43 - 47 |
| ज्योतिषशास्त्रदृष्ट्या गर्भाधानविमर्शः | अङ्कितकुमारमिश्रः | 48 - 53 |
| ज्योतिषशास्त्रे वृत्तिविचारः | डॉ. शैलेशकुमारतिवारी | 54 - 59 |
| जातककर्मपद्धत्यनुसारेण ग्रहाणां दृष्टिविमर्शः | विनायकशर्मा | 60 - 67 |
| नैषधीयचरिते ज्योतिषशास्त्रीय<br>सन्दर्भानामनुशीलनम् | डॉ.ज्योतिप्रसाददाशः | 68 - 73 |
| श्रीमद्देवीभागवते ज्योतिषशास्त्रम् | डॉ. हरिनारायणधरद्विवेदी | 74 - 77 |
| चन्द्रशृङ्गोन्नतिविचारः | डा. विजयलक्ष्मीमहापात्रः | 78 - 82 |
| संहिताशास्त्रस्य वैशिष्ट्यम् | वेदप्रकाशपाठकः | 83 - 87 |
| श्रीपतिभटपरिचयस्तेषां कृतित्वञ्च | आनन्दप्रकाशपाठकः | 88 - 92 |
| अक्षक्षेत्रविमर्शः | विभामिश्रा | 93 - 97 |
| लखनऊ-परिसरस्य इतिवृत्तम् | सम्पादकः | 98 - 100 |

**प्रो. रामचन्द्रझाः**
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- ८४६००८
दूरभाषः- ०९४३००६३६४८
e-mailः-varunkjha@gmail.com



# शुभाशंसनम्

२०००-०१ तः प्रकाशमानां भास्करोदयनाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः । अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति ।

ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्स्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु। भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविध-लौकिक-पारलौकिककार्य-सम्पादनाय मानवजीवनगत-शुभाशुभफल-ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते।

एवम्भूता ज्योतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम् ।

- इत्याशास्ते
विदुषामनुचरो



स्थानम्- दरभङ्गा
दिनाङ्कः- ५/८/२०१३
विक्रमाब्दः२०७०
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः

**प्रो.विश्वमूर्त्तिशास्त्री**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Mob:-94191-38606
E-mail:- profvmshastri@gmail.com



# शुभाशंसनम्

## भास्करोदयः

संस्कृतस्य प्रचाराय ज्योतिषस्य विशेषतः ।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः ।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः ।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः ।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया ।
सर्वदा देवभाषायां राजतां भास्करोदयः ।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले ।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः ।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः ।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः ।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः ।
असौ सर्वमनःपद्मं मोदयेद् भास्करोदयः ।।

- इत्याशास्ते
विदुषामनुचरो



श्रावणशुक्लपूर्णिमा,
संस्कृतदिवसः
विक्रमाब्दः२०६२
दि. 19/8/2005
शुक्रवासरः

**प्रो.अर्कनाथचौधरी**
**प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
विशालखण्ड-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ.प्र.)
फोन (०५२२)२३०४०६३, २३९३७४८ (का.)
फोन (०५२२) २३०२९९३ (फैक्स)
e-mail- rskslucknow@yahoo.com



# शुभाशंसनम्

## भास्वानुदेष्यति

षट्त्सु वेदाङ्गेषु ज्योतिषं शास्त्रं परब्रह्मणो निच्छ्वसितस्य वेदशरीरस्य चक्षुरिति पाणिनिः स्वशिक्षाग्रन्थे उल्लिलेख । तदेव वयमपि मन्यामहे । नेत्रं विना अन्धो भवति जनः । लोकयात्रारूपे विषमे मार्गे धावन् कश्चिदपि अन्धः पतत्यवश्यम् । किन्तु नेत्राङ्गरूपिज्योतिषशास्त्रज्ञो विषमेऽपि लोकयात्रामार्गे न पतति । यतोहि-

प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ "इत्यस्माकमृषीणामुद्घोषः"। प्रकाशपुञ्जयोः साक्षिभूतयोः समवस्थाने क्वान्धता? कस्यान्धता? न कस्यापि। पुनश्च इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति ज्ञानसिद्धान्तानुसारेणापि प्रकाशरूपेन्द्रियस्य अर्थस्य च सन्निकर्षेण यल्लब्धं ज्ञानमनन्तं प्रामाणिकं तदेव ज्योतिषं प्रकटयतीति महत्त्वातिशयमस्त्येव लोकजीवनेऽस्य शास्त्रस्य।

एतादृशस्य शास्त्रस्य विषये अनुदिनमनुसन्धानमाचरन्तो दृश्यन्ते विज्ञाः। राष्ट्रिय-संस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य (भारतशासन-मानव-संसाधन-विकास-मन्त्रालयाधीनस्य) लखनऊ-परिसरस्थः ज्योतिषशास्त्रमर्मज्ञो व्यवहारकुशलो ज्योतिषविभागाध्यक्षः प्रो.मदनमोहनपाठक "भास्करोदयः" इति नाम्ना ज्योतिषशोधपत्रिकां लोकाय समर्पयन् भृशमुपकारं जनयति पाठकानां सुधियां छात्राणाञ्चेति परिसरपक्षतोऽस्मत्पक्षतश्च साधुवादार्हः। मन्ये स्युरत्र बहवो लेखाः विदुषां शोधार्थिनाञ्च। एतैः लेखैः उदितो भास्वान् सर्वदैवोदितः स्थास्यतीति विश्वासः। तथापि लोकव्यवहारोपयोगिनो लेखाः अस्मिन्नङ्के भाविन्यङ्के चावश्यं योज्याः विदुषा सम्पादकेन प्रो.पाठकमहोदयेनेत्यनुरोधः। शतं जीव्यान्मदनमोहनपाठक इति मदीयं शुभाशंसनम्।

दिनाङ्कः- १५/१०/२०१३
संवत् २०७०पापाङ्कुशैकादशी
भौमवासरः

प्रो.अर्कनाथचौधरी

**प्रो.सर्वनारायणझाः**
**कुलपतिः**
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
मोबा. - ८४४७९७५२१३
email:- snjha62@gmail.com



।। ॐ नमश्चण्डिकायै ।।

## शुभाशंसनम्

दैवं फलति सर्वत्र न विद्या न च पौरुषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।

अथ च - प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि।।

किञ्च-

गुणोऽपि दोषतां याति वक्रीभूते विधातरि।
सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।

अपि च - भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन-मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊ-परिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहनपाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनाम्नीं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां तुष्यादिति मे शुभाशंसा ।

**प्रो.सर्वनारायणझाः**

संवत् २०७४ महाशिवरात्रिः
दिनाङ्कः- १४/०२/२०१८
बुधवासरः

# आयुषोऽधिकारिणः

**प्रो. मदनमोहनपाठकः**
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
वेदव्यासपरिसरः, बलाहरः हि.प्र.

ज्योतिषशास्त्रं कालज्ञापकं शास्त्रमस्तीत्यत्र नास्ति काचित् संशीतिः। शास्त्रेणानेनैव भूत-भविष्यत्-वर्तमानकालिकं सर्वमपि रहस्यं ज्ञातुं प्रभवन्ति दैवज्ञाः। दैवज्ञो नाम दैवज्ञाता। अर्थात् यः दैवं नाम भाग्यं जानाति स एव दैवज्ञपदवाच्यो भवति। दैवज्ञस्यापर नाम ज्योतिषिकोऽपि भवति। ज्योतिषिको नाम यः ज्योतिःशास्त्रमधीते जानाति वा। ज्योतिषशास्त्रं नाम सूर्यादिग्रहाणाम् अश्विनीप्रभृतिनक्षत्राणां गति-स्थित्यनुसरेण शुभाशुभफलप्रदर्शकं शास्त्रम्। शास्त्रमिदं महर्षिनारदमतानुसारं त्रिस्कन्धात्मकम्। तद्यथा-

**सिद्धान्त-संहिता-होरारूपस्कन्धत्रयात्मकम्।**
**विनैतदखिलं कर्म श्रौत-स्मार्तं न सिद्ध्यति।।** [1]

वराहमिहिराचार्येण शास्त्रस्यास्य बहुविधत्वं स्वीकृत्य मुख्यतया अस्य शास्त्रविशेषस्य त्रिविधत्वमेव स्वीकृतम्। तद्यथा-

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।** [2]

शास्त्रस्य अनेकभेदत्वं तेष्वपि त्रिविधत्वं तत्रापि केचन पञ्चस्कन्धात्मकत्वमपि[3] प्रश्नरत्नटीका-प्रभृतिग्रन्थानामाचार्याः स्वीकुर्वन्ति। अस्य शास्त्रस्य षडङ्गत्वमपि प्रतिपादितमस्ति। तद्यथा-

**स्कन्धत्रयात्मकं ज्योतिश्शास्त्रमेतत् षडङ्गवत्।**
**गणितं संहिता होरा चेति स्कन्धत्रयं मतम्।।**
**जातक-गोल-निमित्त-प्रश्न-मुहूर्ताख्य-गणितनामानि।**
**अभिदधतीह षडङ्गान्याचार्या ज्यौतिषे महाशास्त्रे।।** [4]

इदं लोकोपकारकं वेदस्य चक्षुःस्थानीयं[5] शास्त्रमिदमधीत्यैव जनः शुभाशुभफलकथने समर्थो

---

1. नारदसंहिता -
2. बृहत्संहिता शास्त्रोपनयनाध्यायः श्लोकसंख्या- ९ (१/९)
3. पञ्चस्कन्धमिदं शास्त्रं होरा-गणित-संहिता। केरली-शकुनञ्चैव ...............।। प्रश्नरत्नटीकायाम्
4. प्रश्नमार्गः- १/५
5. वेदस्य चक्षुः किल शास्त्रमेतत्प्रधानताङ्गेषु ततोस्य युक्ता। अङ्गैर्युतोन्यैरपि पूर्णमूर्तिश्चक्षुर्विना कः पुरुषत्वमेति।। प्रश्नमार्गः- १/१२

भवति। अन्यथा जनः दैवज्ञो भवितुं नार्हति। दैवज्ञस्य कृते न केवलं ज्योतिषशास्त्राध्ययनमपेक्षितं भवति अपितु तस्य कृते सदाचरणशीलत्वमपि अपेक्षितं भवति। तद्यथा दैवज्ञलक्षणविषये-

**ज्योतिषशास्त्रविदग्धो गणितपटुर्वृत्तवाँश्च सत्यवचाः।**
**विनयी वेदाध्यायी ग्रहयजनपटुश्च भवतु दैवज्ञः।।**
**दैवविदेवंभूतो यद्वदति फलं शुभाशुभं प्रष्टुः।**
**तत् सर्वं न च मिथ्या भवति प्राज्ञैस्तथा चोक्तम्।।**[6]

दैवज्ञस्य कृते अन्यान्यापि तत्त्वानि अवगन्तव्यानि। यथा दैवज्ञः अनेकहोरातत्त्वज्ञः, पञ्चसिद्धान्त-कोविदः, उहापोहपटुश्च भवेत्। एभिः गुणैः समन्वितः दैवज्ञः ग्रहगणितस्य दशभेदानामपि ज्ञाता भवेत्। तद्यथा [7]-

**द्युगणानयनं खेटमध्यमस्फुटयोरापि।**
**ग्रहगणितद्वितयं खेटकलहस्तत्समागमः।।**
**अस्तोदयौ च खेटानां नक्षत्राणां च सङ्गमः।**
**इति भेदास्तु विज्ञेयाः ग्रहाणां गणिते दश।।**

किमधिकम्? श्रीमद्वराहमिहिराचार्येण दैवज्ञलक्षणविषये एकः अध्याय एव लिखितः। दैवज्ञेषु एते गुणाः आवश्यमेव भवितव्याः। तद्यथा [8]-

**शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभावान् देशकालविभागवित् सात्विको न परिषद्भीरुः सहाध्यायिभिः अनभिभवनीयः कुशलोऽव्यसनी शान्तिकपौष्टिकाभिचारस्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चार्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययात्।**

उपर्युक्तगुणविशिष्टः ज्योतिषिक एव शुभाशुभफलकथने समर्थवान् भवति। अन्यथा नक्षत्रसूची-रूपेण ज्योतिर्विदां समाजे सः निन्द्यो भवति। जातकस्य आयुः यद्यपि विधाता मातुगर्भे एव निर्धारितं करोति। तद्यथा [9]-

**आयुः कर्म च वित्तञ्च विद्या निधनमेव च।**
**पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः।।**

अर्थात् जातकस्य जन्मकालात् पूर्वमेव तस्य आयुषः, कर्मणः, वित्तस्य, विद्यायाः, निधनस्य च निर्धारणं सञ्जायते। अत्र एकः संदेहः- यदि जन्मकालात् पूर्वं एते सर्वेऽपि विषयाः निर्धारिताः भवन्ति तर्हि विद्यार्जनस्य वित्तार्जनस्य च कृते यत्नस्य आवश्यकता एव नास्ति। पूर्वजन्मनः कर्मवशात् विधात्रा यत् प्रारब्धं रचितं विद्यते तद्वशात् तत् फलरूपं विद्या वित्तञ्च यत्नं विना प्राप्तुं न शक्यते। अतः ज्योतिषशास्त्रे यत्र प्रारब्धस्य वर्णनं प्राप्यते तत्रैव कर्मणः माहात्म्यवर्णनमपि प्राप्यते। यथा एकेन चक्रेण रथे गतिरेव

6. प्रश्नमार्गः-१/१५-१६
7. प्रश्नमार्गः-१/१९-२०
8. बृहत्संहिता-२/२
9. चाणक्यनीतिदर्पण-१३/४

भवितुं नार्हति। तथैव भाग्यकर्मणोः संयोगाभ्यामेव जीवनचक्रं प्रचलति। शास्त्रे कुत्रचित् कर्मणः माहात्म्यं विश्लेषितं विद्यते तत्रैव कुत्रचित् दैवस्य। तद्यथा अत्र कर्मणः महात्म्यम्- **फलेद्यदि प्राक्तनमेव कर्म कृष्याद्युपायेषु मुधैव यत्नः** इति। अनेन सिद्धान्तेन प्रारब्धे यद् आयुषः भागः निर्द्धारितोऽस्ति तदपि पात्रतां विना न कोऽपि जनः प्राप्तुं शक्नोति। आयुषोऽधिकरिणः के सन्तीति विषये श्रीमत्कल्याणवर्मा निगदति स्वीये सारावलीग्रन्थे-

**पथ्याशिनां शीलवतां नराणां सद्वृत्तभाजां विजितेन्द्रियाणाम्।**
**एवं विधानामिदमायुरत्र चिन्त्यं सदा वृद्धमुनिप्रणीतम्।।** [10]

अर्थात् परमायुषः प्राप्तये ऊपर्युक्ता चत्वारो गुणाः परमावश्यकाः भवन्ति। १. जनः पथ्याशी, २. शीलवान्, ३. सद्वृत्तवान्, ४. विजितेन्द्रियश्च भवेत्। एवमेव एभिः चतुर्गुणैर्विभूषितः जन एव सम्पूर्णस्य आयुषः भोक्ता भवति। यतः प्रायः दृश्यते यत् दीर्घायुसत्त्वेऽपि जनः यदि भोजने पथ्यापथ्यस्य विचारं न करोति, तदा सः रोगरहितः सन् दीर्घायुः न प्राप्नोति। एवमेव जनः यदि शीलवान् न भवति तदापि सः दीर्घायुर्भाक् न भवति। इत्थं दीर्घायुषः प्राप्तये सदाचारस्यापि अपेक्षा भवति। यतः महाभारते युधिष्ठिरं प्रति भीष्मस्योक्तिः-[11] तद्यथा-

**युधिष्ठिर उवाच- शतायुरुक्तः पुरुषः शतवीर्य्यश्च जायते।**
**कस्मात्स म्रियते पुरुषः बाला अपि पितामहः?।।**

**भीष्म उवाच-**

**अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि। अल्पायुर्येन भवति दीर्घायुर्वापि मानवः।**
**आचाराल्लभते आयुराचाराल्लभते श्रियम्। आचाराल्लभते कीर्त्ती पुरुषः प्रेत्य चेह च।।**
**दुराचारी हि पुरुषो नेहायुर्विन्दते महान्। यस्मात् त्रसन्ति भूतानि तथा परिभवन्ति च।।**
**आचारलक्षणो धर्मः सन्तश्चरित्रलक्षणः। साधूनाञ्च यथा वृत्तमेतदाचारलक्षणम्।।**

इथं दीर्घायुः प्राप्तये जनः सदाचारी, विजितेन्द्रियश्च भवेत्। अन्यथा जनः दीर्घायुर्भाक् न भवति। विनयी जनः एव विजितेन्द्रियो भवति। इन्द्रियानां वैशिष्ट्यं श्रीमद्भगवद्गीतायां बहुत्र विस्तरेण वर्णितं विद्यते। तद्यथा [12]-

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**
**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।।**

अर्थात् शरीरे इन्द्रियाणां विशिष्टं महत्त्वं भवति। यस्य जनस्य इन्द्रियाणि तस्य वशवर्तिनी भवन्ति स जनः सर्वं कर्तुं प्रभवति। स एव जनः जीवने सफलोऽपि भवति। इत्थं पथ्याशी, शीलवान्, सद् वृत्तवान्, विजितेन्द्रियश्च जनः सम्पूर्णस्य आयुषः भोक्ता भवतीति सुधिभिः चिन्तनीयमिति दिक्।

---

10. सारावली- ३९/२५

11. महाभारते -

12. श्रीमद्भगवद्गीता - २/६०

ॐ गं गणपतये नमः

# सुखददाम्पत्यजीवने विवाहविचारः

**प्रो. प्रभातकुमारमहापात्रः**
आचार्योऽध्यक्षश्च
ज्योतिषविद्याशाखा
एकलव्यपरिसरः, अगरतला, त्रिपुरा

ज्योतिषशास्त्रं भारतीयप्राचीनविद्यायां अन्यतमम्। ज्योतिषां सूर्यादिग्रहनक्षत्रादीनां ज्योतिः ज्ञापकम् इति। ज्योतिः उत्पत्स्यमान-परिणामज्ञापक इत्युच्यते। आकाशे अस्माभिः प्रतिदिनं दृश्यमानानां ग्रहनक्षत्रादीनां कान्तिकिरणानां प्रभावः अनुभूयते अस्माभिः। तेषां ग्रहार्क्षाणां भूमण्डले समग्रशुभाशुभफल-ज्ञापकं शास्त्रं ज्योतिश्शास्त्रम् ।

**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम् ।**
**विनैतदखिलं श्रौतं स्मार्त्तं कर्म न सिध्यति ।।**[1]

ज्योतिषशास्त्रमिदं प्रमुखं स्थानं भजते षडङ्गेषु। यथा शरीरे सर्वेषामपि अङ्गानां महत्त्वं वर्तते तथैव वेदस्य षडङ्गेषु शिक्षाकल्पव्याकरणादीनां महत्त्वं वर्तते। किन्तु तत्र श्रेष्ठमङ्गं ज्योतिषं वर्तते। यथा-

**यथा शिक्षा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ।।**[2]

एतादृशस्य महत्त्वपूर्णस्य शास्त्रीयज्ञानस्य आवश्यकता वर्तते सर्वेषां जनानाम्। प्राचीनकाले ज्योतिषशास्त्रस्य ज्ञानं सर्वेषां जनानां पार्श्वे आसीत्। यतः वेदस्य विभिन्नेषु सूक्तेषु अस्य शास्त्रस्य वार्त्ता विद्यते। वेदः शास्त्रविशेषस्य कश्चन ग्रन्थः न वर्तते। तत्र सर्वाणि शास्त्राणि ग्रथितानि वर्तन्ते। किन्तु सर्वेषां शास्त्राणां विभिन्नेषु स्थलेषु प्रसङ्गवशात् वर्णनमपि उपलभ्यते। ज्ञायते यत् अनादिकालात् अस्य शास्त्रस्य स्थानं समाजे आसीत्।

इदं ज्योतिश्शास्त्रं सिद्धान्त-संहिता-होरा-रूपेण भागत्रयात्मकम्। तत्र सिद्धान्तभागे रव्यादिग्रहाणां गमनविशेषाः उदयास्तमयो, ग्रहणादि विशेषाः ज्ञायन्ते। संहिताभागे रव्यादिग्रहचारवशात् भूमण्डले उत्पत्स्यमानानां शुभाशुभफलानां विषयाणां विचाराः वर्तन्ते। होराभागश्च प्रत्येकस्य जीवस्य जीवनकाले सम्भाव्यशुभाशुभफलानां ज्ञानद्योतकः।

अत्र होराशास्त्रस्य प्रशंसा विभिन्नेषु ग्रन्थेषु विद्वांसः कृतवन्तः सन्ति। तद्यथा वराहमिहिराचार्यः। तद्यथा -

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**
**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ।।** ।। बृ.जा. १/३ ।।

प्रथम पंक्तौ होराशब्दस्य स्पष्टाशयः भवति यत् अहश्च रात्रिश्च अहोरात्रि, अत्र अहोरात्रशब्दात्

1. नारदसंहिता
2. वेदाङ्गज्योतिषम्

कथं होरा शब्दस्य निस्पत्तिर्भवति ? आद्यन्त वर्णलोपात् होरा शब्दस्य निष्पत्तिर्भवति। सारावल्यामाचार्यः कल्याणवर्मा लिखति यत् -

**आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात् ।**
**तत्प्रतिबद्धश्चायं ग्रहभगणचिन्त्यते यस्मात् ।।** ।। सारावली. २/२ ।।

अहोरात्र शब्दस्य आद्यन्तवर्णौ "अ" "त्र" योः लोपात् होराशब्दः निष्पद्यते ।

**मेलापकविचारः-**

सनातनधर्मपरम्परायाम् आश्रमव्यवस्था सर्वोत्तमा व्यवस्थाः। शतायुर्वै पुरुषः इयं श्रुतिः प्रमाणात् मानवजीवनस्य जीवनकालं चतुर्द्धा विभज्यते। तद्यथा- ब्रह्मचर्यः, गार्हस्थ्यः, वानप्रस्थः, सन्यासश्च । प्रत्येकस्य आश्रमस्य कालः पञ्चविंशति वर्षाणि भवन्ति। चतुर्षु आश्रमेषु गृहस्थाश्रमः सर्वश्रेष्ठ आश्रम इति कथ्यते । यथा -

**अथातः सम्प्रवक्ष्यामि गृहस्थाश्रममुत्तमम् ।**
**य आधारोऽन्याश्रमाणां भूतानां प्राणिनां तथा ।।**
**ऋणत्रयच्छेदकरी धर्मकामार्थसिद्धिदः ।**
**एतत् सर्वं स्थितं स्त्रीषु शीलवृत्तान्वितासु च ।।** कश्यप ः ।।

आस्तिकानां मतानुसारं ऋणत्रयं मानवजीवने भवति। यथा-देवऋणम्-पितृऋणम्-ऋषिऋणञ्च। एतत् त्रयाणामपि ऋणानां मूलोच्छेदः गृहस्थाश्रमाधीनो विशिष्य स्त्रियाधीनो वर्तते।

**गृहस्थाश्रसमो नापरोऽस्ति धर्मः** ।। वशिष्ठ ः ।।
**नापुत्रस्य लोकोऽस्ति** ।। श्रुतिः ।।
**अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विजः ।**
**आश्रमादाश्रमं गच्छेदेष धर्मः सनातनः** ।। स्मृतिः ।।

धर्मशास्त्रमतानुसारेण अग्निहोत्रादीनां नित्यानुष्ठेयकर्माणि स्त्रियं विना सम्पादनं कदापि असम्भवम्। अतः दाराग्रहणं प्रत्येकेषां जनानां कृते समुचितं सामाजिकं कर्त्तव्यम्। तस्मात्कारणात् प्राचीनकाले मुनय ऋषयश्च पुरुषस्य कृते स्त्रीः, स्त्रियाः कृते पुरुषः निर्वाचने स्त्री-पुरुषयोः भविष्यत्काले सुखसमृद्धिं प्राप्त्यर्थं च या पद्धतिः निर्णीता सा पद्धतिः साधारणतः मेलापकः अथवा विवाहमेलापकः इति नाम्ना परिचिता विद्यते।

मेलापकस्य अर्थो भवति वर-वध्वोः जन्मकुण्डलीमनुसृत्य सम्यक् अष्टविधमेलापकानां विवाहोपयोगीविचारः। विषयेऽस्मिन् मनुसंहितायां प्राप्यते। तद्यथा- आचार्यः मनुः कथयति-

**चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् ।**
**अष्टाविमान् समासेन स्त्री-विवाहान् निबोधत ।।**
**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।**
**गान्धर्वो राक्षसश्चैव पिशाचश्चाष्टमोऽधमः** ।। (मनु० ३ / २१)

एतेषां सर्वेषां विवाहानां लक्षणानि याज्ञवल्क्यस्मृतौ निम्नमते वर्णितम्। यथा-

१ - **ब्राह्मविवाहः -**

**ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता।**

उपर्युक्तानां लक्षणयुक्तानां वराणां निमन्त्र्य यथाशक्ति अलंकृतकन्यादानस्य ब्रह्मविवाहः कथ्यते।

२ - **दैवविवाहः** -

यज्ञस्थः ऋत्विजे दैवः।

अर्थात् यज्ञस्थः ऋत्विजं यथाशक्तिमलंकृतकन्यायाः विवाहः दैवविवाह इत्युच्यते ।

३ - **आर्षविवाहः**

आदायार्षस्तु गोद्वयम् ।

गोद्वयस्य विनिमयेन अलंकृतायाः कन्यायाः विवाहः आर्षविवाहः कथ्यते।

४ - **प्राजापत्यविवाहः** -

पुनश्च-

इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने, स कायः।

परस्परं मिलित्वा उभयः धर्ममाचरः इति कथयित्वा यं कन्यां प्रदीयते सः विवाहः कायः विवाहः अथवा प्राजापत्यविवाहः कथ्यते।

**५. आसुरो द्रविणादानात् ।**

धनं नीत्वा यः कन्यादानं करोति सः विवाहः आसुरविवाहः कथ्यते।

**६. गान्धर्वः समयान् मिथः ।**

कन्या-वरयोः प्रेमसम्बन्धत्वात् विवाहः गान्धर्वविवाहः।

**७. राक्षसो युद्धहरणात्।**

अनिच्छुकायाः कन्यायाः युद्धेन अपहृत्य अनीय बलपूर्वकं विवाहकरणे राक्षसविवाहः कथ्यते।

**८. पैशाचः कन्यकाच्छलात्।**

छलयित्वा कन्यामानीय यदि विवाहः क्रियते स विवाहः पैशाचः। अयं विवाहः सर्वापेक्षया निकृष्टः अथवा अधमो विवाहः। विवाहसंस्कारः मानवानां जीवने षोडशसंस्कारेषु मध्ये सर्वश्रेष्ठः संस्कारः। चतुर्णामाश्रमाणां मध्ये सर्वप्रधानः गार्हस्थ्य-आश्रमो वर्तते। विवाहसंस्कारात् परं गार्हस्थ्याश्रमस्य प्रारम्भो भवति। अतः वर-वध्वोः वैवाहिकसम्बन्धः शास्त्रसम्मतः। अयं संस्कारः शुभसमये, शुभलग्ने यदि सम्पत्स्यते तदा सौभाग्यदायकः भवत्येव।

**शुभेक्षणक्रियारम्भजनिताः पूर्वसम्भवाः।**

**सम्पदः सर्वलोकानां ज्योतिस्तत्र प्रयोजनम् ।।** सत्याचार्यः

पुनश्च-

**शुभेऽहनि कुमारिका करनिपीडनं कारयेत्।**
**वरेण चिरजीविना न दोषायते ।**
**इदं तु बहुसम्मतं मुनिवरेण गीतम् ।।** भावकुतुहलम् ।।

परन्तु गृह्यसूत्रकारः कथयति "सर्वकालमेके विवाहः "अस्यार्थो केवलं अष्टविवाहे आसुरः गान्धर्वः, राक्षसः, पैशाचश्च निमित्तम् उद्दिष्टं भवति।

**प्राजापत्य ब्राह्मदैवविवाहः ऋषिसंज्ञकाः।**
**उक्तकालेषु कर्त्तव्याश्चत्वारः फलदायकाः ।।**
**गान्धर्वासुर पैशाच्य राक्षसाख्याश्च सर्वदा ।।** नारदः ।।

अतः वर-कन्या-पिता वा स्थिरचेतांसि श्रद्धया दैवज्ञं समीपे गत्वा प्रणिपातपूर्वकं रत्न-सुवर्ण मुद्रा-वस्त्र-फल-पुष्पादिनिवेदनं कृत्वा वर-कन्ययोः राशि-नक्षत्रं जन्मकुण्डलीं वा प्रदर्श्य विवाहसम्बन्धिनः प्रश्नः करणीयः।

**शुभे दिने दैवविदं त्वभिज्ञं ताम्बूल-पुष्पाक्षतपूर्णपाणिः।**
**प्रष्टा च गत्वा प्रणिपत्य पृच्छेन्-निवेद्य तस्मै वरकन्ययोर्भे।।** वशिष्ठः ।।
**प्रष्टा मणिकनकयुतैः फल-कुसुमैः राशिचक्रमभ्यर्च्य।**
**पृच्छेद्यथाभिलषितं भक्त्या विनयान्वितः प्रश्नम् ।।** भट्टोत्पलः ।।

शुभसमये शुभमुहूर्त्ते दैवज्ञैः सुसमाहितं भूत्वा वर-कन्ययोः जन्मकुण्डलीं सुपरीक्ष्य मेलापकस्यापेक्षत्वेनसुखद-दाम्पत्यजीवनस्यकथंसम्भवंभवितुमर्हतीतिविचिन्त्यअष्टविधमेलापकविचारं कृत्वा ततः परं मेलापकानां सर्वविधविचारं विधाय उभयोः जन्मकुण्डल्यां मङ्गलदोषविचारः, राहुदोषविचारः, शनिदोषविचारः, सप्तमभावस्य विचारः, सप्तमाधिपतिविचारः, सप्तमाधिपतिः यत्र वर्त्तते तस्मात् स्थानात् विचारः, सप्तमस्थग्रहविचारः, जन्मलग्नविचारः, चतुर्थाधिपतिविचारः, भाग्याधिपतिविचारः, दशमाधिपतिविचारश्च कर्त्तव्यः। कदाचित् दैवज्ञैः विचार्यते यत् कदा वर-कन्ययोः विवाहः भविष्यति? कस्यां दिशि विवाहः भविष्यति? तयोः पारिवारिकैः सह कीदृशः सम्बन्धः भविष्यति? कन्यायाः जन्मकुण्डलीतः वरस्य स्वरूपं किम्? वरस्य जन्मकुण्डलीतः कन्यायाः स्वरूपं किम्? प्रेमविवाहः भविष्यति अथवा माता-पित्रोः समर्थने विवाहो वा भविष्यतीति विषयेषु विशदः विचारः करणीयः। उपर्युक्तानां विषयाणां यदि विशदविचारः दैवज्ञैः क्रियते तदा सुखददाम्पत्यजीवनस्य परिकल्पनां कर्त्तुं शक्नुमः। इति शम्।

# भूपरिधिनिर्धारणम्

**डा. ज्ञानेश्वरशर्मा**
ज्योतिषाचार्यः
राजकीयसंस्कृतमहाविद्यालयः
सुन्दरनगरम्, जिला-मण्डी,
हिमाचलप्रदेशः
Email- gyaneshwersharma0@gmail.com

भूमेः परिधि एव भूपरिधि उच्यते। भास्कराद्यैराचार्यैः लङ्कादेशस्य स्थितिः भूमेः मध्यभागे स्वीकृता। तस्माद् लङ्कादेशीय भुवो वृत्तपरिणाहो मध्यभूपरिधिः स्वीकृता यच्च ध्रुवस्थानान्नवत्यंशव्यासार्धेन उत्पद्यते। यद्यपि भूगोलेऽस्मिन् यत्र कुत्रापि मध्यस्थानं भवितुमर्हति, परन्तु व्यवहारार्थमेकस्य एव प्रदेशस्य मध्यमानस्यावश्यकता भवति। यद्यपि अस्माकमाचार्यैः स्थाननिर्धारणार्थं गणितादिविविधप्रक्रिया प्रतिपादनार्थं मेरुस्थानान्नवत्यंशान्तरितेषु भूपृष्ठोपरि लंका-यमकोटि-रोमकपतन-सिद्धपुरेति नगर्यः परिकल्पिता।[1] एताः चतस्रो नगर्योरन्योन्यं परस्परं भूपरिधेः चतुर्थांशान्तर्गता चतुर्दिक्षुप्रतिष्ठिताः विद्यन्ते। पुनश्च एताः मेरुमध्याद् चतस्रोऽपि नगर्यो नवत्यंशान्तरेषु वर्तते। अर्थात् मेरुस्थानाद् इयं यमकोटि पूर्वस्यां, मेरोर्याम्ये लंका, पश्चिमे रोमकपतनम् उत्तरे च सिद्धपुरी आचार्यैः कल्पिता। अत्र भूपृष्ठस्य प्रमुखस्थानेषु लङ्का एव भूमध्यत्वेन स्वीकृता। अतः लंकादेशीया परिधिः एव भुवः परिधिः तदेव मध्यभूपरिधिः परिगण्यते।

वस्तुतः इयं भूपरिधिः अक्षांशभेदेन सर्वेषामपि भूप्रदेशानां भिन्ना-भिन्ना भवति। अतः देशभेदेन स्व-स्वस्थानस्य परिधिः स्फुटपरिधिः व्यवह्रियते। पुनश्च स्फुटपरिधे आनयनमपि मध्यभूपरिधिवशादेव अनुपातमाध्यमेन क्रियते।

साम्प्रतं भूपरिधिमानस्य आनयनं किमर्थमिति उच्यते। वस्तुतः प्राच्यकाले तु दैर्घ्यविस्तारयोः परिमाणज्ञानं योजनमानेनैव क्रियते स्म। यतोहि गोलाकारा निराधारा खे स्थिता इयं भूमिः बहुविस्तृतास्ति। ग्रहाणां स्थितिस्तु आकाशे भवति, पुनश्च तेषामवलोकनं भूतले भवति। भूमौ स्थानभिन्नाद् ग्रहस्पष्टीकरणार्थं कस्यचित् संस्कारस्यावश्यकता भवति। तेषु संस्कारेषु प्रथमसंस्कारनिमितं प्रयोजनं भवति भूपरिध्यानयनस्य। तस्य आनयनस्य विधिः सूर्यसिद्धान्ते इत्थं प्रोक्ता -

**योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु।**
**तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्।।** [2]

सूर्यसिद्धान्ते भूव्यासमानं द्विगुणानि अष्टौ शतानि (८००× २ = १६००) योजनानि भूकर्णः उत् भूव्यासमानमुक्तम्। वस्तुतः अत्र कर्णशब्दात् व्यासग्रहणमेव क्रियते। अतः व्यासज्ञानात् परिधिज्ञानं

1. सूर्यसिद्धान्तः भूगोलाध्यायः श्लो.सं. ३८-४१
2. सूर्यसिद्धान्तः १/५९

क्रियते। भूव्यासवर्गात् दशगुणात् तस्य यद् मूलमागच्छति तद् भूपरिधिमानं परिणाहमानं वा भवति।
अतः-

(१० × भूव्यास$^{२}$) अस्य मूलं स्वीक्रियते तदा भूपरिधिः भवति।

(१०×१६००$^{२}$)= अस्य मूलं स्वीक्रियते तदा भूपरिधिः भवति।

स्वल्पान्तरात् = ५०६० योजनम्।

अत्र परिधिव्यासयोः सम्बन्धः ३.१६२५ समः सिद्धयति। अनेन आचार्येण साधितः परिधिः स्वल्पान्तरात् स्थूला एव विद्यते। वास्तविकरूपेण तु किञ्चिद् दशगुणात् उनमेव व्यासवर्गात् मूलं सूक्ष्मपरिधिः भवति। प्रचीनाचार्यैः परिधिः परिधिसम्बन्धं, व्यासः व्याससम्बन्धः समं विज्ञाय तथा च व्यासमानं द्विघ्नत्रिज्यामितं विज्ञाय अनुपातमाध्यमेन भूपरिधेः योजनमानं साधितम्। तद्यथा-

यदि द्विघ्नत्रिज्यामिते व्यासे परिधिमानं चक्रकला योजनानि लभ्यन्ते तदा भूव्यासे किमिति? प्राप्तफलं भूपरिधेः योजनानि भवन्ति-

$$\text{भूपरिधेः योजनानि} = \frac{२१६०० \times \text{भूव्यासः}}{२ \times \text{त्रिज्या}}$$

$$= \frac{२१६०० \times \text{भूव्यासः}}{२ \times ३४३८}$$

$$= \frac{२१६०० \times \text{भूव्यासः}}{६८७६}$$

अत्र हरभाज्यौ हरेण अपवर्तितौ तदा भूपरिधिः = (३/८/३४)× भूव्यासः।

अतः एकस्थानकरणार्थं वर्गः क्रियते।

भूपरिधिः$^{२}$ = (९/५२/५५)× भूव्यासः$^{२}$

अत्र स्वल्पान्तरत्वात् गुणस्थाने १० गृहीता।

अतः भूपरिधिः$^{२}$ = १०× भूव्यासः$^{२}$ ।

अतः भूपरिधिः = १०× भूव्यासः$^{२}$ इत्यस्य मूलं भूपरिधिः योजनम्।

यद्यप्यत्र भूव्यासः = १६०० योजनानि गृहीतानि।

अतः भूपरिधिः = १० X १६००$^{२}$ इत्यस्य मूलं ५०६० योजनसमः सूर्यसिद्धान्तीयः भूपरिधिः सिद्ध्यति। एवमेवात्र भूपरिधिव्यासयोः सम्बन्धः= ५०६० ÷ १६०० = ३.१६२५ भवति। एवं सूर्यसिद्धान्ते तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत् इति यद् निगदितं तद् स्पष्टं भवति।

भास्कराचार्येण भूपरिधेः मानसन्दर्भे भेदद्वयं स्वीकृतम्। तत्राद्यः परिधिः स्थूलपरिधिः अपरः सूक्ष्मपरिधिश्च। उक्तं यथा लीलावत्याम्-

**व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिः स सूक्ष्मः।**

**द्वाविंशतिघ्ने विहृतेऽथ शैलेः स्थूलोऽथवा स्याद् व्यवहारयोग्यः।।**[3]

अस्मिन् श्लोके सूक्ष्मपरिधेः अनुपातः वर्णितः। यत्र व्यासमानं १२५० परिमितम्, परिधिमानं ३९२७ योजनात्मकं वर्तते। व्यवहारयोग्यः स्थूलपरिधिप्रसंगे च व्यासः ७, परिधिमानं च २२ प्रतिपादितः।

सूक्ष्मपरिधिसम्बन्धः = ३९२७ ÷ १२५० = ३.१४१६

स्थूलपरिधिः सम्बन्धः = २२ ÷ ७ = ३.१४२८

एतद् स्थूलमानमेव आधुनिकैः २२/७ शब्देन व्यवहृयते।

प्रसङ्गेऽस्मिन् सिद्धान्तशिरोमणौ आचार्यभास्करेण भूपरिधेः मानं ४९६७ योजनानि एवञ्च १५८१ योजनानि भूव्यासः स्वीकृतः। यथा-

**प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय-**
**स्तद्वयासः कुभुजङ्गसायकभुवः सिद्धांशकेनाधिकाः।।** [4]

आचार्यश्रीपतिः भूपरिधिमानं ५००० योजनं तथा च भूव्यासमानं १५८१ योजनं कथयति।[5] आचार्यलल्लेनाऽपि भूपरिधेः मानम् अन्येभ्यो भिन्नमेव निगदितम्। तद्यथा-

**खखामरा योजनवेष्टनं भुवो नभः शराभ्रक्षितयोऽस्य विस्तृतिः।**
**दिवाकरघ्नं पलकर्णभाजितं स्फुटं महीगोलकवेष्टनं भवेत्।।** [6]

भूपरिधिमानं ३३०० योजनतुल्यः तथा च भूव्यासमानं १०५० योजनतुल्यः कथयति। एतद् आसन्नमेव पञ्चसिद्धान्तिकायाम् आचार्यवराहमिहिरेण योजनशतानि भूमेः परिमाणं षोडशद्विगुणितानि ३२०० भूपरिधेः मानं पुनश्च भूव्यासमानं १५१८ योजनं परिमितं स्वीकृतम्।

अस्मिन् प्रसङ्गे वटेश्वराचार्येण-

**तिर्यक् रेखा पत्तनपल निजपलर्योविशेषशेषांशैः।**
**क्षितिपरिणाहो निघ्नश्चक्रांशहन्दध्ववाहः स्यात्।।** [7]

अतः आचार्यवटेश्वरेणापि भास्करोक्तमतस्य एव ग्रहणं कृतमस्ति। तस्य पुरान्तरयोजनज्ञानप्रक्रिया भास्करोक्तमेवास्ति। एवञ्च ब्रह्मस्फुटसिद्धान्तोऽपि योजनानन्तरस्य मतमाचार्योक्तमेवास्ति यथा। वटेश्वराचार्येण स्वसिद्धान्ते कथितम्।

**त्यक्ते भूव्यासार्धे सहस्त्रप्रसंगमिते गणितसौक्ष्म्यात्।**
**कर्त्तव्यं व्यासार्धखनवमुनिरतस्त्वति गणितजाड्यमिदम्।।** [8]

ब्रह्मगुप्तेन स्वसिद्धान्तस्य गणिताध्याये यत् मानं गृहीतमस्ति, ततः स्थूलरूपमस्ति तथापि

---

3. लीलावती क्षेत्रव्यवहारः ४०
4. सिद्धान्तशिरोमणिः भुवनकोशः श्लो. सं. ५२
5. सिद्धान्तशेखरः अध्यायः २, श्लो. सं. ६४
6. शिष्यधीवृद्धिदम्, मध्यमाधिकरः श्लो. सं. ६१
7. वटेश्वरसिद्धान्तः, मध्यमाधिकरः श्लो. सं. ०४
8. वटेश्वरसिद्धान्तः, मध्यमाधिकरः श्लो. सं. २८

आचार्येण सूक्ष्ममेवोक्तम्। यथा-.

**व्यासव्यासार्धकृतिपरिधिफले व्यावहारिके त्रिगुणे।**
**तद्वर्गाभ्यां दशभिः सङ्गुणिताभ्यां पदे सूक्ष्मे।**[9]

अर्थात् सूक्ष्मवृत्तपरिधिः = (व्यास×१०) इत्यस्य मूलं

(१०×व्यास)१

भूपरिधिः = २ × ७.६० × १० इत्यस्य मूलं

= २ × ७.६० × ३.१६२३

= ४.६.६६.३६६

अयं परिधि एव स्वल्पान्तरेण ब्रह्मस्फुटसिद्धान्ते ५००० योजनं कथितमस्ति। यद्यपि भास्कराचार्येण ब्रह्मगुप्तस्य भूपरिधिमानं स्वीकृतमस्ति। परन्तु ब्रह्मगुप्तस्य पाई इत्यस्य मानं अशुद्धं वर्तते। येन कारणेन तस्य परिधेः मानमपि अशुद्धम् अस्ति। अतः भास्कराचार्यस्य भूपरिधेराधारः वटेश्वरसिद्धान्त एवास्ति। पाई X ३९२७/१२५० इत्यस्य मानं सर्वप्रथमं आचार्यवटेश्वरेण कथितम्। यथा-

**कृतनगदिग्भिर्भूमेव्यासः स्याद्योजनेर्भगोऽग्निहतः।**
**खशशर्कहतपरिधिः स्पष्टोऽतोदशकरणिका स्यात्।।**[10]

वटेश्वराचार्यस्य मतेन भूपरिधिमानम्-

भूपरिधिः = (१०७४ × ३९२७)/१२५०

= (५३७ × ३९२७)/६२५=२१०७६६/६२५

= ३३७४ - ४६/६२५

अतः भूपरिधिः = ३३७४ योजनम्।

भूपरिधिः / भूव्यासः = ३३७४/१०४४ = ३+ १५२/१०७८ या,

भूपरिधिः$^{२}$

भूव्यासः$^{२}$ (३ + १५२/१०७८)$^{२}$ = १० स्वल्पान्तरेण

अत एव भूपरिधिः = भूव्यासः × १० इत्यस्य मूलम्

आर्यभट्टस्य मतेन भूव्यासः १०५० योजनमस्ति तथा च ८००० नरतुल्यम् एकयोजनस्य मानं भवति। यथोक्तम्-

**नृषि योजनं ञिला भूव्यासोऽर्केन्द्वोः।**[11]

आर्यभट्टेन परिधिव्यासमानसम्बन्धेन प्रोक्तं यत्-

**चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम्।**

---

9. ब्रह्मस्फुटसिद्धान्तः, मध्यमाधिकरः श्लो. सं. १०
10. वटेश्वरसिद्धान्तः मध्यमाधिकरः श्लो. सं. ३
11. आर्यभटीयम्, गीतिकापादः श्लो. सं. ७

**अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः।।** [12]

अर्थात् व्यासपरिध्योः सन्दर्भे आचार्यः निगदति यत् द्वयोः स्फुटज्ञानं सुतरां कठिनमेव विद्यते। स्फुटपरिधिज्ञानार्थम् आचार्येण एकम् उदाहरणमुपस्थापितम्। तद्यथा- १०४ × ८ + ६२००० = ६२८३२ अत्रोक्तं यः परिधिः ६२८३२ कस्यचिद् वृत्तस्य भवेद् तदा तस्य व्यासमानं २०,००० भविष्यति। एवमत्र सम्बन्धः = ६२८६२ ÷ २०००० = ३.१४१६ तुल्यं भवति।

इदानीं यूरोपीयमतानुसारेण विषुवद्वृत्तीयः परिधिः ७६२७ मीलात्मकं भवति। एवञ्च ध्रुवीयः परिधिः ७६०० मीलात्मकं भवति।

भूपरिधिसम्बन्धिमानं ये आचार्याः प्रोक्तवन्तः तेषु मानेषु भिन्नता वर्तते। प्रसङ्गेऽस्मिन् आचार्यभास्करः कथयति यत् सर्वेषामाचार्याणां मानं भिन्नमस्ति। येन कारणेन भूपरिधेः व्यासस्य च भिन्नं-भिन्नं मानं दृश्यते। आचार्यभास्करेण अङ्गुलादिमानं प्रतिपादितमस्ति-

**यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः।**
**हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितीयेन तेषाम्।।**
**स्याद्योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंशः।**
**निवर्तनं विंशतिवंशसङ्ख्यै क्षेत्रं चतुर्भिश्च भुजैर्निबद्धम्।।** [13]

अत्र षट्-सप्त-अष्ट यवभेदेन अङ्गुलमाने भिन्नता प्राप्यते। येन कारणेनैव सूर्यसिद्धान्ते, बटेश्वरसिद्धान्ते ब्रह्मस्फुटसिद्धान्ते च योजनादिमाने भिन्नता दृश्यते।

आचार्यश्रीपतिः वदति यत्- **वेश्मान्तः पतितेषु भास्करकरेस्वालोक्यते यद्रजः**
**स प्रोक्तः परमाणुरष्टगुणितैस्तैरेव रेणुर्भवेत्।।**
**तैर्बालाग्रमथाष्टभिः कचमुखैर्लिक्षा च यूकाष्टभिः।**
**स्यात् ताभिश्च तदष्टकेन च यवोऽष्टाभिश्च तैरङ्गुलम्।।** [14]

पुनः ज्योतिषसिद्धान्तग्रन्थेषु यः भूपरिधिः प्रतिपादितो वर्तते, सः विषुवद्वृतीयो भूपरिधिः वर्तते। अत एव पूर्वाचार्यैः लङ्कायाः कुमध्ये परिभाषाबलात् लङ्कादेशीयो भुवोः वृत्तरिणाहो मध्यमभूपरिधिः उक्तः। यतो हि भूमौ सर्वेषां जनानां स्वस्थानं भिन्नं-भिन्नं भवति, येषां परिधिरपि भिन्नं-भिन्नं सिद्ध्यति। सः स्फुटपरिधि नाम्ना ख्यातः कन्दुकाकारगोलस्य मध्यदेशः उभयतः अपचीयमानो गोलपरिणाहः गोलान्तदेशद्वये शून्यत्वमुपयाति। मध्यपरिधेरूभयत्रोत्तरे क्षयिष्णुः परिधिः सुमेरु प्रदेशद्वये शून्यसमो भवति। एतेन स्वदेशे यद् भुवः परिणाहमानं स स्फुटो भूपरिधिः। अस्यानयनप्रसंगे ग्रन्थकारैः प्रोक्तं यत्-

**लम्बज्या गुणितो भवेत् कुपरिधिः स्पष्टस्त्रिभज्याहृतो।**
**यद्वा द्वादशसंगुणः स विषुवत्कर्णेन भक्तः स्फुटः।।** [15]

---

12, आर्यभटीयम्, गणितपादः श्लो. सं. १०

13. लीलावती १/५-६

14. सिद्धान्तशेखरे मध्यमा. श्लो.६९-७०

15. सि.शि.भूपरिधि.श्लो.२

अर्थात् अत्रानुपातः आचार्यभास्करेण प्रदत्तः यदि त्रिज्याया मध्यभूपरिधिः प्राप्यते तदा लम्बज्यायां किमिति? स्पष्टभूपरिधिः।

(म.भूपरिधिः×लम्बज्या)/त्रिज्या= स्पष्टभूपरिधिः

वा, विषुवत्करणे मध्यमभूपरिधिः प्राप्यते तदा द्वादशाङ्गुलेन किमिति?

मध्यमभूपरिधिः × १२

विषुवत्कर्णम्

प्राप्तफलं स्पष्टभूपरिधिः भवति। विषुवत्कर्णं द्वादशाङ्गुलशङ्कोः वा शीर्षस्थानेन छायाग्रबिन्दुपर्यन्तं विषुवत्कर्णमथवा पलकर्णं भवति।

स्पष्टभूपरिधिं नामेष्टस्थानीयो भूपरिधिः। निरक्षदेशीयः शून्यं अक्षांशगता भूपरिधिस्तु मध्यमभूपरिधिः भवति। भूमौ विषुवद्वृतात् सौम्ये याम्ये वा उत्तरोत्तरं भूपरिधिरपचीयामानं भवति। यथा-यथा अक्षांशानां वृद्धिस्तथा लम्बांशानां ह्रासो भवति।

ध्रुवप्रदेशे अक्षांशाः-१६० लम्बांशाः 00

भूव्यासार्धः × लम्बज्या=स्पष्टव्यासार्धम्

त्रिज्या

परिध्योर्निष्पत्तिः व्यासयोर्निष्पतिः समा भवति। अतः

(म.भू.प.)/(स्प.प.)=(म.भू.व्या.)/(स्प .भू.व्या.)

= अतः मध्यमभूपरिधिः × स्पष्टपरिधिव्यासार्धः

मध्यमभूव्यासार्धः

= स्पष्टभूपरिधिः

आचार्याणां मते भूपरिधि-व्यासमानं च

| क्र.सं. | प्रवर्तकः | भूपरिधिमानम् | भूव्यासमानम् |
|---|---|---|---|
| १ | वराहमिहिराचार्यः | ३२०० | १०१८ |
| २ | सूर्यसिद्धान्तः | ५०६० | १६०० |
| ३ | लल्लाचार्यः | ३३०० | १०५० |
| ४ | ब्रह्मगुप्तः/ श्रीपतिः | ५००० | १५८१ |
| ५ | भास्कराचार्यः | ४९६७ | १५८१ |
| ६ | आर्यभट्टः | ३३०० | १०५० |
| ७ | लीलावती | ३९२७ | १२५० |
| ८ | वटेश्वरः | ३९२७ | १२५० |
| ९ | आधुनिकाः | ४००७५ | १२७५६ |

।। **इति शम्** ।।

# पुरुषोत्तममासविमर्शः

**डॉ.विकासः**
संस्कृताध्यापकः
राजकीयवरिष्ठमाध्यमिकपाठशाला
सदूं बडग्रॉ, काँङ्गडा, हिमाचलप्रदेशः

अस्मिन् २०८० तमे विक्रमीसंवत्सरे अधिकमासो वर्तते। यथा- अधि-श्रावणमासस्य आरम्भः १८ जुलाई दिनाङ्कतः १६ अगस्त दिनाङ्कं यावत् प्रचलति। अधिकमासस्य नामानि- अधिमासः मलमासः मलिम्लुचः संसर्पः अंहस्पतिः अंहसस्पतिः पुरुषोत्तममासश्च। 'तैतिरीयसंहितायाम्-त्रयोदशतममासस्य नाम 'संसर्पः' 'अंहस्पतिः' वा लिखितः। क्षयात्पूर्वोऽधिमासः संसर्पसंज्ञकः[1] यः मासः क्षयमासात् पूर्वं भवति तस्य मासस्य संसर्पसंज्ञा विद्यते । ऋग्वेदे 'अंहस्' इत्यस्य अर्थः पापः उक्तः। अधिकक्षयमासयोः मलमाससंज्ञा[2] वर्तते यतोहि अयं मासः कालस्य मलमस्ति। संक्रान्तिरहितो मासो अधिमासः, संक्रान्तिद्वययुक्तो मासः क्षयमासः। अथर्ववेदे अस्य मासस्य नाम 'मलिम्लुच' वर्तते । पश्चात्कालीनसाहित्ये 'मलिम्लुचस्यार्थः' 'चौरः'। मलमासतत्त्वे अस्य व्युत्पत्तिः 'मली सन् म्लोचति गच्छतीति मलिम्लुचः' वर्तते ।

पुराणेषु अधिमासस्य नाम पुरुषोत्तममासः (भगवतः विष्णोः अपरं नाम पुरुषोत्तमः) वर्तते। पुराणे कथा आगच्छति यत् हिरण्यकशिपोः वधस्य कृते भगवान् नृसिंहावतारः अस्मिन् अधिमासे धारितः। गीतासु पञ्चदशाध्यायस्य नाम पुरुषोत्तमयोगः वर्तते। ज्योतिषशास्त्रे नवविधमानं विद्यते। यथा [3]-

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम् ।**
**सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।।**

व्यवहारे नवविधमानेषु चतुर्विधमानमेव प्रयुज्यते। व्यावहारिकं चतुर्विधमानं चान्द्रमानं सौरमानं सावनमानं नाक्षत्रमानञ्च। केन मानेन किं विचारणीयं तल्लिख्यते। भास्कराचार्येण- [4]

**वर्षायनर्तुयुगपूर्वकमत्र सौरान्मासास्तथा च तिथयस्तुहिनांशुमानात् ।**
**यत्कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात् ।।**

सौरमानात् वर्षस्य अयनस्य युगस्य ऋतोः च विचारः कर्तव्यः। चान्द्रमानात् मासस्य तिथेः च विचारः कर्तव्यः। सावनमानात् व्रतोपवासस्य चिकित्सितस्य वासरस्य च विचारः कर्तव्यः। नाक्षत्रमानात् घटिकायाः पलस्य च विचारः कर्तव्यः।

1. धर्मसिन्धु-
2. धर्मसिन्धु-
3. सूर्यसिद्धान्तः मानाध्यायः श्लो.सं. १
4. सिद्धान्तशिरोमणिः, कालामानाध्यायः -३१

**सौरमासः-** सङ्क्रान्त्या सौर उच्यते [5]। सङ्क्रान्तितः अग्रिमसङ्क्रान्तिं यावत् सौरमासः भवति।

**चान्द्रमासः-** ऐन्दवस्तिथिभिस्तद्वत् [6]। अमान्तात् अमान्तं यावत् चान्द्रमासः भवति।

**सावनदिनम्-** सावनो अर्कोदयैस्तथा। अर्थात् सूर्योदयद्वयान्तर्गतः कालः सावनं दिनं भवति।

**सावनमासः-** त्रिंशत् सावनदिनैः एकः सावनमासः भवति।

**नाक्षत्रदिनम्-** नक्षत्रस्य उदयानन्तरं तस्य पुनः उदयं यावत् कालः।

**नाक्षत्रमासः-** त्रिंशत् नाक्षत्राणां एकः नाक्षत्रमासः भवति। भारतीयज्योतिषशास्त्रे द्वादशमासाः भवन्ति। मासानां नामानि नक्षत्रनाम्ना स्थापितानि सन्ति। यथा [7]-

**भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते ।**
**नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ।**
**कार्तिक्यादिषु संयोगे कृत्तिकादिद्वयन्द्वयम् ।**
**अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम् ।।**

यथा- कृत्तिकानक्षत्रात् कार्तिकमासः ।

**अधिकमासः** = सौरमासचान्द्रमासयोः अन्तरं अधिकमासः भवति। यथोक्तमपि [8]-

**भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम् ।**
**रविमासोनितास्ते तु शेषाः स्युरधिमासकाः ।।**

सूर्येन्द्वोः भगणान्तरं चान्द्रमासो भवति। सूर्येन्द्वोः मासान्तरं अधिकमासो भवति। आर्यभटेनापि उक्तम् [9]-

**अधिमासका युगे ते रविमासेभ्योऽधिकास्तु ये चान्द्राः ।**
**शशिदिवसा विज्ञेया भूदिवसोनास्तिथिप्रलयाः ।।**

**सौरवर्षमानम्** = ३६५ दिनानि, ६ घण्टा, १२ मिनट, ३६ सैकेण्डात्मकं च, चान्द्रवर्षमानम् ३५४ दिनात्मकं भवति सौरवर्षचान्द्रवर्षयोः अन्तरम्=३६५/६/१२-३५४= ११ दिनानि, ६ घण्टा, १२ मिनटात्मकम्। एकस्मिन् वर्षे अन्तरम्= ११ दिनानि, ६ घण्टा, १२ मिनटात्मकं भवति। तर्हि द्वितीये वर्षे अन्तरम्= २२ दिनानि, १२ घण्टा, २४ मिनटात्मकं भवति। तर्हि तृतीये वर्षे अन्तरम्= ३३ दिनानि, ४८ घण्टा, ३६ मिनटात्मकं भवति। तृतीये वर्षे इदम् अन्तरं एकवर्षतुल्यं भवति। अतः तृतीये वर्षे एकस्य मासस्य वृद्धिः भवति। अतः वृद्धिमासस्य मलमासः/अधिमाससंज्ञा अस्ति। भास्कराचार्येण यथोक्तम् [10]

**असङ्क्रान्तिमासोऽधिमासः स्फुटं स्याद् द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित् ।**

---

5. सूर्यसिद्धान्तः, मध्यमाधिकारः-१३
6. सूर्यसिद्धान्तः, मध्यमाधिकारः-१३
7. सूर्यसिद्धान्तः, मानाध्यायः -१५,१६
8. सूर्यसिद्धान्तः, मध्यमाधिकारः-३६
9. आर्यभटीयम्, कालक्रियापादः-६
10. सिद्धान्तशिरोमणिः, गणिताध्यायः - ६

**क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयञ्च ।।**

यस्मिन् चान्द्रमासे सूर्यसंक्रान्तिः न भवति सः अधिमासः भवति। चान्द्रमासः = २९सावनदिनानि, ३१घटिकाः, ५०पलानि। सौरमासः= ३० सावनदिनानि, २६ घटिकाः, १७ पलानि। अनयोः अन्तरम् =१दिनम् ५घटिकाः ३३पलानि च। इदमन्तरम् एकस्मिन् वर्षे ११दिनात्मकम्, ६घण्टात्मकम् १२ मिनटात्मकं च भवति । त्रिंशत् दिनात्मकम् अन्तरम् एकः अधिमासः भवति। महाभारते यथोक्तम् [11]–

**तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात्।**
**पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।।**
**एषामप्यधिका मासाः पञ्च च द्वादश क्षपाः ।**
**त्रयोदशानां वर्षाणामिति मे द्वादश मतिः ।।**

सिद्धान्तज्योतिषे द्वात्रिंशत् 32 मासानां 16 दिनानां 4 घटिकानाञ्च अनन्तरम् अधिकमासः कथितो अस्ति। यथा-

**द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।**
**घटिकानां चतुष्केण पततीत्यधिकमासकः।।**

अत्र उक्तं यत् पञ्चमे पञ्चमे वर्षे द्वयोः अधिमासयोः अवस्थितिः भवति।

**अधिमासे करणीयं कर्म-**

मलमासे नित्यकर्म नैमित्तिककर्म वा कर्तव्यम्। यथा- सन्ध्या, पूजा, पञ्चमहायज्ञः, ग्रहण-स्नानम्, अन्त्येष्टिकर्म च। किञ्चित् कर्म दीर्घकालिकं भवति यदि तत् कर्म अधिमासात् पूर्वम् आरम्भः भवति तदा तत् कर्म कर्तुं शक्यते। यथा- द्वादशदिनात्मकं प्राजापत्यप्रायश्चितकर्म, मासात्मकः चान्द्रायणव्रतं च।

**मलमासे निषद्धकर्म-** मलमासे (अधिमासे) वैदिक-अग्निप्रज्वलनम्, उपाकर्म, गृहप्रवेशः, मुण्डनम्, यज्ञोपवीत-संस्कारः, वास्तुकर्म, नूतनवस्त्रधारणम्, नूतनालङ्कारधारणम्, तुलापुरुषदानम्, आधानम्, अपूर्वदेवदर्शनम्, संन्यासधारणम्, राजाभिषेकः, समावर्तनसंस्कारः, पवित्रारोपणम्, श्रवणकर्म, अपूर्वव्रतस्य आरम्भः व्रतस्य समाप्तिः, मूर्तिप्रतिष्ठा, यज्ञः, दानम्, व्रतः, सकामकर्म, वेद-पाठः, वृषोत्सर्गः, चूड़ाकरणम्, उपनयनम्, नामकरणञ्च न कर्तव्यम्।

**अधिमासे दानम्-** मलमासे प्रतिदिनं ब्राह्मणेभ्यः 33 अपूप(पूओं) दानं करणीयम्। अपि च कानिचन कर्माणि अशुद्धमासेषु न करणीयानि। तद्यथा- वापीनिर्माणम्, तडागनिर्माणम्, कूपनिर्माणम्, यज्ञकर्म, महादानम्, व्रतं च। कानिचन कर्माणि अधिमासे शुद्धमासे च कर्तुं शक्यन्ते। यथा- गर्भकृत्यम्, (पुंसवनादिसंस्कारः), मासिकश्राद्धम्, (अमावस्यायाम्), आह्निकदानम्, अन्त्येष्टि-क्रिया, नवश्राद्धम्, मघानक्षत्रस्य त्रयोदशीश्राद्धम्, षोडशदिनात्मकश्राद्धम्, चान्द्रसौरग्रहणे स्नानम्, नित्य-नैमित्तिककृत्यञ्च।

सामान्यनियमानुसारेण अधिमासे सकामकर्म न कृत्वा निष्कामकर्म कर्तव्यम्।

11. महाभारतम्, विराटपर्व-५२/३-४

# भारतीयगणिते उपलक्षणचिह्नानि

**डॉ. यज्ञदत्तः**
सहायकाचार्यः (अतिथिः) ज्यो. विद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
वेदव्यासपरिसरः, बलाहरः, काङ्गडा, हिमाचलप्रदेशः
दूरभाषः– 8988528060
Email – dryagyadutt@gmai.com

**उपलक्षणपदविवेचनम् –**

उप+लक्ष्-धातौ ल्युट्प्रत्यये सति उपलक्षणमिति शब्दो निष्पद्यते। धनात्मकम् ऋणात्मकमिदं रूपादिकम् इति उपलक्ष्यते ज्ञायते अनेनेति उपलक्षणम्। धनर्णराश्योः रूपादीनां वा योगवियोगादीनां परिकर्माष्टकानां भेदबोधनपरम् उपलक्षणम्। अथवा अनभिज्ञानां रूपादिनाम् अभिज्ञानसूचकम् उपलक्षणम्। समानासमानजातीयो व्यवच्छेदो उपलक्षणम्। यथा- अज्ञातवस्तूनां द्वित्र्यादिकानां राशीनाम् अव्यक्तत्वे संजाते जातिभेदमन्तरेण तत्सङ्करः भवति। अतः अज्ञातस्य तस्य वस्तुनः गणितार्थं मानसंज्ञारूपं यावत्तावत्, कीलक-नीलकादिकम् उपलक्षणम्। तत् त्रिविधम्-

१. धनर्णराश्योः रूपादीनां भेदबोधकं चिह्नम्। २. योगवियोगभागहारादीनां भेदबोधकं चिह्नम्। ३. अज्ञातवस्तुज्ञापकं यावत्तावदादिकं चिह्नाक्षरम्। अमीषां भेदानां विवेचनं क्रमशः क्रियते।

**उपलक्षणप्रयोजनम्-** राशिरथवा रूपादिकं धनात्मकम् ऋणात्मकं वा भवति। धनर्णराश्योः रूपादीनां वा धनर्णात्मकं भेदबोधनार्थं किमपि अपलक्षणं चिह्नं वा कर्तव्यमेव इति प्राचीनाः सम्यग्रूपेण जानन्ति स्म। यतो हि उपलक्षण- लिङ्गमन्तरा को राशिः धनम् ऋणं वेत्ति ज्ञातुं न शक्यते। अतः आचार्यैः मुख्यतया धनर्णराश्योः कृते उपलक्षणं कल्पितम्।

**धनर्णराशेरूपलक्षणम्-** अत एव ऋणराशेः उपलक्षणार्थम् आर्यभटीय-भाष्यकारेण प्रथमभास्करेण स्वभाष्ये एकं लघुवृत्ताकारं चिह्नं प्रकल्पितम्।[1] तत्र राशेरूर्ध्वदक्षिणभागे एकं लघुवृत्तम् ऋणराशिबोधनपरं क्रियते यथा –

रूपत्रयं धनं षड् ऋणम् इत्यत्र षड् ऋणराशेरुपलक्षणार्थं (६.) इत्येवं निरूप्यते स्म। रूपं त्रयं धनं बोधितुम् ३ इत्येवं रूपेण लिख्यते। यत् एकतरस्य राशेः उपकल्पितेन ऋणत्वम् उपलक्षणेन तदितरराशेः धनत्वं स्वतः ज्ञायते। ततो धनराशेरूपलक्षणमनपेक्षितम् इति कृत्वा पूर्वाचार्यैः तदर्थं किमपि उपलक्षणचिह्नं न कृतमिति बोध्यम्।

ततः कालान्तरे लघुवृत्तस्थाने बिन्दुदानेन राशेः ऋणात्मकत्वं सूच्यते आचार्यैः।[2] तत्र

---

1. The History of Mathematics of Mathematicians of India. Chapter VI, Page 77
2. The History of Mathematics of Mathematicians of India. Chapter VI, Page 77

भास्कराचार्यैः राशीनाम् ऋणत्वस्य उपलक्षणार्थं बिन्दुरूपं चिह्नं प्रोक्तम्। तत्र राशेः ऊर्ध्वदक्षिणभागे एकं बिन्दुदानं क्रियते तेन ऋणात्मकोऽयं राशिः इति बोधो जायते। उक्तं च भास्करेण –

**उपलक्षणार्थमेषामृणात्मकानि ऊर्ध्वबिन्दूनि 3॥**[3]

इति। अर्थात् यानि ऋणात्मकानि रूपाणि तानि ऊर्ध्वदक्षिणभागबिन्दूनि भवन्ति इति। तद्यथा- रूपत्रयं धनं षड् ऋणम् इत्यत्र षड् ऋणराशेरुपलक्षणार्थं ( ६˙ ) इत्येवं निरूप्यते।

आधुनिकगणिते ऋणम् इत्यस्य minus इति संज्ञा वर्तते। तत्र ऋणत्वस्य उपलक्षणार्थं (-) चिह्नमिदं तथा च धनत्वस्य (+) इत्युभौ प्रसिद्धावेव। यथा- रूपत्रयं धनं षड् ऋणम् इत्यत्र षड् ऋणराशेरुपलक्षणार्थं (- ६) इत्येवं रूपेण लिख्यते। रूपं त्रयं धनं बोधितुम् ३ इति अथवा (+ ३) इत्येवं रूपेण व्यवहृयते। तालिकारूपेण स्फुटं स्यात् यथा –

| उपलक्षणम् | प्राचीनगणिते | आधुनिकगणिते |
|---|---|---|
| धनम् (+) | ३ | ३ अथवा + ३ |
| ऋणम् (-) | ६° अथवा ६ ˙ | |

**योगवियोगादिषड्विधीनाम् उपलक्षणम्-** प्राचीनानां योगादिविषये विशेषोपलक्षणानि न सन्ति तत्र न्यासादिना गणितविधिः प्रदर्श्यते। तथा च योगादिरेव उपलक्षणरूपेण लिख्यते। यथा- योगविधौ योगः, वियोगे अन्तरमिति, गुणनविधौ निघ्नम्, भागहारे तु हृतमिति, वर्गविधौ वर्ग एव, मूलविधावपि मूलमिति परं भास्कराचार्याणां बीजे (क) इति मूलबोधनपरकमुपलक्षणं लभ्यते।[4] रूपेण योगादिषड् विधीनां गाणितीयक्रियाः प्रदर्शयन्ते। यदि रूपत्रयं क्षयं रूपनवकं धनं इत्यनयोः योगादिषड्विधिर्विधेयः तदर्थं न्यासं यथा –

| | |
|---|---|
| योगः | रू ३. रू ९ योगे जातं रू ६[5] |
| वियोगः | रू ३. रू ९ अन्तरे जातं रू ६ |
| गुणनम् | रू ३. रू ९ निघ्ने जातं रू २७.[6] |
| भागहारः | रू ३. रू ९ हृते जातं रू ३. |
| वर्गः | रू ३. रू ९ वर्गौ जातौ रू ९ रू ८१ |
| मूलम् | रू ९ मूले जातं रू ३ अथवा रू ३. |

इत्येवं रूपेण धनर्णषड्विधीनाम् उपलक्षणं प्राचीनैः प्रदर्शितम्।

अत्र आधुनिकानां धनर्णषड्विधेः उपलक्षणमिति विषये किञ्चिदुच्यते। तत्र (+) चिह्नमिदं

3. बीजगणितम् – वासनाभाष्ये श्लो. - ५, पृ.सं.- ४
4. भारकरीयबीजगणितम्, वासनाभाष्यम्, करणीषड्विधम्, पृ.सं. ३८,
5. धनर्णयोरन्तरमेव योगः अनेन सूत्रेण रु ६ इत्यवशिष्टम्। भास्करीयबीजगणितं, धनर्णषड्विधम्, श्लो.- ३, पृ.सं.- ३
6. ऋणं धनगुणमृणं भवतीति नियमेन अत्र २७. रूपाणि ऋणात्मकानि ।

योगविधिं प्रदर्शयति। यदि द्वयोः राश्योः, रूपयोः अव्यक्तयोर्वा मध्ये भवेत् तर्हि तयोः योगः कर्तव्यः इति बोध्यते। सर्वादौ अस्य चिह्नस्य प्रयोगः Nicole Oresme इत्याख्येन फ्रांसदेशीयगणकेन कृतमिति कथ्यते।[7] (-) लिङ्गमिदं वियोगविधिं प्रदर्शयति। यद्येवं भवेत् तर्हि तयोः वियोगः कर्तव्यः इति ज्ञायते। Johannes Widmann इत्याख्येन जर्मनगणितज्ञेन प्रयुक्तमिदं चिह्नम्[8]। (x) गुणनोपलक्षणमिदं राश्योर्मध्ये भवति चेत् तदा तयोः गुणनं विधेयमिति अवगम्यते। चिह्नमिदम् William Oughtred इत्याख्येन इंग्लेंड गणितज्ञेन प्रयुक्तम्[9]। अपि च (.) इत्येतदपि प्रसिद्धमेव गुणनोपलक्षणार्थं ययोः राश्योः गुणनमपेक्षितं भवति तयोर्मध्ये बिन्दुदानेन गुणनक्रिया प्रदर्शयते। जर्मनगणितज्ञेन Gottfried Wilhelm Leibniz इत्याख्येन कृतमिति [10]। (÷) इत्येतत् भागहारविधेः चिह्नं यत्र भवति तत्र भागहारविधिर्विधेयः इति बुध्यते। अस्य चिह्नस्य उपादकः Johann Rahn गणकः इति कथ्यते[11]।11 एतदर्थं (/) इदमपि उपलक्षणं प्रथितमेव। अस्य आविष्कर्ता इंग्लेंददेशीयः Thomas Twining नामकः गणकः आसीत् इत्युच्यते[12]।12 वर्गार्थमुपलक्षणं विशेषं नोपकल्पितम्। तत्र यस्य राशेः वर्गः बोधनीयः तस्य दक्षिणोर्ध्वभागे अङ्कद्वयदानं क्रियते। यथा – रूपत्रयस्य वर्गः ३२ इत्येवमेव त्रिघातचतुर्घातादिविषयेऽपि बोध्यम्। मूलोपलक्षणभूतं चिह्नमिदं प्रथितमेव सर्वत्र आधुनिकगणिते। अस्य जनकः फ्रेंच् देशीयगणकः Ren Descartes इत्यासीत्।[13]13 अर्वाचीनगणिते योगादीनां न्यासः -

| | |
|---|---|
| योगः | 3 + 9 = 12 |
| वियोगः | 9 − 3 = 6 |
| गुणनम् | 9 × 3 = 27 |
| भागहारः | 9 ÷ 3 = 3 |
| वर्गः | = 81 |
| मूलम् | = 9 |

अत्र प्राचीनगणितस्य आधुनिकगणितस्य चोपलक्षणानि तालिकारूपेण दर्शयामः -

7. Ca. 1360 (abbreviation for Latin et resembling the plus sign) https://en.m.Wikipedia.or
8. 1489 (First appearance of minus sign, and also first appearance of plus sign in print) https://en.m.Wikipedia.org
9. 1618 , https://en.m.Wikipedia.org
10. 1698 (perhaps derving from a much earlier use of middle dot to separate juxtaposed numbers) https://en.m.Wikipedia.org
11. 1 1659 , https://en.m.Wikipedia.org
12. 1718 (deriving from horizontal fraction bar, invented by Arabs in the 12th century) https://en.m.Wikipedia.org
13. 1637 (with the vinculum above the radicand) https://en.m.Wikipedia.org

| षड्विधयः | प्राचीनोपलक्षणानि | आधुनिकोपलक्षणानि |
|---|---|---|
| योगः (Addition) | योगः | + |
| वियोगः (Subtraction) | अन्तरम् | - |
| गुणनम् (Multiplication) | निघ्नम् | X (.) |
| भागहारः (Division) | हृतम् | ÷ (/) |
| वर्गः (Square) | वर्गः | ३ २ |
| मूलम् (Square root) | मूलम् क | |

इत्थं प्राचीनानाम् आधुनिकानाम् उपलक्षणचिह्ने भेदः स्पष्ट एव। परञ्चाधुनिकगणिते इतोऽपि अनेकानि उपलक्षणचिह्नानि प्रकल्पितानि सन्तीति सुविदितमेव समेषाम्। तेषु अत्र प्रयुक्तानाम् उपलक्षणानां विषये ईषदिव विविच्यते। धनर्णचिह्नं (±) इदं द्वयोः राश्योर्मध्ये भवति चेत् तदा तयोः योगः अन्तरं वा अवगम्यते। यथा – ६ ± ३ = ९, ३ इत्यनयोः राश्योः बोधो भवति। अन्तरस्य (-) चिह्नमिदं उभयोः राश्योर्मध्ये यः ज्येष्ठः तस्मात् कनिष्ठतरस्य शोधनं कर्तव्यमिति सूचयति। (=) चिह्नमेतत् राश्योः तुल्यतां बोधयति। कोष्ठकचिह्नानि ( ),[],{} इत्यादीनि भवन्ति। अत्र कोष्ठाकान्तरवर्तीनाम् अङ्कानां वर्णानां वा एकराशित्वं भवति। (>) चिह्नमिदं द्वयोः राश्योर्मध्ये यः ज्येष्ठो भवति तदभिमुखमेतत् स्थाप्यते।

धनर्णराशिनां योगवियोगादयः षड्विधयः प्राचीनविधिवत् [14]14 आधुनिकगणितेऽपि विद्यते। तत्रादौ Addition (योगः) यथा – स्वयोरस्वयोः योगे युतिः 3 + 9 = 12, -3 (-9) = -12, धनर्णयोरन्तरमेव 3 +-( 9) ±- 9 योगो भवति।

Subtraction (वियोगः)

अत्र संशोध्यमानस्य धनर्णचिह्नं विपर्यासमेति शेषविधिः योगवदेव भवति। Multiplication (गुणनम्) स्वयोरस्वयोः स्वं वधः स्वर्णघाते क्षयः (+) X (+) = + , (-) X (-) = +, (-) X (-) = + इति गुणनम्। Division (भागहारः) गुणनविधाविव भागहारविधिरपि बोध्यः। Square (वर्गः) धनर्णयोः वर्गः धनमेव भवति। Square root (मूलम्) धनर्णयोः मूलं धनर्णे भवतः परम् ऋणस्य मूलं न भवति तस्य अकृतित्वात्। इत्येवं रूपेण प्राचीनाधुनिकानां धनर्णषड्विधयः तुल्याः एवेति। यथा- यथा अर्वाचीनगणितस्य विकासः अभवत् तथा-तथा तत्रोपलक्षणचिह्नानाम् अपि वृद्धिः जाता। भारतीयबीजगणितपरम्परायाः लोपात् न तत्र किमपि नूतनम् उलक्षितम्। ॥ शम्॥

---

14. धनर्णषड्विधीनां तृतीयाध्याये ८६-९५ पृष्ठयोः विस्तरेण निरूपणं कृतम्।

# लालमणिदैवज्ञविरचितप्रश्नसुधाकरोक्तानां कार्यसिद्धियोगानां विवेचनम्

**विघ्नेश अय्यरः**

वेदचक्षुःस्वरूपस्य ज्योतिःशास्त्रस्य फलितस्कन्धान्तर्गते प्रश्नशास्त्रे कार्यसिद्धियोगाख्यः अयं विषयः मया अस्मिन् शोधपत्रे प्रतिपादनाय स्वीक्रियते। मामकीनस्य शोधकार्यार्थं स्वीकृतस्य अप्रकाशितस्य अनुपमस्य अद्भुतस्य प्रश्नसुधाकराख्यस्य ग्रन्थस्य नवमसंज्ञके शुभाऽशुभलक्षणाध्याये षड्भिः[1] पद्यैः कार्यसिद्धियोगाख्यः विषयः ग्रन्थकर्त्रा श्रीमता आचार्येण लालमणिदैवज्ञेन उपस्थापितः। इमे योगाः एव प्रष्टरि "मदीयं कार्यं सिध्यति वा न वेति" प्रश्ने पृष्टे सति तस्य फलादेशकथने ज्यौतिषिकम् उपकुर्वते।

अन्यग्रन्थदृशा इमे योगाः प्रश्नज्ञानप्रदीपे पञ्चभिः[2] पद्यैः, पृथुयशःकृतायां षट्पञ्चाशिकायां द्वाभ्यां[3] पद्याभ्यां, आचार्यरुद्रमणिकृते प्रश्नशिरोमणौ[4] सार्धपद्यचतुष्टयेन, जीवनाथदैवज्ञकृते प्रश्नभूषणे[5] त्रिभिः पद्यैः, प्रश्नचण्डेश्वरे[6] च एकेन पद्येन निरूपिताः वर्तन्ते। एतेषु ग्रन्थेषु प्रोक्तादीनां योगानां प्रश्नसुधाकरोक्तैः योगादिभिः सह किं साम्यं किं च वैषम्यं वर्तते इति विचारेण सह प्रश्नसुधाकरस्थानां पद्यानाम् अन्यग्रन्थस्थेभ्यः पद्येभ्यः किं वैशिष्ट्यम् इति च निरूपयितुम् इदं शोधपत्रम् अहं लिलेखिषामि। तद्यथा -

प्रश्नसुधाकरे उक्तेषु पद्येषु कार्यसिद्धिविषयकं प्रथमं पद्यं वर्तते–

**'पञ्चमनवमोपगतैर्गुरुबुधशुक्रैर्यथेप्सितावाप्तिः।**
**षट्त्रिकलाभोपगतैः क्षितिसुतरविसूर्यजैस्तद्वत्** [7]।।'

अस्य अर्थः अयं वर्तते यत् गुरुबुधशुक्राः पञ्चमभावे वा नवमभावे स्थिताः चेत् प्रष्टुः कार्यसिद्धिः भवति। तथैव सूर्यकुजशनयः तृतीयभावे षष्ठभावे एकादशभावे वा स्थिताः चेत् प्रष्टुः कार्यसिद्धिः भवति। एतादृशः योगः ग्रन्थान्तरेषु न दृश्यते।

प्रश्नसुधाकरे प्रोक्तेषु पद्येषु कार्यसिद्धिविषयकं द्वितीयं पद्यं वर्तते-

---

1. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 5,10,17,29,30,31,32।
2. प्रश्नज्ञानप्रदीपः - त्रिंशाध्यायः – पं.सं. – 1-5। पृ.सं. – 206-208।
3. षट्पञ्चाशिका – प्रथमाध्यायः – प.सं. – 4। पृ.सं. – 7। चतुर्थाध्यायः – प.सं. - 1। पृ.सं. – 41।
4. प्रश्नशिरोमणिः – प्रथमाध्यायः – प.सं. – 9-13। पृ.सं. – 3।
5. प्रश्नभूषणम् – द्वितीयाध्यायः – प.सं. – 3,4। पृ.सं. – 23.25।
6. प्रश्नचण्डेश्वरः – तृतीयाध्यायः – प.सं. – 9। पृ.सं. – 32।
7. प्रश्नसुधाकरः – नवमाध्यायः – प.सं. – 10।

**'मित्रेक्षितो मित्रगृहे विलग्ने शुभग्रहश्चाशु करोति पुंसाम्।**
**सुकार्यसिद्धिं विजयं समृद्धिं नष्टार्थलाभं परमां च मैत्रीम्[8]।।'**

यदि प्रश्नकाले कश्चन शुभग्रहः स्वमित्रग्रहेण दृष्टः लग्ने वा मित्रक्षेत्रे वा तिष्ठति चेत् कार्यसिद्धिः जायते इति। अयं योगः अपि ग्रन्थान्तरेषु न दृश्यते।

प्रश्नसुधाकरे कथितेषु पद्येषु कार्यसिद्धिविषयकं तृतीयं पद्यं वर्तते –

**'पश्येद्विलग्नं यदि लग्ननाथः कार्याधिपः कार्यगृहं प्रपश्येत्।**
**कार्येश्वरो लग्नगतश्च पश्येल्लग्नेश्वरं सिद्धिमुपैति कार्यम्[9]।।'**

अस्मिन् पद्ये द्वे योगे निरूपिते वर्तेते। प्रथमः योगः वर्तते यत् यदि लग्नेशः लग्नं पश्यति तथा कार्येशः कार्यं पश्यति चेत् कार्यसिद्धिः भवति। द्वितीयः योगः वर्तते यदि कार्येशः लग्ने स्थित्वा लग्नेशं पश्यति चेत् कार्यसिद्धिः भवति। इमौ योगौ प्रश्नज्ञानप्रदीपे प्रोक्तौ वर्तेते यथा –

**'लग्नं लग्नेश्वरः पश्येत् कार्यं पश्येत्तु कार्यपः।**
**कार्येश्वरो लग्नगतः प्रपश्येल्लग्नपं तथा[10]।।'**

तथा च एतयोः योगयोः प्रथमः योगः प्रश्नभूषणे अपि प्रोक्तः वर्तते यथा-

**'प्रश्नलग्नाधिपो लग्नगेहं यदा कार्यनाथोऽपि कार्यालयं पश्यति[11]' इति।**

अथ प्रश्नसुधाकरे निगदितेषु पद्येषु कार्यसिद्धिविषकं चतुर्थं पद्यं वर्तते-

**'कार्यस्थितौ चन्द्रविलग्ननाथौ शुभेक्षितौ कार्यकरौ भवेताम्।**
**लग्नस्थितौ लग्नपकार्यनाथौ कार्यस्य सिद्धिं कुरुतस्तदानीम्[12]।।'**

अस्मिन् पद्ये अपि योगद्वयं प्रोक्तं वर्तते। तयोः प्रथमः योगः वर्तते यत् यदि चन्द्रः लग्नेशः च कार्यभावे स्थित्वा शुभग्रहेण दृष्टौ चेत् कार्यसिद्धिः जायते। द्वितीयः योगः च अयं यत् यदि लग्नेशः कार्येशश्च लग्नभावे स्थितौ चेत् कार्यस्य सिद्धिः जायते। अस्मिन् पद्ये कथितः प्रथमः योगः अन्येषु ग्रन्थेषु नोक्तः। अस्मिन् पद्ये यः द्वितीयः योगः कथितः सः योगः प्रश्नज्ञानप्रदीपे अपि निरूपितः वर्तते यथा-

**'लग्नस्थौ कार्यलग्नेशौ कार्यस्थौ लग्नकार्यपौ।**
**कार्यस्य सिद्धिं कुरुतस्तदानीं निश्चयाद् वदेत्[13]।।'**

प्रश्नशिरोमणौ अपि अस्मिन् पद्ये कथितः द्वितीयः योगः उपलभ्यते यथा-

**'यदि वपुःकृतिपौ गृहसङ्गतौ त्रिलवमेकमितौ कृतिसिद्धिदौ[14]' इति।**

---

8. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 17।
9. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 29।
10. प्रश्नज्ञानप्रदीपः – त्रिंशाध्यायः – प.सं. – 2। पृ.सं. – 207।
11. प्रश्नभूषणम् – द्वितीयाध्यायः – प.सं. – 3। पृ.सं. – 23।
12. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 30।
13. प्रश्नज्ञानप्रदीपः - त्रिंशाध्यायः – पं.सं. – 1। पृ.सं. – 207।
14. प्रश्नशिरोमणिः – प्रथमाध्यायः – प.सं. – 9। पृ.सं. – 3।

अत्र योगस्तु समानः एव किन्तु प्रश्नशिरोमणौ आचार्यरुद्रमणिना 'त्रिलवमेकमितौ' इति शब्दः पद्ये विनिवेशितः वर्तते। लवः ज्योतिःशास्त्रे कलायाः पर्यायत्वेन क्वचित् प्रयुज्यते इत्यतः यदा लग्नेशकार्येशयोः अन्तरं त्रिलवमितं अथवा तस्मात् न्यूनं वर्तते तदा एव कार्यसिद्धिः भवति इति निरूपयितुमेव अयं शब्दः अत्र न्यस्तः इति भाति। अर्थात् तयोः अन्तरस्य न्यूनतायां सत्याम् एव कार्यसिद्धियोगस्य सम्भवः इति वैशिष्ट्यं प्रश्नशिरोमण्युक्तपद्येन सिद्धीभवति।

प्रश्नसुधाकरे भणितेषु पद्येषु कार्यसिद्धिविषयकं पञ्चमं पद्यं वर्तते-

**'कार्यस्थितौ लग्नपकार्यनाथौ चन्द्रान्वितौ चेत् कुरुतस्तदानीम्।**
**तत्कार्यसिद्धिं शुभवीक्षितौ च पापारिदृष्टौ बलिनौ तथाऽल्पम्15[15]।।'**

अस्मिन् पद्ये एकः योगः कथ्यते यत् यदा कार्यभावे लग्नेशकार्येशौ स्थितौ चेत् चन्द्रेण सहितौ शुभग्रहैः दृष्टौ कार्यसिद्धिं विदधाते। अस्मिन् एव योगे यदि चन्द्रसहितौ लग्नेशकार्येशौ पापग्रहैः शत्रुग्रहैः वा दृष्टौ चेत् कार्यसिद्धेः सम्भावना अल्पीयसी एव इति। अयमेव योगः भिन्नतया उक्तः वर्तते प्रश्नभूषणे यथा-

**'चेन्मिथो लक्षणं लग्नकार्येशयोरात्माभावस्थयोः कार्यसिद्धिस्तदा।**
**पूर्णबिम्बेन चन्द्रेन दृष्टाविमौ सत्वरं कार्यसिद्धिः प्रयासं विना16[16]।।'**

अस्मिन् योगे तु लग्नेशः लग्ने स्थितः तथा कार्येशः कार्यभावे स्थितः अपि च पूर्णबिम्बः चन्द्रः तौ उभौ अपि पश्यति चेत् सत्त्वरं कार्यसिद्धिः भवति इति। अत्र पूर्णबिम्बवतः एव चन्द्रस्य दृष्टेः ग्रहणात् ग्रन्थेषु क्षीणेन्दुः पापग्रहः इति मतात् पूर्णेन्दुः शुभग्रहः एव इति सिद्ध्या तस्य दृष्टिः शुभग्रहदृष्ट्या समाना एव इति मत्वा प्रश्नसुधाकरोक्तवत् अस्मिन् योगे अपि शुभदृष्टेः सद्भावेन एव कार्यसिद्धिः भवतीति मन्तव्यम्। प्रश्नसुधारप्रोक्तेषु पद्येषु कार्यसिद्धिविषयकं षष्ठं पद्यं वर्तते –

**यस्मिन्नहन्युदयमेष्यति कार्यनाथो**
**द्रक्ष्यत्यथोदयपतिं युगपच्च कार्यम्।**
**कार्येश्वरोदयपयोश्च यदेत्थशाल-**
**स्तस्मिन् दिने खलु भविष्यति कार्यसिद्धिः [17]।।**

आदौ कार्यसिद्धिकालः कथ्यते अस्मिन् पद्ये ग्रन्थकारेण। तद्यथा - कार्यभावाधिपः यस्मिन् दिने उदयं प्राप्य लग्नाधिपतिं पश्यति तस्मिन् दिने कार्यसिद्धिः भविष्यति। अत्र उदयशब्दस्य सूर्यसकाशादुदयः इत्यर्थः। अथवा यस्मिन् दिने कार्येश्वरलग्नेश्वरयोः इत्थशालः भवति तस्मिन् दिने कार्यसिद्धिः भविष्यति इति। अस्य ज्ञानार्थम् इत्थशालयोगः कः इति प्रश्नसुधाकरोक्तैः पद्यैः एव वर्ण्यते यथा - 'रविः शराब्जैस्तपनैः शशाङ्को लवैर्महीजो वसुभिश्च भागैः। ज्ञभार्गवौ सप्तलवैर्नभोगैर्देवेज्यमन्दौ प्रयुतिं करोति। शीघ्रग्रहश्चोक्तलवैश्च मन्दाद्धीनोऽथ लिप्तार्धविलिप्तिकाभ्याम्। तुल्योऽथवा चेद्धुवमित्थशालो

15. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 31।
16. प्रश्नभूषणम् – द्वितीयाध्यायः – प.सं. – 4। पृ.सं. – 25।
17. प्रश्नसुधाकरः - नवमाध्यायः – प.सं. – 32।

योगः18[18]' इति। अस्यार्थः – पञ्चदशांशाः सूर्यस्य, द्वादशांशाः चन्द्रस्य, अष्टावंशाः कुजस्य, बुधशुक्रयोः सप्तांशाः, गुरुशन्योः नवांशाः च। यदि शीघ्रगतिकः ग्रहः मन्दगतिकात् ग्रहात् उक्तांशैः हीनः अथवा लिप्तार्धविलिप्तिकाभ्यां हीनः चेत् इत्थशालयोगः सिध्यति। अत्र प्रश्नकाले लग्नेश्वरस्य कार्येश्वरस्य च यदा इत्थशालयोगः तस्मिन् काले कार्यसिद्धिः भविष्यति इति सिद्धम्।

प्रश्नज्ञानप्रदीपे कार्येशलग्नेशानुसारं कार्यसिद्धिकालः कथ्यते यथा-

**असत्स्वपि च योगेषु कार्येशोदयराश्यदि।**
**भविष्यति तदा काले कार्यं ज्ञानप्रदीपके** [19]।।

अर्थात् यस्मिन् काले कार्याधिपतिः लग्नाधिपतेः स्वराशौ तिष्ठति तस्मिन् काले कार्यसिद्धिः भविष्यति इति। अयं योगः प्रश्नसुधाकरोक्तेन योगेन न तु समानः किन्तु द्वयोः अपि ग्रन्थोक्तयोः योगयोः साम्यं तु लग्नेशकार्येशाभ्यां वर्तते। अन्येषु ग्रन्थेषु एतादृशौ योगौ न प्रोक्तौ।

अन्ते च लग्नस्य वक्त्रदिगनुगुणं कार्यसिद्धिः उच्यते लालमणिदैवज्ञेन प्रश्नसुधाकरे-

**होरा चेदूर्ध्ववक्त्रा भवति हि जनने प्रश्नलग्नेऽथ कार्य-**
**प्रारम्भे तर्हि लक्ष्मीर्बलपदविभुताप्राप्तिरादेशनीया।**
**यद्येषाऽधोमुखीस्याद्धनपदविभुतास्थानहानिर्विपच्च**
**स्याद्धोरा तिर्यगास्या यदि कथय तदा सर्वकार्यार्थसिद्धिम्** [20]।।

अस्मिन् पद्ये होरा शब्दस्य 'होरेति लग्नं भवनस्य चार्द्धम्' इति वराहमिहिरोक्तप्रमाणेन लग्नम् इत्यर्थः। तस्य लग्नस्य मुखानुसारेण फलादेशः अत्र क्रियते। तत्र च लग्नस्य त्रिविधानि मुखानि भवन्ति। ऊर्ध्वमुखम्, अधोमुखं तथा तिर्यङ्मुखं च। यः राशिः सूर्येण मुक्तः सः ऊर्ध्वमुखराशिः। यस्मिन् राशौ सूर्यः तिष्ठति सः अधोमुखराशिः। सूर्यः यं राशिम् अग्रे प्रवेक्ष्यति सः राशिः तिर्यङ्मुखराशिः। एतदनुगुणं जन्मलग्नं प्रश्नलग्नं वा कीदृशे राशौ वर्तते इति विज्ञाय तत् यदि तिर्यङ्मुखराशौ वर्तते चेत् तदा कार्यसिद्धिः आदेशनीया इत्यर्थः। एतादृशः योगः तु अन्येषु ग्रन्थेषु नोपलभ्यते।

एवं मया दैवज्ञलालमणिना प्रश्नसुधाकरोक्ताः सर्वे कार्यसिद्धियोगाः अन्येषु समानेषु प्रश्नग्रन्थेषु प्रोक्ताः योगाः अत्र विवेचिताः। प्रश्नसुधाकरे अन्येषु प्रश्नग्रन्थेषु अनुक्ताः पञ्च कार्यसिद्धियोगाः निरूपिताः वर्तन्ते। एतेषां पञ्चसङ्ख्यकानां योगानां तथा अन्येषाम् अन्यग्रन्थेषु उपलभ्यमानानां योगानां च फलादेशे प्रभावः ज्योतिर्विद्भिः फलादेष्टृभिः गवेषणीयः विषयः वर्तते। तदर्थं तेषां सौकर्याय इदं शोधपत्रं लिखितमिति। तथा च अन्येषां ज्योतिश्शास्त्रं पिपठिषूणां छात्राणां पण्डितानां च कृते योगानां स्पष्टार्थज्ञानार्थम् इदं शोधपत्रं उपकरिष्यते इति सच्चिन्तया शम्।

---

18. प्रश्नसुधाकरः - पञ्चमाध्यायः – प.सं – 8-9।
19. प्रश्नज्ञानप्रदीपः - त्रिंशाध्यायः – पं.सं. – 5। पृ.सं. – 208।
20. प्रश्नसुधाकरः – नवमाध्यायः – प.सं. – 5।

## सन्दर्भग्रन्थसूची –

**प्रश्नचण्डेश्वरः-**
विष्णुदत्तदैवज्ञकृतविष्णुपदीव्याख्यासहितः- अभय कात्यायन-
चौखम्बा सुरभारती प्रकाशन (2014)

**प्रश्नज्ञानप्रदीपः-**
वर्तिकाहिन्दीटीकासहितः
अभय कात्यायन- चौखम्बा सुरभारती प्रकाशन (2012)

**रुद्रमणिकृता प्रश्नशिरोमणिः-**
पण्डितरामदयालु
खेमराज श्रीकृष्णदास प्रकाशन (2013)

**पृथुयशःकृता षट्पञ्चाशिका**
आचार्य गुरुप्रसाद गौड
चौखम्बा सुरभारती प्रकाशन (2012)

**जीवनाथदैवज्ञकृतं प्रश्नभूषणम्**
आचार्य गुरुप्रसाद गौड
चौखम्बा सुरभारती प्रकाशन (2014)

# अंशकायुर्दायसाधनक्रमः

**डॉ. प्रसादभट्टः**
सहायकाचार्यः (संविदा),
श्री रणवीरपरिसरः, जम्मूः

अथ स्वप्राकृतकर्मानुषङ्गेन यथासम्भवं यथायोनिं सम्प्रविष्टो जीवः येन प्रारब्धेन कर्मणा यच्छरीरमारब्धम् आकर्मसमाप्तितच्छरीरावस्थितः यावत्कालं कलयति स च कालः आयुः इत्युच्यते। एवम् आयुर्नाम जीवितकालः इति सिद्ध्यति। अस्य जीवितकालस्य इयत्तां जन्मकालिकग्रहस्थितिवशात् आयुर्दायेन होराविदः गणयन्ति। प्रत्येकोऽपि ग्रहः उच्चकेन्द्राद्यवस्थितिवशात् पृथगेवायुःप्रमाणं प्रददातीति मत्वा आयुषां दायः आयुर्दायः इत्यन्वर्थकं नाम निश्चितम्। एतस्मिन्नायुर्दाये प्रमुखतया अंशकबलपिण्ड -नैसर्गिक-मिश्र-जीवशर्मायुर्दायाश्चेति भेदाः दृश्यन्ते। अथात्र प्रसङ्गेऽस्मिन् आचार्यश्रीपतिप्रणीतजातक-कर्मपद्धत्यनुसारम् अंशकायुर्दायसाधनप्रकारः विव्रियते।

उच्चचेष्टारश्मिभ्याम् उच्चचेष्टागुणकौ संसाध्य ततः स्फुटगुणकमानीय तस्मादाश्रयगुणकं साधयेत्। तयोः स्फुटाश्रयगुणकयोः अन्योन्यगुणनान्मूलम् आयुःकर्मयोग्यगुणकम् आनयेत्। ततो ग्रहाणाम् आयुष्कलाः समानीय सति सम्भवे तासां चक्रपातार्धहानिं कृत्वा आयुष्कर्मयोग्यगुणकेन सङ्गुण्य द्विशत्या विभज्य वर्षादिकमायुः साधयेत्। एवमेव लग्नस्याप्यायुर्निर्णीय तत् सर्वग्रहायुःप्रमाणेन योज्यते चेत् पूर्णमायुः प्रसिद्ध्यति। इत्थं स्थूलरूपेण गणितप्रक्रियायाः सङ्ग्रहः।

अथेदानीम् अनुक्रमं ससूत्रं गणितपद्धतिं विचारयामः- 'नीचोनितास्स्पष्टतराः खगेन्द्राः'[1] इत्युक्तप्रकारेण तत्तद्ग्रहनीचस्फुटात् तत्तत्स्पष्टग्रहान् विशोध्य उच्चकेन्द्रमानीय कलीकृत्य अष्टादशशतं संयोज्य अष्टादशशतेन विभजेत्, तदा उच्चरश्मिप्रमाणं सिद्ध्यति। यथा-

$$\frac{\text{उच्चकेन्द्रस्य कलाः} + १८००}{१८००} = \text{उच्चरश्मिप्रमाणम्।}$$

एवमेव **'मध्यस्पष्टद्युचरविवरार्धेन युक्ताच्चलोच्चात्'**[2] इत्युक्तप्रकारेण कुजादीनां चेष्टाकेन्द्राणि, **'भास्वानयनांशयुक्तस्त्रिभाधिकश्चेन्दुरिनेन हीनः'**[3] इत्युक्तप्रकारेण रविचन्द्रयोः चेष्टाकेन्द्रे चानीय पूर्वोक्तवत् **'कलीकृता राशिकलाभिरन्विता भलिप्तिकाप्ता'**[4] इति कृत्वा चेष्टारश्मिप्रमाणमानेतव्यम्। तद्यथा-

1. श्रीपतिपद्धतिः – अ.४ श्लो.२
2. श्रीपतिपद्धतिः – अ.३ श्लो.१७
3. श्रीपतिपद्धतिः – अ.४ श्लो.३
4. श्रीपतिपद्धतिः – अ.४ श्लो.२

$$\frac{\text{चेष्टाकेन्द्रस्य कलाः + १८००}}{\text{१८००}} = \text{चेष्टारश्मिप्रमाणम्।}$$

एवं प्रत्येकमुच्चचेष्टारश्मीन् समानीय ततः **‘एकोनदीधितिसमादिह गच्छतः’**[5] इत्यनेन प्रकारेण सर्वधनात्मकरूपं श्रेढीफलमानयेत्। तद्यथा –

$$\frac{\text{(पदम् - १) X चयः + आदिः + आदिः}}{\text{२}} \text{ X पदम् = सर्वधनम् = श्रेढीफलम्}$$

[ ग्रहस्य पृथक् पृथक् उच्चचेष्टारश्मयः-१ = पदम्, आदिः= १, चयः= १ (**‘रूपादिना रूपचयेन’**[6] **इत्युक्तेः**) ]

अत्र उच्चरश्मिग्रहणे उच्चश्रेढीफलं चेष्टारश्मिग्रहणे चेष्टाश्रेढीफलं च लभ्यते। एतदुभयमपि श्रेढीफलं प्रत्येकं स्वस्वरश्मिभिः विभजेत्, तदा उच्चचेष्टागुणकौ लभ्येते। तद्यथा –

$$\frac{\text{उच्चश्रेढीफलम्}}{\text{उच्चरश्मिप्रमाणम्}} = \text{उच्चगुणकः} \quad \frac{\text{चेष्टाश्रेढीफलम्}}{\text{चेष्टारश्मिप्रमाणम्}} = \text{चेष्टागुणकः}$$

अत्र यदि श्रेढीफलं स्वरश्मिभ्यः ऊनं तर्हि प्रकारान्तरेण तौ गुणकौ आनयेत्। तद्यथा-

$$\frac{\text{स्वरश्मिभ्यः ऊनं श्रेढीफलम् + स्व-स्व रश्मयः}}{\text{२}} \div \text{स्व स्व रश्मयः = उच्चचेष्टागुणकौ ।}$$

ततः उच्चचेष्टागुणकयोः परस्परगुणनात् मूलं स्फुटगुणकः भवति। तद्यथा –

उच्चगुणकः X चेष्टागुणकः= फलम् । अस्य फलस्य मूलं = स्फुटगुणकः ।

एतदेव **‘तद्घातमूलं गुणकस्स्फुटः स्यात्’7**[7] इत्युक्तम्। अयं स्फुटगुणकः पृथक् संस्थाप्यः।

**आश्रयगुणकानयनम् –**

अत्र प्रथमादयः त्रयः गुणकाः भवन्ति, एतेषां परस्परगुणनेन आश्रयगुणकः सिद्ध्यति।

**प्रथमगुणकः**- वर्गोत्तमे स्वभवने स्वद्रेष्काणे स्वनवांशे वा सति ग्रहे- २, अधिमित्रक्षेत्रस्थे ग्रहे- १-$^{१२}$, मित्रक्षेत्रस्थे ग्रहे- १-$^{१३}$, समक्षेत्रस्थे- १, शत्रुक्षेत्रस्थे-$^{२३}$ अधिशत्रुक्षेत्रस्थे-$^{१२}$ च गुणकसंख्या भवति। एषु गुणकेषु अधिकसंख्याकः कश्चिदेक एव गुणकः स्वीकर्तव्यः। एवं निर्णीय स्वीकृतं गुणकं चतुर्भिः विभज्य राशिस्थाने संस्थाप्य तस्य अर्धं होरादिषड्वर्गाणां स्थाने स्थापयेत्। एवं सप्तानां वर्गाणाम् एकां पङ्क्तिं सप्तानामपि ग्रहाणां पृथक् पृथक् रचयेत्। एवं प्रथमः गुणकः।

**द्वितीयगुणकः**- अयं गुणकः राशिस्थाने एव पूर्वोक्तगुणकस्य भवति। तत्र पुनः स्वक्षेत्रं विहाय वर्गोत्तमस्वनवांशस्वद्रेष्काणेषु स्थितस्य ग्रहस्य राशिस्थाने$^{१२}$ इति गुणके स्वीकृते सत्येव अयं द्वितीयगुणकः स्वीकार्यः नान्यथा। अधिमित्र-मित्र-सम-शत्रु-अधिशत्रुक्षेत्रस्थे ग्रहे क्रमेण -$^{११७}$ , -$^{२९२१}$ १, -$^{१३२१}$ , -$^{३७}$ चैताः गुणकसंख्याः भवन्ति। एताः भसंज्ञाः गुणकसंख्याः अतः राशिस्थाने एव एतेषां

5. श्रीपतिपद्धतिः – अ.५ श्लो.२
6. श्रीपतिपद्धतिः – अ.४ श्लो.५
7. श्रीपतिपद्धतिः – अ.५ श्लो.३

प्रयोगः भवति, होरादिषड्वर्गाणां गुणकानां एतासां च न कोऽपि सम्बन्धः विद्यते। अतः अयं द्वितीयगुणकः कादाचित्कः।

**तृतीयगुणकः-** अस्य गुणकस्य अनन्तरताडकः इत्यपि संज्ञा विद्यते। अत्र एवं गुणकसंख्यानिर्णयः- राश्यादिकः सप्तवर्गः स्वकीय एव चेत्- २, अधिमित्रस्य चेत् - $^{५३}$, मित्रस्य चेत्- $^{१३९}$, समस्य चेत्- १, शत्रोः चेत्- $^{५९}$, अधिशत्रोः चेत्-$^{१३}$ चेति। प्रथमगुणकवत् एतमपि गुणकं राशिपूर्वकसप्तवर्गाणां पङ्क्तौ निवेशयेत्।

एवं सति सम्भवे गुणकत्रयस्य अन्यथा प्रथमतृतीययोरेवेति गुणकद्वयस्य परस्परं गुणनं कुर्यात्। एवं परस्परगुणनेन राश्यादिस्थानेषु लब्धानां गुणकानां योगः एव आश्रयगुणकः इति कथ्यते। पूर्वं पृथस्थापितस्य स्फुटगुणकस्य आश्रयगुणकस्य च गुणनात् मूलमेव आयुष्कर्मयोग्यगुणकः भवति। तद्यथा -

स्फुटगुणकः X आश्रयगुणकः= फलम् । अस्य फलस्य मूलं = कर्मयोग्यगुणकः ।

एवं रव्यादीनां सप्तानां ग्रहाणां कर्मयोग्यगुणकाः समानीय पृथक् संस्थाप्याः।

**ग्रहाणामायुष्कलानयनम् –**

'ग्रहस्य लिप्ताः खखसिद्धभक्ताः शेषमिहायुषः कलाः स्यु'[४] इत्युक्तप्रकारेण ग्रहस्फुटकलाः २४०० संख्यया विभज्य शेषमिताः कलाः एव प्रत्येकस्य ग्रहस्य आयुष्कलाः भवन्ति। तद्यथा –

$\frac{\text{ग्रहस्फुटकलाः}}{२४००}$ = लब्धिः, शेषः

शेषः = आयुष्कलाः ।

एवं सर्वेषां ग्रहाणामायुष्कलाः संसाध्य एतासामायुष्कलानामेव चक्रपातार्धहानिः कार्या।

**चक्रपातार्धहानिः-**

प्रत्येकस्य ग्रहस्य स्फुटप्रमाणं लग्नस्फुटात् विशोध्य हरणकेन्द्रं संसाध्य अस्मिन् हरणकेन्द्रे राशिषट्कात् हीने एव हरणं कुर्यात् न त्वधिके। हरणकेन्द्रं राशिषट्कात् हीनं तदैव भवति यदा दृश्यचक्रार्धे ग्रहः तिष्ठति। अतः अस्य दृश्यचक्रार्धहरणम् इति अपरं नामधेयम्। [इदं च हरणं हारेण गुणकेन चेति प्रकारद्वयेन क्रियते। तत्र हारेण यदि चक्रपातार्धहानिः तदा विभज्य लब्धानां कलानां ग्रहाणामायुष्कलाभ्यः वियोजनं कार्यम्। गुणकेन यदि चक्रपातार्धहानिः तदा तेन गुणकेन ग्रहाणामायुष्कलानां गुणनं कार्यं तदा लब्धं फलमेव चक्रपातार्धहान्या अवशिष्टाः आयुष्कलाः भवन्ति। कदा हारेण कदा च गुणकेन चक्रपातार्धहरणं कर्तव्यमिति चेत्- यदा हरः रूपादधिकः तदा हारेण, यदा तु हरः रूपादूनः तदा गुणकेन चक्रपातार्धहरणं कर्तव्यम्।]

४. श्रीपतिपद्धतिः- अ. ५ श्लो. १२

पापग्रहोनलग्ने- पापग्रहोनलग्नस्फुटस्य कलाः (हरणकेन्द्रकलाः) १८०० अनया भक्ताः चेत् हरो लभ्यते। अस्मिन् हरे रूपादधिके अयमेव हरो भवति। अस्मात् हरात् पापग्रहायुष्कलाः विभज्य लब्धाः कलाः तत्पापग्रहायुष्कलाभ्यः वियुक्ताः सन्तः चक्रपातार्धहान्या अवशिष्टायुष्कलाः भवन्ति। अत्रैव हरः यदि रूपादूनः तर्हि रूपात् हरं विशोध्य अवशिष्टमेव तद्ग्रहकृतायुष्कलानां गुणकत्वेन ग्राह्यम्। एवं पापग्रहोनलग्ने हरगुणकयोरानयनक्रमः।

शुभग्रहोनलग्ने- शुभग्रहोनलग्नस्फुटस्य कलाः (हरणकेन्द्रकलाः) १८०० अनया भक्ताः चेत् पूर्ववत् हरो लभ्यते। अस्मिन्हरे रूपादधिके हरमेव द्विगुणितं कृत्वा तस्मात् शुभग्रहायुष्कलाः विभज्य लब्धाः कलाः तच्छुभग्रहायुष्कलाभ्यः विशोधनीयाः। तदा अवशिष्टकलाः एव चक्रपातार्धहान्या अवशिष्टाः अवशिष्टाः आयुष्कलाः भवन्ति। अत्र यदि रूपादूनः हरः तदा तस्य हरस्य अर्धं रूपाद्विशोध्य अवशिष्टाः एव आयुष्कलानां गुणकः स्यात्। अनेन गुणकेन गुणिता आयुष्कलाः एव चक्रपातार्धहान्या अवशिष्टाः आयुष्कलाः भवन्ति।

एवं सति सम्भवे चक्रपातार्धहानिं कृत्वा 'आयुर्लिप्ताः स्वगुणगुणिताः'[9] इत्युक्तप्रकारेण तत्तद्ग्रहायुष्कलाः तत्तत्कर्मयोग्यगुणकेन गुणिताः द्विशत्या विभक्ताः चेत् वर्षमासदिनघटीविघट्यात्मकम् आयुः सिद्ध्यति। तद्यथा –

$$\frac{\text{आयुष्कलाः} X \text{ कर्मयोग्यगुणकः}}{\text{२००}} = \text{आयुःप्रमाणम्।}$$

अत्र गणितकरणसमये 'चक्रार्धहानौ बहुषु द्वयोर्वा'[10] इति नियमात् एकस्मिन्नेव राशौ बहुषु ग्रहेषु स्थितेषु बलिष्ठस्य एकस्य एव ग्रहस्य चक्रपातार्धहानिः हार्या न तु सर्वेषामित्ययमंशः सर्वदा अवधेयः। यथा ग्रहाणाम् आयुष्कलाः साधिताः तथैव लग्नस्यापि **'ग्रहस्य लिप्ताः खखसिद्धभक्ताः'**[11] इति प्रकारेण लग्नायुष्कलाः साध्याः। परन्तु लग्नस्य कर्मयोग्यगुणको नास्ति, नास्ति च चक्रपातार्धहानिः। अतः ताः आयुष्कलाः द्विशत्या भक्ताः वर्षादिकं लग्नायुःप्रमाणं भवति। परन्तु-**'किन्तु लग्ने विशेषः'**[12] इत्युक्त्या भावबलकोष्ठके लग्नभावबले षड्भ्यः अधिके लग्नस्फुटस्य गतराशिसमानानि वर्षाणि, ततः अंशादिना मासदिनादिकमपि आनीय पूर्वानीते लग्नायुःप्रमाणे योज्यानि। इत्येवं लग्नायुषि कश्चन विशेषः विद्यते।

एवं सर्वेषां ग्रहाणां लग्नस्य च आयुरानीय सर्वेषां योगे स्फुटम् आयुःप्रमाणं सिद्ध्यति। इत्थम् अंशकायुर्दायानयनक्रमः जातककर्मपद्धतौ समीरितः इत्यलमतिविस्तरेण।

---

9. श्रीपतिपद्धतिः – अ.५ श्लो.१७
10. श्रीपतिपद्धतिः – अ.५ श्लो.२४
11. श्रीपतिपद्धतिः – अ.५ श्लो.१२
12. श्रीपतिपद्धतिः – अ.५ श्लो.१७

# ज्योतिषशास्त्रे सृष्टेरुत्पत्तेः क्रमः


## डा. वेदप्रकाशपाण्डेयः

सहायकाचार्यः (ज्योतिषम्)

रा.सं.महाविद्यालय-क्यार्टूः(शिमला), हि. प्र.


संस्कृतवाङ्मयं सम्पूर्णविश्ववाङ्मयसमुदाये मूर्धन्यमिति। अस्य हि विस्तृतं सुसमृद्धञ्च सर्वाङ्गपूर्णं कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। अत्रत्यो हि शाश्वतः सार्वभौमश्च ज्ञाननिधिरनादिकालादारभ्य वर्तमानयुगपर्यन्तमप्यनवरतरुपेणोपचीयमानो दृश्यते। वाङ्मयमिदमेवादाय-

"यदिहास्ति तदन्यत्र यन्निहास्ति न तत्क्वचित्" इत्युक्तिश्चरितार्था दृश्यते। पुरुषार्थचतुष्टय-सिद्धिरेवास्यवाङ्मयस्य चरमं लक्ष्यम्। तत्र धर्मो हि बुद्धेर्विषयः। अर्थश्च शरीरविषयः। कामस्तु मनसो विषयः भोगलक्षणः। मोक्षस्तु आत्मनो विषयः चरमनिवृत्तिलक्षणः। समस्तमपि वाङ्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि पुराणं न्यायो मीमांसा धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति। तेषाञ्च शाखाः प्रशाखाः सहस्रधा विभक्ताः। मूलतश्चत्वारो वेदाश्चतस्रो मूलसंहिता वा ऋग्यजुसामाथर्वाख्याः। सर्वधर्माणां मूलो वेदः। यथोक्तं मनुना[1] - **वेदोऽखिलो धर्ममूलम्** ।।'' वेदस्य षडङ्गानि सन्ति। पाणिनीयशिक्षायां लिखितम्[2] -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।**

ज्योतिषं वेदस्य नयनम् । भास्कराचार्येण तु ज्योतिषस्य महत्त्वमित्थं कथितम्[3]-

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**
**संयुतोपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।**

अपरिमिते गगनमण्डले यानि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव ज्योतिः शब्देनोच्यन्ते। मानवस्य सृष्टेरुत्पत्तेर्विषये जिज्ञासा स्वभाविकी अस्ति। अस्माकं पौराणिकसाहित्येषु वेदेषु चास्य विस्तृतं वर्णनं मिलति। पुराणेषु वेदेष्वपि ज्योतिश्शास्त्रस्योल्लेखोऽस्ति।

सृष्टेरुत्पत्तेः क्रमो न केवलं पौराणिकसाहित्येषु वेदेषु चापितु ज्योतिश्शास्त्रेऽपि प्राप्यते।

---

१. मनुस्मृतिः- २. ६

२. पाणिनीयशिक्षा- ४१. ४२

३. सिद्धान्तशिरोमणिः मध्यमाधिकारः- ११

सिद्धान्तज्योतिषस्यादिमे ग्रन्थे सूर्यसिद्धान्ते सृष्टिक्रमनिरूपणं वर्तते। तत्र मयासुरसूर्यांशपुरुषयोः संवादमध्ये मयासुरः सूर्यांशपुरुषात् सृष्टेर्विषयकं प्रश्नं पृच्छति। स्वप्रश्नस्योपसंहारे मयासुरः कथयति[4]-

**एवं मे संशयं छिन्धि भगवन्! भूतभावन् !**
**अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवान् ।।**

प्रत्युत्तरे सूर्यांशपुरुषः सृष्टिक्रमस्य निरूपणमेवं प्रकारेण करोति[5]-

**वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः।**
**अव्यक्तो निर्गुणः शान्तः पञ्चविंशात्परोऽव्ययः।।**

वसति विश्वमखिलमस्मिन्निति वासुः, दिव्यति स्वयमिति देवः, वासुश्चासौ देवश्चेति "वासुदेवः"। सः वासुदेवः परं ब्रह्म वर्तते। असौ सत्वरजतमरूपेभ्यो गुणत्रयेभ्यः परः, शान्तस्वरूपोऽव्यक्तश्च तथा पञ्चविंशतितत्त्वेभ्यः परः वर्तते। पञ्चविंशतिस्तत्त्वानि सांख्यदर्शने प्रसिद्धानि सन्ति। तत्र पञ्चमहाभूतानि (भू-वायु-जल-अग्नि-आकाशाख्यानि) पञ्चतन्मात्राः (गन्ध-स्पर्श-रस-रूप-शब्दाः) पञ्चज्ञानेन्द्रियाणि (नासिका-त्वक्-रसना-चक्षु-कर्णाख्यानि) पञ्चकर्मेन्द्रियाणि (हस्त-पाद-वाक्-पायु-उपस्थाख्यानि) मनः, बुद्धिः, अहंकारः, प्रकृतिः जीवश्च पञ्चविंशति तत्त्वानि सन्ति। एतेभ्यः तत्त्वेभ्यः सः वासुदेवः परं ब्रह्म परोऽस्ति।

वासुदेवस्यांशः परं पुरुषः संकर्षणनाम देवोऽयं प्रकृत्यन्तर्गतः प्रथमं सर्वतः जलानि निर्माय तत्र स्व शक्तिविशेषं स्थापितवान् । यथा [6]-

**प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः।**
**संकर्षणोऽपः सृष्ट्यादौ तासु वीर्यमवासृजत् ।।**

संकर्षणद्वारा स्थापितेन स्वशक्तिविशेषेण तत्रान्धकारेणाच्छादितं सौवर्णमण्डमेकं प्रादुरभूत्। तस्मादण्डात् सर्वप्रथमं सनातनोऽनिरुद्धो ऽभिव्यक्तोऽभवत्। [7]-

**तदण्डमभवद् हैमं सर्वत्र तमसावृतम् ।**
**तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः ।।**

अयं संकर्षणांशो भगवाननिरुद्धो वेदे हिरण्यगर्भनाम्ना ज्ञायते।[8] यथा-

**हिरण्यगर्भ समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।**

---

४. सूर्यसिद्धान्तः- १२.९

५. सूर्यसिद्धान्तः- १२.१२

६. सूर्यसिद्धान्तः- १२.१३

७. सूर्यसिद्धान्तः-१२.१४

८. ऋग्वेदः- १०.१२१.१

**स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम् ।।**

सर्वतः प्रथममभिव्यक्तत्वादयमनिरुद्धो आदित्य इत्युच्यते। जगदुत्पत्तितया अयं सूर्य इत्युच्यते। वेदे प्रसिद्धोऽयम् [९]-

**आप्राद्यावापृथिवीऽअन्तरिक्षं सूर्यऽआत्मा जगतस्तस्थुषश्च ।।**

तस्यानिरुद्धस्य नामान्तराण्यत्र कथितम्[10] -

**हिरण्यगर्भो भगवानेषच्छन्दसि पठ्यते ।**

**आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते ।।**

ज्योतिश्शास्त्रस्य सुप्रसिद्धे ग्रन्थे बृहत्पराशरहोराशास्त्रेऽपि मैत्रेयपराशरसंवादे सृष्टिक्रम-निरूपणं वर्तते। पराशरमुनिः मैत्रेयं प्रति कथयति यत् स अनादिः प्रभुः सर्वव्यापकः जगत्कारकः शुद्धः निर्गुणोऽपि भूत्वा सगुणो वर्तते। सः स्वैकांशेन जगतः सृष्टिं करोति पालयति च। तत्त्वदर्शिनः महात्मन एवास्यामृतस्वरूपात्मकं पादत्रयं जानन्ति। व्यक्ताव्यतरूपविष्णुरेव वासुदेवोऽस्ति[11]-

**एकोऽव्यक्तात्मको विष्णुरनादिः प्रभुरीश्वरः ।**

**शुद्धसत्त्वा जगत्स्वामी निर्गुणस्त्रिगुणान्वितः ।।**

**संसारसंहारकः श्रीमान्निमित्तात्मा प्रतापवान् ।**

**एकांशेन जगत्सर्वं सृजत्यवती लीलया ।।**

**त्रिपादं तस्य देवस्य ह्यमृतं तत्त्वदर्शिनः ।**

**विदन्ति तत्प्रमाणं च सप्रधानं तथैकपात् ।।**

**व्यक्ताव्यतात्मको विष्णुर्वासुदेवस्तु गीयते ।**

**यदव्यक्तात्मको विष्णुः शक्तिद्वयसमान्वितः ।।**

अस्य त्रिपादस्य वर्णनं तु वेदेऽपि प्राप्यते। इदं सम्पूर्णं जगत्तस्यांशमेकमेव[12]-

**त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।**

**ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ।।**

अमृतरूपस्यास्य त्रिपादस्योल्लेखः सूर्यसिद्धान्तेऽपि वर्तते। अस्य चतुर्थपाद एव प्रकटितः[13]-

**त्रिपादममृतं गुह्यं पादोऽस्य प्रकटोऽभवत् ।**

---

9. शुक्लयजुर्वेदः मैत्रसूक्तम्- ७

10. सूर्यसिद्धान्तः- १२.१५

11. बृहत्पराशरहोराशास्त्रम्-१.९-१२

12. ऋग्वेदः पुरुषसूक्तम्- ४

13. सूर्यसिद्धान्तः-१२.२०

**सोऽहंकारं जगत्सृष्ट्यै ब्रह्माणमसृजत् प्रभुः ।।**

प्रकाशात्मा तमो हन्ता ईश्वरोऽयं महत्तत्त्वरूपेण विख्यातो वर्तते। ऋग्वेदोऽस्य मण्डलं सामवेदो रश्मयस्तथा यजुर्वेदो मूर्तयः सन्ति। वेदत्र्यात्मकस्यास्येश्वरस्य कालाऽऽत्मा, अयं स्वयं कालस्य कर्ता प्रकाशस्वरूपश्च। सर्वत्र व्यापकात्मकेऽस्मिन् सर्वमेव प्रतिष्ठितम्[14] -

**त्रयीमयोऽयं भगवान् कालात्मा कालकृद्विभुः ।**

**सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितम् ।।**

यथोक्तं यत् तस्मादमृतस्वरूपाद् भगवतोऽहंकाररूपब्रह्मण उत्पत्तेरभवत्। बृहत्पराशरे स सत्त्वगुण-प्रधानेश्वरोऽनिरुद्धनाम्ना कथ्यते। तस्मादहंकारस्वरूपस्य ब्रह्मण उत्त्पतिरत्र कथिता[15] -

**अनिरुद्धात् स्वयं जातो ब्रह्माहंकारमूर्तिधृक् ।**

**सर्वेषु सर्वशक्तिश्च स्वशक्त्याऽधिकया युतः ।।**

अहंकारमूर्तिरूपब्रह्मा मनसि यदा सृष्टेरुत्पत्तेर्विचारमकरोत् तदा तत्र सर्वप्रथमं मनसः चन्द्रोत्पत्तेरभवत् तथा नेत्रयोः सूर्योऽजायत्[16]-

**अथ सृष्ट्यां मनश्चक्रे ब्रह्माऽहंकारमूर्तिभृत् ।**

**मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः ।।**

ऋग्वेदीयपुरुषसूक्तेऽपि मनसश्चन्द्रोत्पत्तिस्तथा नेत्रयोः सूर्यस्योत्पत्तिः कथिता[17] -

**चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत्**

अहंकाररूपो ब्रह्मा सः सात्त्विकराजसतामसभेदात् त्रिविधः। तत्र सात्त्विकाहंकाराद्देवगणाः राजसिकाहंकारादिन्द्रियाणि तथा तामसिकाहंकारात् पञ्चमहाभूतानि जातानि ।ब्रह्मणो मनसः सकाशादाकाशं समुत्पन्नम् आकाशाद् वायुः, वायुतोऽग्निः, ततोऽग्नित आपः, अद्भयो पृथ्वी, यथोक्तक्रमेण गुणमेकैक -वृद्धिक्रमेण पञ्चमहाभूतानि समुद्भूतानि। आकाशं शब्दगुणसहितं शब्द-स्पर्श-सहितगुणद्वयोपेतो वायुः शब्द-स्पर्श-रूपात्मकगुणत्रयसमेतोऽग्निः, शब्दस्पर्शरूपरसात्मकगुणचतुष्टययुतं जलं, शब्द-स्पर्शरूपरस-गन्धात्मकगुणपञ्चसमेता पृथ्वी। सूर्यादिग्रहाणामुत्पत्तिरपि पञ्चमहाभूतादेव भवति। तद्यथा-पूर्वमपि उक्तं यत् सूर्योऽग्निस्वरूपः सोमस्वरूपश्च चन्द्रः। अग्नितत्त्वात् सूर्यस्योत्पत्तिस्तथा जलतत्त्वा च्चन्द्रस्योत्पत्तिरभवत्। भौमादयः पञ्च ताराग्रहाः तेजोभूखाम्बुवायुभ्यः क्रमादुत्पन्नाः। यथा- भौमस्तेजस उत्पन्नः, भूमितो बुधो, बृहस्पतिराकाशात्, जलात् शुक्रस्तथा शनिः वायुतत्त्वादुत्पन्नोऽभवत्। पुनश्च

14. सूर्यसिद्धान्तः - १२. १८ १५.

15. बृहत्पराशरहोराशास्त्रम्-१. १७

16. सूर्यसिद्धान्तः- १२. २२

17. ऋग्वेदः पुरुषसूक्तम् - १२

ब्रह्मा आत्मानं द्वादशस्थानेषु राशिरूपेण विभजत्। मनः कल्पितं वृत्तं द्वादशभागं राशिवृत्तमकरोत्। ब्रह्मणा ब्रह्माण्डस्य विभागं कृत्वा सप्तविंशति तारात्मकानि नक्षत्राणि  निर्मितानि। यथा[18]-

**पुनर्द्वादशधाऽऽत्मानं विभजेद् राशिसंज्ञकम्** ।
**नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी** ।।

राशिग्रहनक्षत्राणां सृष्टिं कृत्वा स ब्रह्मा श्रेष्ठमध्याधमेभ्यः स्रोतोभ्यः सत्त्व-रजस्तमोविभेदात्मकः प्रकृतीः सृजन् देवमनुष्यदानवपशुपक्षिवृक्षलतादिकं विश्वं चेतनाचेतनात्मकं जगतः कृतवान्। पञ्च-महाभूतानां यदा सत्त्वगुणेन सह संयोगोऽभवत् तदा तत्र उत्तमा सृष्टिः जाता। यदा पञ्चमहाभूतानां रजगुणेन सह संयोगोऽभवत् तदा तत्र मध्यमा सृष्टिः जाता। तमगुणेन सह संयोगेन तत्र अधमा सृष्टि उत्पन्ना अभवत्। तदनन्तरं गुणकर्मविभागानुसारं पूर्वकल्पोक्त विधिना चराचरात्मकं सृष्टेः रचना कृत्वा वेदोक्त मार्गानुसारं ब्रह्मा राशिग्रहनक्षत्राणां तथा देवासुरमनुष्याणां सिद्धानां च यथाक्रमं विभागम् अकरोत्। इत्यलम् ।

।। ॐ ॐ ॐ ।।

18. सूर्यसिद्धान्तः-    १२. २५

# वक्री ग्रहरहस्यम्

**ब्रजेशपाठकः***

*सहायकाचार्यः (अतिथिः),
ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, शृङ्गेरी- (कर्णाटकराज्यम्)

वक्रगाः ग्रहाः ज्योतिर्विदानां कृते रहस्यमयाः। अनेनैव वक्रग्रहाणां फलकथने विद्वांसः ज्योतिर्विदः अपि काठिन्यमनुभवन्ति। ज्यौतिषग्रन्थेष्वपि एतद्विषये एकत्रैव सर्वं सुस्पष्टं वा वर्णनं न प्राप्यते। संभवतः वक्रग्रहाणां चित्रफलजननत्वं अतारतम्यत्वञ्चास्य कारणम्।

अस्तु! अस्मिन् विषये ज्ञानवर्धनार्थं शास्त्रसिद्धानामनुभवसिद्धानाञ्च संकलित-पंक्तीनाम् आधारेण वक्रग्रहाणां फलस्य पटाक्षेपं कुर्मः।

वक्रग्रहाः चेष्टाबलयुतत्वात् पृथ्वीतः निकटस्थत्वाच्चात्यंतबलशालिनो भवन्ति। पुनश्च निजप्रवर्तितकिरणैरन्तर्निहितोर्जास्पन्दनाभ्याञ्चाधिकं प्रभावं जनयन्ति। वक्रगाः ग्रहाः बान्धवेषु सौहार्द्रस्य न्यूनतां हानिं वा प्रदर्शयन्ति, यथा- कुजोऽनुजकारकोऽस्ति, बुधो मातृपक्षीयकुटुम्बीनां कारको, गुरुः सन्तानकारकोऽग्रजस्य च कारकः, शुक्रो दाराकारको, मन्दस्तु भृत्यकारकोऽस्ति। यदि एते ग्रहाः वक्रगत्वे सति ग्रहकारकत्वेन सम्बन्धितभावेन भावेशेन वा सह जातसम्बन्धास्तदा जातको निश्चितमेव हानिं प्राप्नोति। यदा कोऽपि ग्रहो वक्रगो भवति चेत् तदा स तु निजनैसर्गिककारकत्वे भावकारकत्वे च न्यूनतां, चिरतां, हानिं विकृतिमांशिकखण्डनं चावश्यमेव करोति। वक्रिग्रहः निजकारकत्वस्य विशिष्टपक्षं प्रदर्शयति किन्तु प्रायः चिरतां बाधां निराशां च ददाति। सर्वप्रथमं तु वक्रग्रहाणां फलकथनोपयोगीनां शास्त्रप्रमाणानामोल्लेखं क्रियते -

**वक्री स्वोच्चबलः सवक्रसहिते मध्यं बलं तुङ्गभे।**
**वक्री नीचबलः स्वनीचभवने वक्री बलं तुङ्गजम्।।**[1]

अर्थात् वक्रिणः ग्रहस्य बलं उच्चस्थवदेव वक्तव्यम्। यदि कोऽपि ग्रहो वक्रगेन सह तिष्ठति चेत्तदा तस्यार्धं बलं वक्रग्रहोऽपहरति। यदि कोऽपि वक्रिग्रह उच्चस्थोऽस्ति स तु नीचस्थवदेव फलं करोति तथा च यदि वक्रिग्रहो नीचस्थश्चेत् स तु उच्चराशिस्थ इव फलं जनयति।

**वक्रगो उच्चगो वा महाबली।**[2]

अर्थात् उच्चस्थो वा वक्रगो वा ग्रहो महाबली भवति ।

---

1. Uttara Kalamrita, Chapter-2, Shloka-6, Page-30, P.S. Shastri, Ranjan Publications, Delhi
2. जातकतत्वम्, संज्ञातत्त्वम्, कारिका-७०, पृष्ठ-१८, श्रीनिवास शर्मा, श्रीभुवनेश्वरी यन्त्रालय, रतलाम, १९१५

**शुभा वक्रगा राज्यार्थदाः पापा व्यसनहानिदाः।**[3]

अर्थात् शुभा वक्रगाः ग्रहा राज्यदाः धनदाश्च भवन्ति परं वक्रगाः पापग्रहाः हानिदाः व्यसनदाश्च भवन्ति।

**वक्रस्य पाके स्थानमानसौख्याद्यपचयः।**[4]

अर्थात् वक्रग्रहाणां दशान्तर्दशायां जातकः स्थानभ्रष्टः, पदभ्रष्टः, सुखभ्रष्टः, मानभ्रष्टश्च भवति।

**वक्रिणस्तु महावीर्याः शुभा राज्यप्रदा ग्रहाः।**
**पापा व्यसनदाः पुंसां कुर्वन्ति च वृथाटनम्।।**[5]

अर्थात् वक्राः शुभग्रहा अतिशुभत्वात् जातकानां शुभफलप्रदा राज्यप्रदाश्च भवन्ति। वक्राः पापाः जातकानां वृथाटनकारकाः व्यसनदाश्च भवन्ति।

**वक्रोपगस्य हि दशा भ्रमयति च कुलालचक्रवत् पुरुषम् ।**
**व्यसनानि रिपुविरोधं करोति पापस्य न शुभस्य ।।**[6]

अर्थात् वक्रिग्रहस्य पाके जातकः कुलाकुलचक्रवत् परिभ्रमति। वक्रिग्रहः स्वस्यदशायां रिपुविरोधं, व्यसनानि च करोति। एतत् सर्वं फलं वक्रिपापग्रहस्यपाके भवति न तु वक्रिशुभग्रहस्य पाके।

**क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः।** [7]

अर्थात् वक्रिणः पापग्रहा अतिक्रूरफलप्रदातारो भवन्ति एवञ्च वक्रिणः शुभग्रहा अतिशुभ-फलप्रदातारश्च।

**तदा योगो भवेत्तत्र विबलो नैव योऽसकृत् ।**
**शत्रुयुक्तेक्षितौ पापवीक्षितौ नैव योगकृत् ।।**[8]
**व्ययमृत्युषड्स्थौ च द्वावेव समसंयुतौ ।**
**राजामात्यादि योगानां वक्रगौ नाशकारकौ ।।**[9]

अर्थात् यदि योगकारको ग्रहः षड्बलहीनो वा शत्रुग्रहैर्युक्तो  दृष्टो वाथवा त्रिकभावेन कृतसम्बन्धो भवति  अथवा योगकारकग्रहाणां मिथः अंशात्मिकायुतिर्भवति अथवा योगकारको ग्रहो वक्री भवति चेत् स ग्रहः राजयोगे अमात्ययोगे वा बाधां करोति।

रोगविचारप्रसङ्गेऽपि वक्रिग्रहाणां महती भूमिका भवति।

3. जातकतत्वम्, प्रकीर्णतत्त्वम्, कारिका-१००, पृष्ठ-३३४, श्रीनिवास शर्मा, श्रीभुवनेश्वरी यन्त्रालय, रतलाम, १९१५
4. जातकतत्वम्, दशातत्त्वम्, कारिका-१५, पृष्ठ-३४८, श्रीनिवास शर्मा, श्रीभुवनेश्वरी यन्त्रालय, रतलाम, १९१५
5. सारावली, अ.५ श्लो.३९, पृष्ठ-५१, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
6. सारावली, अ.४१ श्लो.६८, पृष्ठ-३७१, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
7. ज्योतिषतत्वप्रकाश अ.२ श्लो.९०, पृष्ठ-७०, पं.लक्ष्मीकान्त कन्याल, मोतीलाल बनारसीदास दिल्ली, १९९०
8. बृहत्पाराशरहोराशास्त्रम्, अ.३६ श्लो.७, पृष्ठ-२७६, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली
9. बृहत्पाराशरहोराशास्त्रम्, अ.३६ श्लो.८, पृष्ठ-२७६, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली

**रिपुसदनपतौ चेद्वक्रितर्क्षेऽक्षिरोगं**
**तनुसदनगतेऽस्मिन्मन्ददृष्टे कफात्मा।**
**धरणिज इह जीवे भार्गवे ज्ञे सचन्द्रे**
**परितपनजशोकात्कामतः शस्त्रतो वा।।**[10]

अर्थात् यदि षष्ठेशः वक्रग्रहस्य राशौ संस्थितश्चेत् जातको नेत्ररोगी भवति। लग्ने षष्ठेशो यदि शनिदृष्टश्चेत्तदा जातकः कफप्रकृतिको भवति। एवमेव कुजेन, बृहस्पतिना, शुक्रेण, बुधेनाथवा चन्द्रेण युक्ते षष्ठेशे जातकः परितपनेनोत्पन्नशोकेन, कामविकारेण, शस्त्रेण वा नेत्ररोगी भवति।

वक्रगाः द्वितीये, चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे, एकादशे च भावे आरोग्यकारकाः भवन्ति। तृतीये, षष्ठे, अष्टमे, द्वादशे च भावे अशुभकारकाः भवन्ति। अष्टमस्थो वक्री अल्पायुःकारकोऽपि भवति। वक्रिग्रहा आयुष्यलाभं (स्वतुङ्गवक्रोपगतैस्त्रिसंगुणो....)[11] तु करोत्येव परन्तु स्वास्थ्यहानिं चापि करोति।

आप्तवचनम् - भारतवर्षस्य मूर्धन्यविदुषां पदवाक्यप्रमाणपारावारीणां ज्योतिर्विदां डॉ० विष्वक्सेनाचार्याणां (अस्मद्गगुरूणां) वक्रिग्रहफलसन्दर्भे कथनम् - अतिक्रान्तपरमोच्चांशो वक्रिग्रहो निश्चितेनैव शुभफलं प्रदास्यति, किन्तु अप्राप्तपरमोच्चांशो वक्रिग्रहः अशुभकारक एव।

**अत्र पाठकैः बिन्दुद्वयं ध्यातव्यम् -**

प्रथमस्तु ग्रहाणां शुभाशुभस्य विचारसमये न तु केवलं तेषां नैसर्गिकशुभाशुभत्वं द्रष्टव्यमपितु पराशरीयनियमानुसारं तेषां लग्नजन्यशुभाशुभत्वमपि विचारणीयम् ।

द्वितीयस्तु उच्चस्थो ग्रहः केवलं शुभफलं ददाति एवं नीचस्थो ग्रहः सर्वदाऽशुभफलं ददातीति भ्रमः सर्वथा त्याज्यः। यतो हि उच्चस्थसूर्य उग्रस्वभावकारक[12] उच्चस्थमंगलः कुपुत्राभिमान दुःसाहसप्रवासकारक[13]उच्चस्थगुरुः चतुरस्वभावकारक[14] उच्चस्थः शुक्रो विलासकारक[15] उच्चस्थशनिः कुभार्यावन्यान्नकारक[16] इति उच्चस्थानां ग्रहाणामशुभानि फलानि शास्त्रोक्तानि तथा नीचस्थौ सूर्यभार्गवौ दासवृत्तिप्रदायकौ ।[17]

मदनुभवः - ग्रहाः स्वकीयं किमपि फलं न त्यजन्ति अपितु सर्वमेवफलं ददति। यदि कोऽपि ग्रहः षष्टिप्रतिशतं शुभं वर्तते तथा ४०% अशुभं वर्तते तदानीं सः निश्चितमेव ६०% शुभफलं एवञ्च

10. शम्भुहोराप्रकाश, अ.१४ श्लो.६६ पृष्ठ-२३९, महीधर शर्मा, गंगाविष्णु श्रीकृष्णदास, लक्ष्मीवेङ्कटेश्वर प्रेस, बम्बई, १९३७.
11. जातक पारिजात अ.५ श्लो.१९, पृष्ठ-१६४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, २००९
12. सारावली, अ.४५ श्लो.१, पृष्ठ-३८४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
13. सारावली, अ.४५ श्लो.२, पृष्ठ-३८४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
14. जातकपारिजातः अ.८ श्लो.१००, पृष्ठ-२८१, श्रीकपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान वाराणसी, १९९२
15. सारावली, अ.४५ श्लो.३, पृष्ठ-३८४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
16. सारावली, अ.४५ श्लो.४, पृष्ठ-३८४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६
17. सारावली, अ.४५ श्लो.१५ & १८, पृष्ठ-३८६, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६

चत्वारिंशत्प्रतिशतमशुभफलं दास्यत्येवं निश्चप्रचम्।

सर्वे वक्रगाः ग्रहाः निजदशायां अस्थिरताबाधास्थानपरिवर्तनचिन्तादीन् विविधान् अशुभप्रभावान् अवश्यमेव प्रददति। यदि वक्री ग्रहः चरराशिस्थः अथवा शनैचरस्य कल्याणी (साढेसाती) लघुकल्याणी (ढैया) वा चलन्ती अस्ति तदा ग्रहो वैशिष्ट्येन निजोत्कटप्रभावान् प्रदर्शयति। एतत्तु वक्रग्रहाणां सर्वसामान्यं फलम्।

यस्य भावस्य भावेशः वक्री भवति तद्भावसंबन्धितमशुभफलं जातकः प्राप्नोति। यथा- लग्नेशो यदि वक्री भवति चेत् जातकस्य दिनचर्याऽव्यवस्थिता भवति अनेन स्वास्थ्यहानिश्च भवति । ईदृशमेव यदि द्वितीयेशो वक्री भवति चेत् जातकः कुत्सितान्नभक्षी, रोगी, दुर्बलोऽपथ्यसेवी बहुधनव्ययी च भवति।

यदि कस्यचिज्जातकस्य कुण्डल्यामेकाधिकाः ग्रहाः वक्रगाः भवन्ति तदा योऽधिकांशगतः सैव ग्रहोऽधिकप्रभावशाली भवति।

वक्रिग्रहप्रसङ्गे नीचस्थो वक्रिग्रह उच्चवदेव फलं जनयतीति सर्वाधिका प्रचलिता भ्रान्ति। परमत्र प्रस्तुतैः शास्त्रप्रमाणैः सुस्पष्टं यद्यदा कोऽपि वक्रिग्रहो नीचस्थस्तदा स तु वक्रिग्रहोचितानि सर्वसामान्यफलानि तु ददात्येव तथा यदि स पापग्रहोऽस्ति तदा स उच्चस्थवत् पापफलानि प्रदास्यति। ईदृशमेव यदि कोऽपि वक्रिशुभग्रहो नीचस्थश्चेत् स तु वक्रिग्रहोचितसर्वसामान्यफलैः सह उच्चस्थवदेव शुभफलानि प्रदास्यति। इत्थमुच्चराशिस्थानां पापानां शुभानां च वक्रिगहाणां फलं ज्ञातव्यम्। अत्रेदं ध्यातव्यं यत् नीचपरमांशगतस्य परमोच्चांशगतस्य वा वक्रिणः शुभाशुभयो- रधिकता न्यूनता च प्रदृश्यते।

उदाहरणकुण्डलीद्वारा विवेचनम्

जन्मविवरणम् - दिनाङ्कः - २८/०९/१९९८,

समयः - १८:३०, स्थानम् - Lohardaga.

अस्य जातकस्य लग्नकुण्डल्यां द्वितीये भावे शनिः वक्री सन् नीचस्थोप्यस्ति। ३०/०८/२०१४ इत्यतः ३०/१०/२०१७ पर्यन्तमस्य जातकस्य शुक्रमहादशायां शनैरन्तर्दशा जायमाना आसीत्। धनुराशिस्थे चन्द्रे उत्पन्नत्वात् तदानींतने एवं काले जातकस्यास्य शनैः कल्याणी (साढेसाती) अपि जायमाना आसीत्। जातकः वक्रिणः शनैर्दशाकाले सर्वसामान्यं वक्र्युचितं फलं प्राप्तवानेव तथा च चरराशिस्थवक्रत्वात् कल्याणीदशायाश्च प्रभावात् जातकः इतस्ततः व्यर्थमेव अटितवान्। उच्चशिक्षार्थं अस्य पितृभ्यां बहुना परिश्रमेण प्रयासेन च उच्चसंस्थाने नामांकनं कृतम्। परन्तु ततोप्येषः पलायनं कृतवान्। ततो बारं बारं गृहमपि त्यक्तवान् एतदर्थं आरक्षीकार्यालये प्रतिवेदनपत्रं च दत्तम्। समस्तबान्धवाः दुःखिता आसन्। तदानींतने काले जातकस्य जीवने कलहं, व्यग्रतां, व्यर्थाटनं च विहाय किमपि नासीत्। अस्य जातकस्य कुण्डल्यां वक्री शनिः नीचस्थोऽस्ति अत एव शनिः उच्चस्थवत् फलं दास्यति तथा

च शनिः पापग्रहोऽप्यस्ति (पाराशरीयनियमानुसारं मीनलग्नस्य कृते शनिः पापग्रहोऽस्ति)। अतएव उच्चस्थानुसारमशुभं फलमपि दास्यति। अत्रोच्चस्थस्य शनेरशुभं फलं द्रष्टव्यम् -

**स्वोच्चस्थो रवितनयो नृपलब्धनियोगमभिजनयेत् ।**
**ग्रामपुराधिपतित्वमरण्यकधान्यं कुनारिलाभं च ।।**[18]

उच्चस्थस्य शनैश्चरस्य वन्यभोजनं कुत्सितानारीलाभश्चेति अत्यन्ताशुभे फले उक्ते। एषः जातक उक्तदशायां निजकुलान्निकृष्टकुले जातया स्त्रिया सह व्यभिचाराय अपयशस्कं च प्राप्तवान् कुपथ्यसेवनाच्चर्मरोगेण चाक्रान्तोऽभूत्। अत्रेदं द्रष्टव्यम् यत् शनिः परमोच्चांशप्राप्तेः पूर्वमेव वक्रत्वमापन्नः अन्यथा कुलटया स्त्रिया सह विवाहं तथा कुपथ्यसेवनादङ्गहानिरथवा असाध्यरोगेणाक्रान्तः जातको भवेदित्यादयोऽशुभानामाशंका आसीदेव।

एवमेव विद्वान् दैवज्ञः शास्त्रपंक्त्याश्रयेण सम्यग्विचिन्त्यैव उहापोहपूर्वकं वक्रिग्रहाणां फलकथनं कुर्यात्। अनेन शास्त्रसंरक्षणस्यास्माकं निर्मलापरम्परा निर्बाधगतिना संसरतेतराम्।

## अल्पायुषः विषये युधिष्ठिरं प्रति भीष्मोक्तिः-

ये नास्तिका निक्रियाश्च गुरुशास्त्राभिलंघिनः।
अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः।।
विशीला भिन्नमर्यादा नित्यं सङ्कीर्णमैथुनाः।
अल्पायुषो भवन्तीह नरा निरयगामिनः।।
अक्रोधनः सत्यवादी भूतानामविहिंसकः।
अनुसूयुरजिह्माश्च शतवर्षाणि जीवति।।

18. सारावली अ.४५ श्लो.४, पृष्ठ-३८४, डॉ.सुरेशचन्द्र मिश्र, रंजन पब्लिकेशन्स दिल्ली, १९९६

# ज्योतिषशास्त्रदृष्ट्या गर्भाधानविमर्शः

**अङ्कितकुमारमिश्रः**
शोधच्छात्रः
केन्द्रीय-संस्कृत-विश्वविद्यालयः
लखनऊ परिसरः
Email- mishraankit438@gmail.com

मानवजीवने जन्मकालादारभ्य मृत्युकालपर्यन्तं यत्किमपि वा वेदविहितं कर्तव्याऽकर्तव्यं भवति तद् सर्वं अस्माकं शास्त्रेषु वेदवेदाङ्गेषु पुराणादिषु च निबद्धं वर्तते। तेषु वेदाङ्गेषु ज्योतिषशास्त्रं वेदस्य नेत्रत्वेन तिष्ठिति यथोक्तमपि वर्तते-

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं**
**मुख्यताचाङ्गमध्येस्य तेनोच्यते**
**संयुतोपीतरैः कर्णनासादिभिः**
**चक्षुषाङ्गेनहीनो न किञ्चित्करः।।1**

वेदाङ्गस्य षट्स्वङ्गेषु ज्योतिषशास्त्रस्य महत्वं अनेनैव स्पष्टमस्ति यत् जीवनस्य प्रत्येकस्याऽपि अङ्गस्य वर्णनं ज्योतिषशास्त्रे प्राप्यते।

अस्माकं वैदिकपरम्परायां मानवजीवने संस्काराणां महत्त्व नितरां वरीवर्त्ति। संस्कारहीनो न पुनन्तिवेदाः इत्यस्माकं शास्त्रेष्वपि उल्लिखितो वर्त्तते। तत्र विविधाचार्याणां मतेन संस्कारेषु संख्याभेदो वर्त्तते यथा आचार्यगौतमः आहत्य अष्टचत्वारिंशत् चत्वारिंशत् वा संस्काराः आमनन्ति तद्यथा-

गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्म नामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणीचैत्रीआश्वि युजीति सप्त पाकसंस्थाः, अग्न्याधानमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्यग्रयणेष्टिर्निरूढ पशुबन्धः सौत्रामणीति सप्त हविर्गृहयज्ञसंस्थाः, अग्निष्टोमोऽत्यग्निष्टोम उक्तः षोडशीवाजपेयोऽतिरात्रोर्याम इति सप्त सोमयज्ञासंस्था इत्येते चत्वारिंशत्संस्काराः।i

एवमेव अन्येपि कथयन्ति परन्तु सामान्यरूपेण अस्माकं मनुस्मृत्यादिस्मृतिग्रन्थेषु षोडशसंस्काराः एव प्रामुख्येन स्वीकृताः सन्ति। तद्यथा– गर्भाधान-पुंसवन – सीमन्तोन्नयन – जातकर्म – नामकरण – निष्क्रमण – अन्नप्राशन – कर्णवेध - यज्ञोपवीत(व्रतबन्धः) – वेदारम्भ – केशान्त – समावर्तन – पाणिग्रहण – अन्त्येष्टिश्चेति । एतेषां संस्काराणां मानवजीवने नितान्तं महत्वं वर्तते। वेदविहितविधिना यदा संस्काराः क्रियन्ते चेत नूनमेव तस्य व्यक्तेः सर्वविधविकासः अभ्युदयादेः प्राप्तिर्भविष्यति। तेषु प्रथमः संस्कारः वर्तते गर्भाधानसंस्कारः। गर्भाधानसंस्कारः सन्तानप्राप्त्यर्थं भवति। तस्मात् सः पुत्रः पितरं नरकात् त्राययति। यथोच्यते-

**पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।**
**तस्मात्पुत्र इति प्रोक्तः पितृन् यः पाति सर्वदा।।ii**

एतत्तु आमुष्मिकं फलम् उक्तं महाभारते ऐहिकमप्युच्यते। यथा-

**इष्टं दत्तमधीतं च यज्ञाश्चबहुदक्षिणाः**
**सर्वमेतदपत्यस्य कलां नार्हन्ति षोडशीम्।।**
**व्रतोपवासैर्बहुभिः कृतं भवति भीष्म यत्।**
**सर्वं तदनपत्यस्य मोघं भवति निश्चितम्।।iii**

अनेनैव स्पष्टं भवति यत् पुत्रं विना सर्वविधव्रतोपवासाद्याः निष्फलाः भवन्ति। अत्र पुत्रशब्देन पुत्रीपुत्रयोः उभावपि ग्रहणमिति।

गर्भाधानविषये ज्योतिषशास्त्रे द्विविधविचारः वर्त्तते एकं तु मुहूर्त्तदृष्ट्या अपरं तस्य फलदृष्ट्या। तस्मादेव सुखेनगर्भधारणार्थं मुहूर्त्तानां वर्णनं विद्यते एवञ्च होरास्कन्धेपि गर्भधारणविषये वृहद्रूपेण तस्य शुभाशुभत्वादि विषये प्रतिपादितं वर्त्तते। गर्भाधानं तु रजस्वलास्त्र्याधीनः अस्ति। अतैव भारद्वाजसंहितायां उक्तं वर्तते यत्-

**रजस्वला यदा नारी उक्तं स्याद् गर्भधारणे।**
**ततः कुर्वीत तत्सङ्गं गर्भार्थं बुद्धिमान्नरः।।iv**

स्पष्टमस्ति यत् यदा स्त्री रजस्वला भवति तदैव सा गर्भधारणार्थं योग्या भवति । तस्मिन्नेव काले शास्त्रोक्तविधिना सन्तानप्राप्त्यर्थं स्त्रीसङ्गः करणीयमिति। अतैव सर्वादौ रजोदर्शनस्य शुभाशुभत्वं विचारणीयं भवति। यतोहि अशुभरजोदर्शने गर्भाधानमपि अशुभमेव शुभत्वे शुभमिति।

**प्रथमरजोदर्शनविचारः-**

आचार्यः श्री केशवदैवज्ञः मुहूर्त्ततत्वे रजोदर्शनस्य निन्द्यत्व विषये वदन्ति यत्-

**रिक्तादर्शाष्टषष्टीहरितिथिषु मधौभाद्रशूच्युर्जपौषे।**
**मूलक्षिप्रध्रुवर्क्षानलमृदुचरतोन्येषु पापद्युलग्ने ।।**
**स्त्रीणामाद्यं रजोसद्विसितवसनके पापयोगे च विष्ट्यां**
**सन्ध्या सूपप्लवेथा क्षततिलसुघृतैर्दूर्वयेज्याऽत्रदेव्या ।।v**

यदा रिक्तातिथिः (चतुर्थी-नवमी-द्वादशी) अमावस्या,अष्टमी,षष्टी,द्वादशी तिथिः एवञ्च मासेषु चैत्र-भाद्रपद-आषाढ़-कार्तिक-पौषमासं च नक्षत्रेषु ध्रुवसंज्ञकनक्षत्राणि (उत्तराफाल्गुनी, उत्तराषाढ़ा- उत्तराभाद्रपद- रोहिणी च) मृदुसंज्ञकक्षत्राणि (मृगशिरा, चित्रा, अनुराधा, रेवती च) चरसंज्ञकनक्षत्राणि (स्वाती-पुनर्वसुः,श्रवणः,धनिष्ठा,शतभिषः) कृत्तिकाञ्च विहाय अन्येषु नक्षत्रेषु शुभग्रहाणां दिनानि लग्नानि च विहाय यदा रजोदर्शनं भवति तदा अशुभः इति। एवञ्च पापयोगेषु विष्टिकरणे, संध्याकालग्रहणवेलायामपि प्रथमरजोदर्शनमशुभमिति।

तदेव मुहूर्त्तकल्पद्रुमे आचार्यः वदन्ति यत्-

**वैशाखमार्गाश्विनमाघशुक्रे नभस्तपस्ये प्रथमार्त्तवं सत्।**
**रिक्ताष्टदर्शनषडाद्यहीने तिथौ सिते ज्ञेज्यसितेन्दुवारे।।**
**मिश्रोग्रतीक्ष्णोज्झितभे प्रशस्तं दिवा च पौष्णेऽदितिभे च मध्यम्।**
**निन्द्यं कुयोगे परमन्दिरे च निन्द्ये स्थले सङ्क्रमणे कुलग्ने।।**
**सन्ध्यायां ग्रहणे श्राद्धे वस्त्रे श्वेते नवेतरे।**
**गदेरक्तेऽल्पबहुले निद्राभद्रासु नो शुभम्।।vi**

मुहूर्त्तचिन्तामणावपि प्रथमरजोदर्शनस्य तत्र पृथक्तया मासनक्षत्रादिभेदेन रजोदर्शने शुभाशुभत्वं प्रतिपादितं वर्त्तते।

**आद्यं रजः शुभं माघमार्गराधेषफाल्गुने।**
**ज्येष्ठश्रवणयोः शुक्ले सद्वारे सत्तनौ दिवा ।।vii**

स्पष्टमस्ति यत् प्रथमरजोदर्शनं माघमार्गशीर्षवैशाखाश्विनफाल्गुनज्येष्ठश्रावण मासेषु शुभमिति।

प्रथमरजोदर्शनेशुभनक्षत्राणि-

**श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौ सिताम्बरे।**
**मध्यं च मूलादितिभे पितृमिश्रे परेष्वसत्।।viii**

श्रुतित्रयं इत्युक्ते श्रवणधनिष्ठाशतभिषाः, मृदुक्षिप्रध्रुवसंज्ञकनक्षत्राणि इत्युक्ते चित्रानुराधामृगरेवत्यश्विनीपुष्यहस्तरोहिण्युत्तराषाढोत्तराफाल्गुन्योत्तराभाद्रपदा रेवत्यां च श्वेतवस्त्रे प्रथमरजोशदर्शनं शुभं भवति मूलपुनर्वसुमघाविशाखाकृत्तिकायाञ्च मध्यमः एवञ्च भरणी- आर्द्राश्लेषा-पूर्वाफाल्गुनीज्येष्ठा पूर्वाषाढा पूर्वाभाद्रपदेषु निन्द्यमिति। एवमेवप्रकारेण रजोदर्शनात्परं कदा स्नानादिकं कर्त्तव्यं तस्यापि विचारः मुहूर्त्तग्रन्थेषु विद्यते। यतोहि तस्यापि महत्त्वं गर्भधारणे भवति। यथोक्तमपि वर्त्तते-

**हस्तानिलाश्विमृगमात्रवसुध्रुवाख्यैः**
**शक्रान्वितैः शुभतिथौ शुभवासरे च।**
**स्नायादथार्तववती मृगपौष्णवायु-**
**र्हस्ताश्विधातृभिररं लभते च गर्भम्।।ix**

हस्तस्वात्याश्विनीधनिष्ठानुराधामृगारोहिण्युत्तरात्रयज्येष्ठायां शुभतिथौ इत्युक्ते द्वितीया-तृतीया-पञ्चमी-सप्तम्येकादशी-द्वादशी-त्रयोदश्यां चन्द्रबुधगुरुशुक्रवासरे च रजस्वलास्त्रीणां स्नानं शुभं भवति।

**मुहूर्त्तमञ्जीरे अपि-**

**मृगान्त्याश्विनी हस्त चित्रानुराधा समीरोत्तरारोहिणी वासवेन्द्रे।**
**शुभायां तिथौ शोभनाहे मृगाक्ष्या रजो दर्शने तुर्यवारेभिषेकः।।x**

**केचित्तु अन्यथा वारफलमुच्यते-**

**स्नाता प्रसूताऽप्यसुताबुधेन स्नाता च वन्ध्या भृगुनन्दनेन।**

**सौरे मृतिः क्षीरहतिस्तु सोमे पुत्रार्थलाभो रविजीवभौमे।।xi**

इत्युक्ते बुधेस्नाता स्त्री असुता भवति शुक्रेस्नाता वन्ध्या, शनौ मृतिः सोमे क्षीरहतिः रविजीवभौमेषु पुत्रार्थलाभो भवति। अत्र मुहूर्तचिन्ताणिः मुहूर्त्तगणपत्यादि ग्रन्थोक्तं यत् मतं तस्मात् साक्षात् वैपरीत्यमिति।

**गर्भाधानमुहूर्त्तविचारः-**

गर्भाधानार्थं को मुहूर्त्तः श्रेष्ठः कश्च हीनः इत्यस्य ज्ञानं यावत् न भविष्यति तावत् सन्तानप्राप्तिरपि सम्यक्तया भवितुं नार्हति तस्मादत्र गर्भाधानमुहूर्त्तविचारः ज्योतिषशास्त्रदृष्ट्या उपस्थाप्यते-

**गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं**

**दास्त्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम्।**

**पित्रोः श्राद्धदिनं दिवा परिघाद्यर्धं स्वपत्नीगमे**

**भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम्।।xii**

अत्र आचार्यः गर्भाधाने निषिद्धानि नक्षत्रादीनां विषये वदन्ति यत्- गर्भाधानार्थं त्रिविधगण्डान्तं (तिथि-नक्षत्र-लग्नगण्डान्तं) निधनर्क्षं इत्युक्ते जन्मर्क्षात् सप्तमो नक्षत्रः जन्मर्क्षः इत्युक्ते सप्तम-दशम-षोडश-एकोनविंशः-पञ्चविंशतितमः नक्षत्रः, मूलाश्विनी मघा रेवती भरणी च निषिद्धाः ग्रहणकालः,व्यतिपातवैधृतियोगश्च पितृणां श्राद्धदिनं, दिवाकालः, परिघयोगः पूर्वार्द्धोत्पातेनदूषितानि नक्षत्राणि, जन्मराश्यादष्टमराशेः लग्नं पपाग्रहाणां च लग्नमित्यादीनि गर्भाधाने त्याज्यानि। पुनरुच्यते यत्-

**भद्राषष्ठीपर्वरिक्ताश्च सन्ध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः।**

**गर्भाधानं त्र्युत्तकेन्द्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत्।।xiii**

भद्रा,पर्वतिथयः,रिक्तातिथिः (चतुर्थी-नवमी-चतुर्दशी) सन्ध्याकालः, भौमार्कार्किवारः ऋतुदर्शनात् परं चतस्रः दिवसाः अपि गर्भाधाने त्याज्याः। एवञ्च त्र्युत्तराः (उत्तराभाद्रपदः, उत्तराषाढ़ा, उत्तराफाल्गुनी) मृगहस्तानुराधारोहिणीस्वातिश्रवणधनिष्ठाशततारकासु गर्भाधानं शुभमित्युच्यते।

पर्वदिनेषु स्त्रीसंगमनिषेधविषये उत्तरकालामृतेप्युक्तं वर्त्तते महाकविना-

**पुंसोनैव सुहृदाग्विवाहपरतस्तद्योग पद्ये क्रमात्**

**पुत्रैवाप्यथवा तु जन्मदिवसे श्राद्धे च पर्वस्वपि।**

**संगच्छेदवगाहनं सवसनं कार्यं तिलैर्वर्जयेत्**

**प्रेतप्रेक्षणमप्यपूर्वनगतीर्थामर्त्यसेवामपि।।xiv**

स्पष्टमस्ति यत् सद्यः विवाहदम्पतिना यजनदिने, जन्मदिवसे, श्राद्धदिने, पर्वस्वपि अमावस्या संक्रान्ति वा पर्वणि स्त्रीसङ्गो निषिद्धः।

मुहूर्त्तमञ्जीरग्रन्थेपि आचार्येण उक्तं वर्त्तते-

**उत्तरार्क मृगमित्रमारुते रोहिणी श्रवणयुग्मवारुणे।**

**केन्द्रकोणभवने शुभेखले शत्रुलाभसहजे रतिः शुभा।।xv**

उत्तराहस्तमृगशिरोनुराधा स्वाती रोहिणी श्रवणधनिष्ठा शतभिषर्क्षु एकादशसु गर्भाधानं शुभम्। अत्र मैत्रस्थाने मित्र शब्दः ग्राह्यः अन्यथा चित्रा रेवत्योः संदेहो भवति।

गर्भाधानस्य शुभमूहूर्त्तविषये मुहूर्त्तगणपतौ आचार्यगणपतिः उच्यते यत्-

**स्वातौ हस्तेऽनुराधायां रोहिण्यां वा श्रवत्रये।**

**त्र्युत्तरे मृगशीर्षे च शुभाहे समरात्रिषु ।**

**गर्भाधानं प्रशस्तं स्याच्छस्ते चन्द्रे युगांशगे।।xvi**

त्र्युत्तरानुराधास्वातीहस्तश्रवणरोहिणी शतभिषा मृगशिरर्क्षे शुभवारेषु रजोदर्शनात्समरात्रौ समांशे च शुभस्थिते चन्द्रे सति गर्भाधानं शुभं भवतीति शास्त्राज्ञा। तत्र गर्भाधाने मध्यमनक्षात्राणामपि चर्चा विहिता वर्त्तते तद्यथा-

**चित्रापुनर्वसौपुष्ये अश्विन्यां मध्यमं स्मृतम्।xvii**

स्पष्टमस्ति यत् चित्रा पुनर्वसुः पुष्याश्विन्यां च गर्भाधानं मध्यमः इति। अतः मध्यमनक्षत्रेष्वपि स्त्रीसङ्गः भवितुमर्हति।

गर्भधारणे स्त्रीणां चन्द्रशुद्धिः नूनमेव विचारणीयम् यतोहि यावत् चन्द्रशुद्धिर्नभविष्यति तावत् गर्भाधारणमपि सम्यक् भवितुं नार्हति। गर्भाधानकाले वैशिष्ट्यं अस्ति यत् अत्र गुरुशुक्रास्तमलमासादीनां दोषो न भवति । यथोक्तमपि वर्त्तते-

**विवाहेगर्भसंस्कारे चन्द्रशुद्धिः स्त्रियांमपि**

**भूपाम्बरादिकार्येषु भर्त्तुश्चैवेन्दवं बलम्।।**

**गर्भादानादिसंस्कारे तथान्नप्राशने शिशोः।**

**न तत्र गुरुशुक्रास्तमलमासादिदूषणम्।।xviii**

मुहूर्त्तमञ्जीरग्रन्थे आचार्यः श्रीमद्रामसेवकः वदन्ति यत् रजोदर्शनदिनादारभ्य षोडशदिनं यावत् यदि पुरुष संगमो भवति तदा गर्भोऽजायत इत्यर्थः। गर्भाधानसमये यादृशं पुरुषं चित्ते आनयेत् तादृशः पुत्रो भवतीत्यर्थः। चतुर्थादौकान्ते शुभेन्हि कामिनीं गच्छेत्। तदुच्यते-

**ऋतुः षोडशाहानि सद्भिर्निरुक्त**

**स्त्यजे त्रीणि तत्रादितोहानिदक्षः।**

**परस्तात्पुमां संस्मरंश्चानुशीलं**

**निजां कामिनीं कामयेताह्निकान्ते।xix**

ज्योतिषशास्त्रे न केवलं गर्भाधानसंस्काराणां चर्चा विहिता वर्त्तते अपि तु कथं जातकस्य जन्मविधिः कथं कुत्र कदा भविष्यतीत्यादीनां विषये सम्यक् प्रतिपादितं वर्त्तते न केवलं एतदेव गर्भाधानात्परं जन्मकालं यावत् कस्मिन्-कस्मिन् मासे का-का प्रक्रिया मातुर्गर्भेभवति कथं शिशोः विकासः गर्भे भवति

एतत्सर्वमपि अस्माकं ज्योतिषशास्त्रे बहुसुष्ठुतया निबद्धो वर्त्तते। तदधः उपस्थाप्यते।

**गर्भविकासस्य अवस्थाः-**

**कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः**
**सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः**
**उदयपचन्द्रसूर्यनाथाः क्रमशो गदिता**
**भवतिशुभाशुभं च मासाधिपेः सदृशम्।।xx**

गर्भस्य प्रथममासे कलल इत्युक्ते रजवीर्ययोः मिश्रणं भवति, द्वितीये मासे तस्य स्थितिः पिण्डत्वेन परिणमति। तृतीये मासे अवयवानां निर्माणं, चतुर्थे मासे अस्थीनां निर्माणं, पञ्चमे मासे चर्मणः निर्मितिः,षष्ठे मासे रोमादीनां उत्पत्तिः, सप्तमे मासे चैतन्ययुक्तो भवति शिशुः। एवञ्च अष्टमे अशनं, नवमे प्रसववेगो भवति। एतेषां मासानां क्रमशः शुक्रः-भौमः-गुरुः सूर्यः चन्द्रः शनिः बुधलग्नेशश्चैते स्वामिनः भवन्ति।

**गर्भक्षेमादिविचारः-**

गर्भधारणं सम्यक्तया भूत्वापि यदा जातकस्य जन्मकुण्डल्यां गोचरे वा गर्भधारणयोगो न भवति तदा गर्भस्य हानिः भवति सम्यक् योगेसति गर्भस्य पुष्टत्वमपि भवति। तदाह-

**होरेन्दुयुतेः सौम्येस्त्रिकोणजायार्थखाम्बुसंस्थैर्वा।**
**पापास्त्रिलाभयातैः सुखी च गर्भो निरीक्षते रविणा।।xxi**

गर्भधारणकाले यदा लग्नस्य चन्द्रस्य स्थितिः शुभः शुभग्रहेण युक्तो वा स्यात् किञ्च लग्नात् चन्द्रमसः शुभग्रहाणां स्थितिः द्वितीयचतुर्थपञ्चमसप्तनवमदशमादिस्थानेषु एवञ्च अशुभानां स्थितिः तृतीयैकादशे लग्नचन्द्रयोरुपरि सूर्यस्य दृष्टिः भवति तदा गर्भस्थः शिशुः स्वस्थः पुष्टश्च भवति।

**गर्भस्त्रावयोगः-**

**उत्पातक्रूरहते तस्मात् स्वस्याधिपे पतति गर्भः।**
**लग्नगृहं वा हेतुर्योगोशो गर्भपतनस्य।।xxii**

लग्नग्रहं अत्र अस्याशयः अस्ति आधानकालिकलग्नराशिः सः राशिः यदि उत्पातेन क्रूरेण पीड़ितो भवेत् चेत् लग्नपतेः यो मासः कललघनोक्तविधिना तस्मिन् मासे गर्भपतनयोगः भवति। अथवा निषेककाले रुधिरमन्दौ यदा विलग्न संस्थौऽथवेन्दौ तद्गृहगते तदीक्षते वा तदा गर्भो पतति।

अतः वक्तुं शक्यते यत् सर्वविधविचारपूर्वकं शास्त्रोक्तविधिनैव गर्भाधानं कर्त्तव्यं धर्मशास्त्रज्ञानां ज्योतिषाज्ञानां अनाज्ञया गर्भाधानादि संस्काराणि अकर्त्तव्यानि कर्तृत्वे सति गर्भस्थशिशौ दोषाः भवितुमर्हन्ति।

# ज्योतिषशास्त्रे वृत्तिविचारः

**डॉ. शैलेशकुमारतिवारी**
अतिथिप्राध्यापकः,ज्योतिषविभागे
केन्द्रीयसंस्कृतविश्वविद्यालयः,गुरुवायूर् परिसरः,केरलम्
Email-Shaileshjyotirvigyan@gmail.com
दूरवाणीसं.-९१९८८२३२२७

**"क्षुधा समा नास्ति शरीरवेदना चिन्तासमा नास्ति शरीरशोषणा ।**
**विद्या समा नास्ति शरीरभूषणा वृत्तिः समा नास्ति शरीरपोषणा ।।**[1]

जगत्यस्मिन् जीवनाधाराय यथा प्राणसमीरस्यावश्यकता भवति तथैव मानव- जीवनस्य सम्यक्रूपेण संरक्षणपूर्वकं सञ्चालनाय धर्मार्थकाममोक्षादीनां चतुर्विधपुरुषार्थाणां संसिद्धये च महन्महत्वाधायिका भवति वृत्तिः। शब्दशास्त्रे वृत्त धातोः क्तिन् प्रत्यये कृते वृत्तिरिति शब्दस्य निष्पत्तिर्जायते, यस्यार्थो भवति जीविका। श्रीमार्कण्डेयपुराणान्तर्गते श्रीदुर्गासप्तशत्यां वृत्तिरूपाभगवत्याः प्रार्थना विद्यते यत्-

**" या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।**
**नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।।** [2]

तत्र समग्रेऽस्मिन् विश्वे येन माध्यमेन समेषां मानवानां जीवनस्य सञ्चालनं सुष्ठुतया प्रचलति सा वृत्तिः (आजीविका)। समाजे सर्वे जनाः नैकानि कार्याणि नूनमेव कुर्वन्ति,धनान्यप्युपार्जयन्ति परन्तु तेषां मनसि स्वीयवृत्तिभिः कदाचित् संतुष्टिर्नैव दृश्यते। तत्रासन्तोषस्यास्य कारणं किमस्तीति मनसि जिज्ञासा समुत्पन्ना भवति सा तु स्वाभाविकी एव। अस्य समाधानमस्ति यत् क्रियमाणवृत्तौ धनोपार्जनत्त्वात् सन्निकर्षो भवति परन्तु हृदये वास्तविकवृत्तिष्वाकर्षणं दृश्यते। अतः जीविकारम्भात्पूर्वमेव मानवानां वृत्तेर्निर्धारणं क्रियते चेत्तदा परिश्रमस्य धनस्य कालस्य च ह्रासो नैव भवेत्। कार्येऽस्मिन्नस्माकं समक्षे मार्गदर्शकत्त्वेन वेदाङ्गेषु चक्षुस्थानीयमिदं ज्योतिषशास्त्रं प्रामुख्येन प्रतिष्ठितं वर्तते। भवन्तो विदन्त्येव ज्योतिषशास्त्रं प्रत्यक्षं शास्त्रमस्ति। तद्यथा-

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।**
**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।।**[3]

३. ज्योतिषसारदीपे-पृ.सं.-५ ,

---

1. सुभाषितमाला.- पृ.सं.-९,
2. श्रीदुर्गासप्तशत्याम्-५/५९-६१,
3. ज्योतिषसारदीपे-पृ.सं.-५ ,

अपि च-

**अन्यानि शास्त्राणि विनोदमात्रं न किञ्चिदेषां भुवि दृष्टमस्ति ।**
**चिकित्सितज्योतिषमन्त्रवादाः पदे पदे प्रत्ययमावहन्ति ।।**[4]

मानवजीवने धनस्यावश्यकता पदे पदे एव भवति। शास्त्रेष्वपि सर्वत्र आचार्याणां वचनं प्राप्यते यत् "धनाद्धर्मः ततः सुखम्", "सर्वे गुणाः काञ्चनमाश्रयन्ति", "अर्थागमो नित्यमरोगिता चेत्यादयश्च"। तत्र प्रश्नं समायाति यत् धनस्यागमनं कुतो भवेत्? उत्तरमस्ति वृत्यैव। यतो हि वृत्तिनिर्धारणं परमावश्यकं भवति। तत्र वृत्तिविचारः जन्माङ्गचक्रस्य कस्मात् भावात् क्रियते इति प्रस्तूयते-

वस्तुतः जन्मकुण्डल्यां तृतीयस्थानात् वृत्तिविचारो भवति। यथोक्तं भुवनदीपके-

**भगिनी भ्रातृभृत्यानां दासकर्मकृतामपि।**
**कुर्वीत वीक्षणं विद्वान्सम्यग् दुश्चिक्यवेश्मनि।।**[5]

आजीविका विषये व्यापारस्य विचारः सप्तमभावादेव भवति।

तद्यथा भुवनदीपके -

**वाणिज्यं व्यवहारं च विवादं च समं परैः ।**
**गमागमकलत्राणि पश्येत् प्राज्ञः कलत्रतः ।।**[6]

प्रसङ्गेऽस्मिन् महर्षिपराशरः-

**जायामध्वप्रयाणं च पदाप्तिं च वणिक्क्रियाम् ।**
**मरणं च स्वदेहस्य जायाभावान्निरीक्षयेत् ।।**[7]

राज्यं, मुद्रा, वाणिज्यश्च विचारः दशमभावात् क्रियते। यथोक्तं श्रीपद्मप्रभुसूरिणा-

**राज्यं मुद्रां पुरं पण्यं स्थानं पितृ प्रयोजनम्।**
**वृष्ट्यादि व्योमवृत्तान्तं व्योमस्थानाद्विलोकयेत्।।**[8]

आकाशवृत्तिविचारः दशमभावादेव क्रियते । उक्तञ्च बृहत्पाराशरहोराशास्त्रे-

**राज्यं चाकाशवृत्तिं च मानं च पितरं तथा ।**
**ऋणं चापि प्रवासं च व्योमस्थानान्निरीक्षयेत् ।।**[9]

जन्मकुण्डल्यामेकादशभावः आयस्थानत्वेन परिगण्यते। अतः अनेन भावेनार्थ- लाभस्य

4. मुहूर्तचि.पीयू.टी.-पृ.सं.-९,
5. भुवनदीपके-१/४५ ,
6. तत्रैव-श्लोकसं.-४९,
7. बृहत्पाराशरहोराशास्त्रे-१२/०८,
8. भुवनदीपके-१/५२,
9. बृहत्पाराशरहोराशास्त्रे-१२/११,

विचारो भवति। उक्तञ्च महर्षिणा पराशरेण-

**नानावस्तुभवस्यापि पुत्रजायादिकस्य च।**
**आयं पशुसमृद्धिं च भवस्थानान्निरीक्षयेत् ।।**[10]

प्रसङ्गेऽस्मिन् भुवनदीपककारः-

**गजाश्वयानवस्त्राणि सस्यकाञ्चनकन्यकाः ।**
**विद्वान् विद्यार्थयोर्लाभं लक्षयेल्लाभलग्नतः ।।**[11]

वयं जानीमः यत् जन्माङ्गचक्रे लग्नचन्द्रमसोः बलाबलानुसारेण केनापि जातकेन स्वजीवने धनं फलं वा प्राप्यते। यथोक्तम्-

**इन्दुः सर्वत्र बीजाभो लग्नं तु कुसुमप्रभम् ।**
**फलेन सदृशोंऽशश्च भावः स्वादुसमः स्मृतः ।।** [12]

अर्थात् चन्द्रः बीजः, लग्नन्तु पुष्पं, नवमांशः फलं, भावः तु स्वादुसमो भवति। अत्र कथनस्यास्यायमभिप्रायो यत् फलादेशकथने चत्वारि उपकरणानि कथितानि सन्ति।

१-चन्द्रेण, २-लग्नेन, ३-नवमांशेन, ४-भावैश्च। अत्र नवमांशस्य फलरूपेण कल्पना कृता विद्यते। लग्नचन्द्रमसोः यो बली भवेत् तस्माद्दशमभावेशस्य नवांशाधिपत्यनुसारेण जातकस्य वृत्तिर्भवति। प्रसङ्गेऽस्मिन् फलदीपिकाकारः-

**अर्थाप्तिं कथयेद्विलग्नशशिनोः प्राबल्यतः खेचरैः**
**कर्मस्थैः पितृमातृशात्रवसुहृद्भ्रात्रादिभिः स्त्रीधनात्।**
**भृत्याद्वा दिननाथलग्नशशिनां मध्ये बलीयांस्ततः**
**कर्मेशस्थनवांशराशिपवशाद्वृत्तिं जगुस्तद्विदः ।।**[13]

कथनस्यायं भावः यत् जातकस्य जन्मकुण्डल्यनुसारेण दशमेशस्य नवांशाधिपतेः याः याः पदार्थाः कथिताः तेषु सर्वेषु पदार्थेषु क्रियाव्यापारेषु वा साफल्यतायाः प्रचुरलाभस्य वा सम्भावना प्रबला भवति। उदाहरणार्थं कल्प्यते चेत् कश्चिज्जन्मपत्रानुसारेण दशमेशो भौमस्य नवमांशे स्थितस्स्यात्तदा अग्निसंयोगेन निर्मितानां पदार्थानां व्यापारे,रक्तवर्णानां द्रव्याणां धान्यानां वस्तूनां च व्यवसायेनात्यधिको लाभो भवितुं शक्यते। अत्रावधेयं यत् शास्त्रेषु प्रदत्तानां शब्दानामर्थाः व्यापकाः भवन्ति न तु रूढात्मकाः। ये शब्दाः वृत्ति-प्रकृत्यादिविषयेषु संकेतकारकाः। यथा उपर्युक्तेऽग्निसंयोगेन विहितेन कर्मणा अर्थात् स्वर्णकारः,लौहकारः,पाककर्मव्यापारे च निरताः,शस्त्रनिर्माता,अभियन्ता, यन्त्रव्यवसायिनः,इष्टिकानिर्

10. तत्रैव-श्लोकसं.-१२/१२,
11. बृहज्जातके-१०/२-३,
12.
13.

माणे संलग्नाः जनाश्च परिगणिताः भवन्ति। सर्वेषां ग्रहाणां सम्बन्धितं भिन्नं-भिन्नं कार्य-व्यापारादिकञ्च निश्चितं वर्तते। ज्योतिषशास्त्रे ग्रहा एव फलदातारः भवन्ति। अतः सूर्यादिग्रहाणां निर्दिष्टानां वृत्तयः प्रस्तूयन्ते।

आदौ सूर्याश्रिता वृत्तयः- दशमेशः सूर्यनवांशगतश्चेत्तदा जातकः फलद्रुमैः, मन्त्रजपेन, शाठ्येन, द्यूतकर्मणा, असत्यभाषणेन, ऊर्णेन ऊर्णनिर्मितवस्त्रादिभिर्वा, औषधीभिः, धातुक्रियाभिः, समाजे प्रतिष्ठितव्यक्तिविशेषद्वाराथवा राज्याश्रितकर्मणा, राजसत्तायाः सेवामाध्यमेन कार्येण च साफल्यतामर्जयति। अत्र ध्यातव्यं यत् धातुवर्गे भूगर्भात् प्रादुर्भूताः पदार्थाः यथा-स्वर्ण-रजत-पित्तल-ताम्र-कांस्य-सीसक-अङ्गार-पाषाण-मृत्तिका-विभिन्नखनिज- पदार्थादयश्च भवन्ति। तत्र धात्वपि द्विविधः धाम्याधाम्यश्च। धाम्यधातौ सुवर्णादितैजसधातवः,विभिन्नानि रत्नानि च परिगणितानि। अधाम्यधातुषु तेजरहिताः पदार्थाः भवन्ति यथा-मृत्तिका-पाषाण-अङ्गार-खनिजपदार्थादश्च। उक्तञ्च फलदीपिकायाम्-

**फलद्रुमैर्मन्त्रजपैश्च शाठ्याद्द्यूतानृतैः कम्बलभेषजाद्यैः ।**
**धातुक्रियाद्वा क्षितिपालपूज्याज्जीवत्यसौ पङ्कजवल्लभांशे।।** [14]

चन्द्राश्रिताः वृत्तयः-जलप्रसूतपदार्थैः(मत्स्य-मुक्ता-श्रृंङ्गाटक-शंखादिविविध-जल द्रव्यैः), नौकाश्रमेण, जलपोतेन कृतेनान्ताराष्ट्रियव्यापारेण(Merchant Navy), कृषिकर्मणा, महिषी-गवादिचतुष्पदानां क्रय-विक्रयेण, तीर्थाटनेन, स्त्रीभिः, वस्त्रादिभिर्वृत्त्या समृद्धिमवाप्नोति। यथोक्तं मन्त्रेश्वराचार्येण-

**जलोद्भवानां क्रयविक्रयेण कृषिक्रियागोमहिषीसमुत्थैः ।**
**तीर्थाटनाद्वा वनिताश्रयाद्वा निशाकरांशे वसनक्रयाद्वा।।**[15]

भौमाश्रिताः वृत्तयः- लौह-ताम्र-कांस्यादिधातुभिः, युद्धेन (सैन्यसेवया), प्रहारेण (आरक्षि रूपेण),स्वर्णनिर्मिताभूषणादिभिः, पण्यभोजनालय-पाचककर्मेण, भूमेः क्रय-विक्रयेण, यवनाश्रयेण, सूचकेन, दूतकार्येण च स्वजीवनं निर्वहति। तद्यथा-

**भौमांशके धातुरणप्रहारैर्महानसाद्भूमिवशात्सुवर्णात्।**
**परोपतापायुधसाहसैर्वा म्लेच्छाश्रयात्सूचकचोरवृत्त्या।।**[16]

बुधाश्रिता वृत्तयः- काव्यरचना-ज्योतिष-वेदादिशास्त्राध्ययनाध्यापन-लेखक-लिपिक-पौरोहित्यकर्मभिः जातकेनाजीविका प्राप्यते। यथोक्तम्-

**काव्यागमैर्लेखकलिप्युपायैर्ज्योतिर्गणज्ञानवशाद्बुधांशे ।**

---

14. तत्रैव- श्लोकसं.-२,

15. तत्रैव- श्लोकसं.-३,
16. तत्रैव- श्लोकसं.-४,

**परार्थवेदाध्ययनाज्जपाच्च पुरोहितव्याजवशाद्प्रवृत्तिः ।।** [17]

**गुर्वाश्रिताः वृत्तयः-** देव- विप्राभ्यां, राजकृपया, वेद- पुराण- शास्त्रादीनां व्याख्यानेन, शास्त्राणामध्ययनेन, धर्मोपदेशेन, कुसीदादीनां वृत्त्या जीवनं यापयति जातकः। उक्तञ्च-

**जीवांशके भूसुरदेवतानां समाश्रयाद्भूमिपतिप्रसादात्।**

**पुराणशास्त्रागमनीतिमार्गाद्धर्मोपदेशेन कुसीदवृत्त्या।।** [18]

**शुक्राश्रिताः वृत्तयः-** स्त्रीभिः,गो-महिषी-हस्ति-वाजिभिः,सङ्गीत-नृत्य-ललित- कलाभिः, रजतेन, सुगन्धितद्रव्यव्यापारेण, दुग्धेन, आभूषणेन, अलंकृतेन कौशेयवस्त्रेण, राज-मन्त्रिगुणेन, नैसर्गिकीकवित्व-प्रतिभादिभिर्वृत्तिमर्जयति। तद्यथा -

**स्त्रीसंश्रयाद्गोमहिषीगजाश्वैस्तौर्यत्रिकैर्वा रजतैश्च गन्धैः।**

**क्षीराद्यलङ्कारपटीपटाद्यैः शुक्रांशकेऽमात्यगुणैः कवित्वात्।।**[19]

शन्याश्रिता वृत्तयः- फल- मूलादिभिः, श्रमेण विहितेन कर्मणा, भारवहनादि सम्पादनेन, प्रेष्यकर्मणा,दुष्कृतानां जनानां सहयोगेन, कुत्सितमार्गेण, शिल्पव्यवसायेन, काष्ठनिर्मित-वस्तूनां व्यापारेण वधकर्मणादिभिर्वृत्तिं समवाप्नोति। मूलवर्गे तृणादितः वृक्षपर्यन्ताः पदार्थाः भवन्ति। यथा-तृण-गुल्म-लता-वल्ली-काष्ठ-औषधि-धान्यादयश्च।

उक्तञ्च फलदीपिकायाम्-

**शन्यंशके मूलफलैः श्रमेण प्रेष्यैः खलैर्नीचधनैः कुधान्यैः।**

**भारोद्वहात्कुत्सितमार्गवृत्त्या शिल्पादिभिर्दारुमयैर्वधाद्यैः ।।** [20]

प्रसङ्गेऽस्मिन् आचार्यवराहमिहिरेण स्वकीये बृहज्जातके ग्रन्थे नवमांशपतिवशात् वृत्तीनां नामोल्लेखः कृतो विद्यते। पुरुषेण कथं धनमर्जितव्यं भवतीति विचारप्रसंगे प्रकारद्वयं वर्तते,तत्र लग्नाच्चन्द्रमाच्च यो दशमस्थो ग्रहः स धनदाता, नाम जीविकादाता भवति। लग्नचन्द्रयोर्दशमस्थाने शून्ये भवतस्तदा लग्नचन्द्रादित्यानां ये ये दशमराशयस्तेषां येऽधिपतयस्ते येषु नवमांशकेषु कस्यापि जन्मकाले स्थितास्तेषां नवांशकानां ये ग्रहा अधिपतयस्ते ग्रहाः धनदातारो भवन्ति। तत्र सूर्यादिशनिपर्यन्तानामंशनाथानां वृत्तयः प्रदर्श्यन्ते। उक्तञ्च-

**अर्कांशे तृणकनकोर्णभेषजाद्यैश्चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च।**

**धात्वाग्निप्रहरणसाहसैः कुजांशे सौम्यांशे लिपिगणितादिकाव्यशिल्पैः।।**

**जीवांशे द्विजविबुधाकरादिधर्मैः शौक्रांशैमणिरजतादिगोमहिष्यैः ।**

---

17. तत्रैव- श्लोकसं.-५,

18. तत्रैव- श्लोकसं.-७,

19. तत्रैव- श्लोकसं.-६,

20. तत्रैव- श्लोकसं.- ८,

**सौरांशे श्रमवधभारनीचशिल्पैः कर्मेशाध्युषितनवांशकर्मसिद्धिः ।।**[21]

**रविणा-** तृण- कनक- ऊर्ण- औषधादिभिः, रोगिणां परिचर्यया, धातुक्रियाद्, क्षितिपालपूज्यात् मन्त्रजपैश्च वृत्तिमर्जयति जातकः।

**चन्द्रेण-** कृषिक्रियया,जलजैः नाम मत्स्य-लवण-शंख-मुक्ता-प्रवालादिभिः, अङ्गनाश्रयाच्च जातकः धनमाप्नोति ।

**कुजेन-** भूमिवशात्,सुवर्णरूप्यताम्रादिधातुभिः, अग्निक्रियया, खड्गचक्र कुन्तचाप-तोमराद्यायुधैः, साहसैः, जातकः जीवनं यापयति ।

**बुधेन-** लिपिगणितादिकाव्यशिल्पैः जातकः वृत्तिं गृह्णाति ।

**गुरुणा-** पुराणशास्त्रागम-नीतिमार्ग-धर्मोपदेशेन, कर्मकाण्ड-अध्ययनाध्यापन-यज्ञ-दानोपवास-तीर्थगुरुसेवनादिभिः जातकः धनमाप्नोति।

**शुक्रेण-** मणिभिः, रजतादिगोमहिष्यैः धनमुपार्जयति जातकः।

**शनिना-** भूरिश्रमेण, भारवाहनेन, वधेन, स्वकुलानुचितैः कर्मभिः धनमाप्नोति जातकः, मूलफलैः खलैर्नीचधनैः कुधान्यैः, कुत्सितमार्गवृत्त्या, शिल्पादिभिश्च जातकः।

मुख्यतया प्रसङ्गेऽस्मिन्निदमवधेयं यत् जन्माङ्गे दशमेशो यस्मिन् राशिनवमांशे स्थितस्स्यात्तस्य स्वामी बली चेत्तदा भूरिश्रमं विना सहजरूपेण धनागमं भवति निर्बले सति कृतश्रमस्य पूर्णफलं नैव प्राप्यते। अतः सम्यक्रूपेण जन्मपत्रं परीक्ष्य निर्दिष्टवृत्तिक्षेत्रे प्रयासः कर्तव्यो भवति येन मानवजीवनं सफलं स्यादिति शम्।

**गृहस्थाश्रम की विशेषताः-**

**सानन्दं सदनं सुताश्च सुधयः कान्ता न दुर्भाषिणी सन्मित्रं सुधनं स्वयोषितिरतिश्चाज्ञापराः सेवकाः।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः।।**
**यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ।।**
**किं जातैः बहुभिः पुत्रैः शोकसन्तापकारकैः। वरमेकः कुलालम्बी यत्र विश्रायते कुलम्।।**
**पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।**
**तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।।**

21. तत्रैव- श्लोकसं.- ९,

# जातककर्मपद्धत्यनुसारेण ग्रहाणां दृष्टिविमर्शः

**विनायकशर्मा**
शोधच्छात्रः (NET)
केन्द्रीयसंस्कृतविश्वविद्यालयः,श्रीरणवीर परिसरः
E-mail:-hpvinayak2020@gmail.com
चलदूरवाणी-7807447441

अखिलब्रह्माण्डनायकस्य निःश्वासभूतः एवं समस्तज्ञानविज्ञानराशेः आकरोऽस्ति वेदः। एवं भूतस्य वेदस्य शिक्षा - व्याकरण -ज्योतिष - निरुक्त - कल्प - छन्दांसीति षडङ्गानि वर्तन्ते। ननु ज्योतिषशास्त्रस्य वेदाङ्गत्वं कथमित्याह भास्करेण स्वीये सिद्धान्तशिरोमणौ-

**वेदास्तावद्यज्ञकर्मप्रवृताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**

**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।1**

वेदस्य षडङ्गेषु नेत्रस्थानीयमिदं ज्योतिषशास्त्रम्। ननु तेषु कर्ण-घ्राण-नासिका -मुख-हस्तेत्यादिषु अङ्गेषु चक्षुःरूपेणैव कथं ज्योतिषशास्त्रमित्युच्यते प्रश्नमार्गे-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम् ।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।। 2**

वैदिककालात् प्रवर्धितमिदं शास्त्रं सिद्धान्त-संहिता-होरास्कन्धत्रयेषु विभक्तमस्ति। जातक शास्त्रस्यारम्भकालादेव दृष्टिसम्बन्धिविचारः वर्णितः दृश्यते। यतो हि जातकस्य समय ज्योतिषशास्त्रे ग्रहाणां दृष्टिविचारः भिन्न-भिन्नरीत्या प्रतिपादितः वर्तते। बहवः जातक स्कन्धस्य विषयाः प्राप्यन्ते। पूर्णतया लिखितं वर्तते, इदानीं प्राप्यते च फलितस्कन्धे। तत्राद्या परम्परा आचार्य यत्र दृष्टिरपि प्रतिपादिता वर्तते। आपरम्परा विषयस्य निर्धारणे दृष्टेः महत्त्वं विशेषेण प्राप्यते।

होरास्कन्धान्तर्गतसमेषु ग्रन्थेषु जातककर्मपद्धति इति ग्रन्थः कश्चन विशेषोऽस्ति। तत्रापि ग्रहाणां दृष्टिविमर्शः स्फुटतया कृतः वर्तते। यथा तत्र तावत् दृष्टेः प्रयोजनमिन्द्रवज्ज्रयामाहः-

**उक्तानि यस्माद्बहुधा फलानि व्योमौकसां दृष्टिसमुद्भवानि ॥**

**तस्मात्प्रवच्म्यानयनं हि दृष्टेर्होराविदां दृक्फलनिर्णयाय ॥ 3**

।। स्पष्टार्थः।।

अथ द्वाभ्यां मन्दाक्रान्ताभ्यामुपजात्या चेति वृत्तित्रयेण दृष्टिसाधनमाह-

**दृश्यो द्रष्ट्रा विरहिततनुः षड्गृहेभ्योऽधिकश्चे**
**दिग्भ्यः १० शोध्यो विहितकलिकः खाभ्रपक्षाद्रि ७२००भक्तः ।**
**दृष्टिस्सा स्याद्यदि शर ५ गृहेभ्योऽधिकः पञ्चहीनो**
**लिप्तीभूतो १८०० धृतिशतहतः स्याच्चतुर्भाधिकश्चेत् ॥**
**त्यक्त्वेषुभ्यः ५ खखरसगुणै३६०० र्वह्नि ३ भेभ्योऽधिकश्चे**
**च्छोध्योऽब्धि ४ भ्यो विरचितकलः षष्टिकृत्या ३६०० समेतः।**
**भक्तो द्व्य्श्वैश्शतविनिहतैः ७२०० राशियुग्माधिकोऽपि**
**द्वाभ्यामूनो नवशत ९०० युतो व्योमखाङ्गाग्नि ३६०० भक्तः॥**
**एकोनितश्चैकगृहाधिकश्चेत्कलीकृतो द्व्य्श्वशतै ७२०० र्विभक्तः ।**
**एवं स्फुटाः खेचरदृष्टयः स्युर्दिग्भ्यो १० ऽधिकं पश्यति नो ग्रहेन्द्रः ॥ 4**

दृश्यो द्रष्टा इति द्रष्टा ग्रहेण दृश्यो ग्रहो भावो विरहितः तनुः कार्यः विरहिता तनुर्यस्यासाविति। दृष्ट्वा दृश्यात्पात्य इत्यर्थः । दर्शनायार्होदृश्यइत्यर्थः पश्यतीति दृष्टा। यो यं पश्यति स दृष्टा उच्यते। तेनेत्यर्थः पातिते सति शेषं षड्राशिभ्योऽधिकं तदादिग्भ्यः १० शोध्यं। शेषस्य कला कार्याः खाभ्रपक्षाद्रि ७२०० भिर्भाज्या यद्यत्रश्चमंशादि सा दृष्टिर्भवतीति ज्ञेयम्। दृष्टा रहिते दृश्ये शेषं इति सर्वत्रानुवर्त्तनीयं । शरग्रहेभ्यो पंचराशिभ्योऽधिकं तदातन्मध्यात्पंचराशयः हीना कार्याः शेषस्य कला धृतिशतेन १८०० भाज्या दृष्टिर्भवति। पुनः शेषं चतुर्थाधिकं चत्तूराशिभ्योधिकं तदात्त्वेषुभ्यः इतिपंचराशिभ्यः शोध्यंशेषस्य कला खखरसगुणो ३६०० र्भाज्यालब्धं दृष्टिः वह्निभेभ्योधिक इति तदेवत्रिराशिभ्योऽधिकं तदा चत्त्वात्तूराशिभ्यः ४ शोध्यं विरचित कला इति तस्य कलाषष्टिकृत्या ३६०० युता ततः शतगुणितेद्वश्वै ७२०० र्भाज्या लब्धं दृष्टिः तदेव राशि युग्माधिकं राशिद्वयाधिकं तदा द्वाभ्यामूनो राशिद्वयं तन्मध्यात् पात्यां शेषस्य कला नवशतः ९०० युता व्योमखंगाग्निभि ३६०० र्भाज्या दृष्टिः। अथ तदेव एकग्रहादिकं तदा एकराशिना ऊनः कार्यः तस्य कलाद्वश्वशतै ७२०० र्भक्ता दृष्टिर्भवति। एवं ग्रहाणां स्फुटादृष्टयो भवंति। चेत् शेषं दिग्भ्योधिकं तदाग्रहाः न पश्यति। दृष्टाद्यभाव इत्यर्थः यतो जातके दृश्यराश्याधिकं दृष्टिर्नास्ति। अथ शनेश्चरगुरुभौमानां विशेषमुपजात्याह-

**त्रिद्वेकपादाः क्रमशोनिधेयाः शनीश्चराचार्यमहीसुतानां।**
**त्रिकम्रणोः धीतयतद्यसोश्वरंध्रबंधोः स्थितानामिहपूर्वदृक्षुः।। 5**

इहात्र शास्त्रे शनैश्चराचार्य-महीसुतानां इत्यत्र पंचम्यर्धे शेषविवक्षायां संबंधे षष्टिज्ञेया। पूर्वदृक्षु

पूर्वागता सुगणिता +सुदृष्टिषु क्रमशो त्रिद्वेकपादाः निधेया योज्या। कुत्रस्थितानां ग्रहाणां भावानामित्याह। त्रिकर्मणोरिति।। एतदुक्तं भवति शनैश्चरात् त्रिकर्मणो स्थितस्य ग्रहस्य भावस्य वेतिशेषः पूर्वदृष्टिषु त्रिपादा ४५ कला योज्या। दृष्टा शनिना ऊनितेः दृश्ये शेषं राशि २/९ भवति तदा गणितागतदृष्टिषु पञ्चचत्त्वारिंशत्कला योज्येत्यर्थो नान्यथा। एवं गुरुणा द्रष्टा ऊनितदृश्ये शेषं ४/८/ राशयो भवन्ति। तदा दृष्टिषु पादद्वयंत्रिंशत्३० कला योज्या। भौमेन दृष्टा। दृश्ये ऊनिते शेषं ७/३/ राशयो भवन्ति तदा दृष्टिषु एकः पादः पंचदशकला योज्या। अथ वृत्ति कृद्विशेषमाह। यतो ग्रंथकृतात्रिद्वयेकपादा राश्यादावुक्ता। यथा २ अंशाधिक्यं भवति तथा २ त्रिद्वयेकपादा अपि हीयमाना भवन्ति। तत्र त्रैराशिकेन भवति। तदानयनं राशिना द्रष्टा दृश्ये ऊने शेषं राशि २ तदा गणितागता दृष्टिः १५ एतासु पंचचत्त्वारिंशत् ४५ कलाक्षेप्या तदा पूर्णादृष्टिः ६० यदा ३ राशयस्तदाः किमपि न योज्यं। आचार्यपराशरस्य मतं यथा-

**पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः ।**

**विशेषतश्च त्रिदशत्रिकोणं चतुरष्टमान् ।।6**

अर्थात् **सामान्या दृष्टिः**- सर्वेऽपि ग्रहाः स्वस्थानात् सप्तमं स्थानं पूर्णदृष्टया पश्यन्ति ।

**विशेषदृष्टिः**- त्रयाणां ग्रहाणां कृते विशेषदृष्टिः प्रतिपादिता वर्त्तते, तत्र शनि त्रिदशस्थानं, गुरुः नव - पञ्चमं स्थानं तथा भौमश्च चतुर्थाष्टमं स्थानं पश्यति । विशेषकथनस्य अभिप्रायः अयं यत्- सामान्यतो पृथक् एषा परिभाषा विधिः वा प्रतिपादिता वर्त्तते ।

केचन जनाः पाददृष्ट्या अनेन श्लोकेन अन्वयः अर्थश्च गृह्णन्ति । यथा-

**3-10 स्थाने - एकपाददृष्टिः,**

**5-9 स्थाने- द्विपाददृष्टिः,**

**4-8 स्थाने- त्रिपाददृष्टिः,**

**7 स्थाने- पूर्णदृष्टिः ।**

पादादिदृष्टिविचारे फलदीपिकायां मन्त्रेश्वरेण प्रतिपादितं यत्-

**श्रेष्ठेति सा सप्तमदृष्टिरेव सर्वत्र वाच्या न तथाऽन्यदृष्टिः ।**

**योगादिषु न्यूनफलप्रदेति विशेषदृष्टिर्न तु कैश्चिदुक्ता ।।7**

एवमेव शनि - गुरु- भौमानां त्रिदश - त्रिकोण-चतुरष्टमानान्यपि पूर्णदृष्टिस्थानानि भवन्ति। इत्थं मन्यन्ते दैवज्ञैः।

**अतो मध्यतोऽनुपातः-** कला ४५ क्षेपे मध्यतो अंशा ३०, तेन प्रत्यंशं २ सार्धकला १/३०

हानिं कृत्त्वा प्रतिकलं सार्द्धविकला क्षेपे हानिं कृत्त्वा पश्चात् दृष्टिषु क्षेपः कार्यः। इदं शतमुक्तम्। गुरोस्त्रु ३० प्रत्यंशं २ एकाकला प्रतिकलामेका विकला हानिः। भौमस्य क्षेपः १५ प्रत्यंशं कला द्विहानिः, प्रतिकलं विकलाद्विहानिः एवं प्रत्यंशेरक्षेपः यन्त्रतो ज्ञेयः।

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ८ | ९ | १० | ११ | १२ | १३ | १४ |
| ४५ | ४३ | ४२ | ४० | ३९ | ३७ | ३६ | ३४ | ३३ | ३१ | ३० | २८ | २७ | २५ | २४ |
| ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० |
| ३० | २९ | २८ | २७ | २६ | २५ | २४ | २३ | २२ | २१ | २० | १९ | १८ | १७ | १६ |
| १५ | १४ | १४ | १३ | १३ | १२ | १२ | ११ | ११ | १० | १० | ०९ | ०९ | ०८ | ०८ |
| ०० | ३० | ०० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० |

| १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ | ३० | अंशकाः | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २२ | २१ | १९ | १८ | १६ | १५ | १३ | १२ | १० | ०९ | ०७ | ०६ | ०४ | ०३ | ०१ | ०० | श. | क. | क्षे. |
| ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | नि | वि | प |
| १५ | १४ | १३ | १२ | ११ | १० | ०९ | ०८ | ०७ | ०६ | ०५ | ०४ | ०३ | ०३ | ०१ | ०० | गु. | क | क्षे |
| ०७ | ०७ | ०६ | ०६ | ०५ | ०५ | ०४ | ०४ | ०३ | ०३ | ०२ | ०२ | ०१ | ०१ | ०० | ०० | भौ. | क | क्षेपः पूर्वः |
| ०० | ३० | ०० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | ३० | ०० | म | वि | दृष्टिषु |

कलादिषु स्वबुध्यानुपातः कार्यः। अत्रोदाहरणम्। प्रथमं रवे दृष्टिः करणम्।

दृश्यो रविः ७/१४/२/११/ दृष्ट्रा चन्द्रेण ५/१५/४९/१७/ रहितः शेषम् १/२८/१२/५४/ एकग्रहाधिकस्तेन एकेनोनः ०/२८/१२/५४/ एतस्य कला १६९२/५४/ द्वयश्विशते ७२०० र्भक्ता लब्धमंशादि रविं प्रतिचन्द्रदृष्टिः ०/१४/६/, दृश्यो रविः ७/१४/२/११/ द्रष्टा भौमेन ६/२५/५५/४४/ हीनः, ०/१८/६/२७/ दिग्भ्योऽधिकत्त्वात् दृष्टाभावः बुधगुरुशुक्रशनैश्चराणां दृष्ट्याभावो दिग्भ्योऽधिकत्त्वात् एवं

सर्वेषां ग्रहाणामानीतं दृष्ट्यानयनं यन्त्रतो ज्ञेयम्। अथ विशेषार्थम्। शनिना दृष्ट्या ९/१०/३६/१९/ दृश्यो भौमः ६/२५/५५/४४/ हीनः ९/१५/१९/२५/ षड्राशिभ्योऽधिकस्तेनदशभ्यः शोध्यः शेषं ०/१४/४०/३५/ एतस्य कला ८८०/३५/ खाभ्रपक्षाद्रिभिः ७२०० भक्ता लब्धं ०/७/२०/ अत्र त्रिद्वयेपादा इति क्षेपः क्षिप्तुं युज्यते। त्रिकर्मणोः स्थितत्त्वात्। परं यदि शेषं ९/०/०/०/ एतादृशं भवति तदा ४५ कलाक्षिप्यते अत्र ईदृशः ९/१५/१९/२५/ स्तेनांशाधिकत्त्वात् त्रैराशिकं कृत्वा क्षेपः क्षिप्यते। अतोंऽशादिद्यं १५/१९/२५/ सार्धं कृतं २२/५९/७/ एतत् ४५ मध्ये शोधितं। यतः प्रत्यंशं सार्द्धकलाहानिः जातं कलादि २२/०/५३/ इदं पूर्वदृष्टिषु ०/७/२०/ क्षिप्तं जाता दृष्टिः अंशादि ०/२९/३०/५३/ एवं सर्वेषां ग्रहाणां दृष्टिः यन्त्रतो ज्ञेया।

अत्र दृष्ट्याधिकारे कृष्णपक्षे चन्द्रः क्रूरो ज्ञेयः। शुक्लपक्षे सौम्यो ज्ञेयः। सौम्यग्रहयुक्तो बुधः सौम्यः पापग्रहयुक्तो पापो ज्ञेयः। यावतां क्रूर ग्रहाणां दृष्टिर्भवति सापि एककी कार्या। यावतां सौम्यग्रहाणां दृष्टिः सापि एकीकार्याः। ततः तयोरन्तरं कार्यम्। शेषं शुभमशुभं वा ज्ञेयम्।

| **रविप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | मंगलः | अशुद्धान्तर |
| ०० | ०० | ०० |
| १४ | १४ | १४ |
| ०६ | ०६ | ०६ |

| **चन्द्रप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | शुक्रः | अशुद्धान्तरम् |
| ०० | ०० | ०० |
| २७ | २७ | २७ |
| २४ | २४ | २४ |

| **भौमप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | शनिः | अशुद्धान्तरम् |
| ०० | ०० | ०० |
| ०५ | २९ | ३४ |

| | | |
|---|---|---|
| ०३ | २१ | २४ |

| **बुधप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | शनिः | अशुद्धान्तरम् |
| ०० | ०० | ०० |
| ०७ | २१ | २८ |
| ११ | ०४ | १५ |

| **गुरुप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | शनिः | अशुद्धान्तरम् |
| ०० | ०० | ०० |
| ११ | ०२ | १४ |
| ३३ | ५४ | ३३ |

| **शुक्रप्रतिदृष्ट्यः** | | |
|---|---|---|
| चन्द्रमाः | शनिः | अशुद्धान्तरम् |
| ०० | ०० | ०० |
| १४ | ०६ | १६ |
| ०६ | ११ | १७ |

| शनिप्रतिदृष्टयः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शुभः | अशुभः | अन्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० |
| १३ | ३२ | २९ | २५ | १६ | १८ | ५९ | १५ | १५ |
| ३७ | ३६ | ४० | २४ | २९ | १५ | ५८ | ३६ | ३५ |

| तनुप्रतिदृष्टयः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | अशुभः | शुभः | अन्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० |
| ०३ | ४१ | १३ | १० | ०६ | ०७ | ५८ | २४ | ३४ |
| ५९ | ५५ | ०३ | ५४ | २७ | १५ | ५७ | ३६ | २१ |

| पञ्चमभावं प्रतिदृष्टयः | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | शुभः | अशुभः | अन्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०२ | ०२ | ०० |
| ३३ | ३७ | ५७ | ५९ | ४३ | ४२ | ३४ | २५ | ४३ | १७ |
| ३८ | २९ | ३३ | ३३ | २८ | ४० | ३३ | ४९ | ३३ | ४४ |

इत्थं जातककर्म पद्धत्यनुसारेण दृष्टिप्रमाणानयनमाचार्यश्रीपतिना कृतो वर्तते ।

| शनिप्रतिदृष्टि | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शुभः | अशुभः | अन्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० |
| १३ | ३२ | २९ | २५ | १६ | १८ | ५९ | १५ | १५ |
| ३७ | ३६ | ४० | २४ | २९ | १५ | ५८ | ३६ | ३५ |

| तनुभावप्रतिदृष्टयः | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | अशुभः | शुभः | अन्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०० |
| ३ | ४१ | १३ | १० | ६ | ७ | ५८ | २४ | ३४ |
| ५९ | ५५ | ३ | ५४ | २७ | १५ | ५७ | ३६ | २१ |

| पञ्चमभावं प्रतिदृष्टयः | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| रविः | चन्द्रः | मङ्गलः | बुधः | गुरुः | शुक्रः | शनिः | अशुभः | अशुभः | अशुभान्तरम् |
| ०० | ०० | ०० | ०० | ०० | ०० | ०० | ०२ | ०२ | ०० |
| ३३ | ३७ | ५७ | ५९ | ४३ | ४२ | ३४ | २५ | ४३ | १७ |
| ३८ | २९ | ३३ | ३३ | २८ | ४० | ३३ | ४९ | ३३ | ४४ |

इत्थं जातककर्मपद्धत्यनुसारेण दृष्टिप्रमाणानयनम् आचार्यश्रीपतिना कृतं विद्यते।

# नैषधीयचरिते ज्योतिषशास्त्रीयसन्दर्भानामनुशीलनम्

**डॉ.ज्योतिप्रसाददाशः**
सहायकाचार्यः,
ज्योतिषशास्त्रविद्याशाखा,श्री सदाशिवपरिसरः, पुरी
astrologerjyotiprasad@gmail.com

अपारे काव्यसंसारे कविरेव प्रजापतिः। कवेः कर्मं काव्यमिति शास्त्रकाराः। संस्कृतसाहित्यवाङ्मयाकाशे नैषधं विद्वदौषधमिति काचिदुक्ति प्रसिद्धा। श्रीहर्षेण प्रणीतं नैषधीय-चरितम्। कथनमस्ति उदिते नैषधे काव्ये क्व माघः, क्व च भारवी इति। संस्कृतसाहित्यजगति इदमुत्कृष्टतममिति। अस्य महाकाव्यस्याध्ययनेन संस्कृतव्याकरणस्य, पुराणस्य, धर्मशास्त्रस्य, दर्शनशास्त्रस्य, ज्योतिषशास्त्रस्य, तन्त्रशास्त्रस्य च ज्ञानं भवितुमर्हति। सम्पूर्णभारतीयविद्यास्थानां प्रयोगेण शास्त्रोऽयं विद्वत्स्वादरभाग् भवति। भारतीयविद्यासु कालशास्त्रस्य महनीयता स्वतन्त्रा। स्व निर्मिते नैषधीये काव्ये बहुषु स्थलेषु श्रीहर्षः ज्योतिषशास्त्रीय तत्त्वानां, पारिभाषिकशब्दानां च व्यवहारः कृतः। काव्ये साहित्यिकविषयाणां चर्चाः कवेः धर्मम्, परन्तु तस्मिन् काव्ये यदा अन्येषां विषयाणां विचार-विमर्शनं जायते तदा काव्यस्य सौन्दर्यं पाण्डित्यञ्चाभिवर्धते। अभिवर्धिते सौन्दर्ये अर्थगौरवं, पदलालित्यं पाठकानां विद्याविद्योतितान्तकरणा-नामानन्दाय भवतीति मे मतिः। तस्मात् कविषूत्कृष्टतमं स्थानं श्रीहर्षः प्राप्नोतीति। तेषां ज्योतिषशास्त्रीयं यच्चिन्तनं सर्वेषां गणकानां कृते प्रेरणाप्रद इत्यत्र नास्ति संशीतिः। इदानीं ज्योतिषशास्त्रीयसन्दर्भाना-मनुशीलनं कुर्मः। एतदपि जानीमः, ज्योतिषशास्त्रस्य स्कन्धत्रयस्यानुशीलनं नैषधीय-चरिते प्राप्यते। तेषु कतिपय विषयाः चर्च्चयामः। आदौ तावत्-

सूर्य-चन्द्रयोः परिवेषवर्णनम् नैषधीये सूर्य-चन्द्रयोः परिवेषः जायते इत्यस्य वर्णनं मिलति।

राजा नलस्य प्रतापमभिवर्णयन्कविः श्रीहर्षः वदति- राजा नलस्य यशः तावान् समुज्वलः यावान् सूर्य-चन्द्रयोः प्रकाशमपि नैव भवितुमर्हति। इदमेवतथ्यं मनसि विचिन्त्य ब्रह्मा सूर्य-चन्द्रं परितः कुण्डलाकारः परिवेषः निर्मितः। उक्तञ्च नैषधीये-

**तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।**
**तनोति भानोः परिवेषकैत्वात् तदा विधिः कुण्डलनां विधोरपि**[1]।।

इत्यत्र कविः स्व-भावनया परिवेषेण इदं तथ्यमुपस्थापयितुं यतते यद्राजा नलसम्मुखं सूर्य-चन्द्रयोस्तेजमयत्वं सामान्यमिव प्रतिभाति। उक्तञ्च नैषधीये-

किन्तु ज्योतिषशास्त्रस्याद्वैतमार्तण्डः दैवज्ञः वराहमिहिरः स्व कालजयाख्ये बृहत्संहितानामके ग्रन्थे सूर्यचन्द्रयोः परिवेषसम्बन्धिनी चर्चा विहिता। तद्यथा-

**स मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः।**

1. नैषधीयचरिते 1/14

**नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः।।** [2]

अर्थात् यदा सूर्य-चन्द्रयोः समुर्छितं किरणं वायुना मण्डलाकारं विविधवर्णाकारकं अभ्रगतं दृश्यते तदेव परिवेषः। अद्भूतसागरग्रन्थे गर्ग-भार्गवमतं स्वीकृत्य परिवेषफलं समुपस्थापयति वल्लालसेनः। यदि सूर्य-चन्द्रयोः उदयास्ते, दिवसस्य मध्यभागे च नभसि परिवेषः संल्लक्षते चेत्तदा राष्ट्रस्य कृते पीडाकरः स्यादिति। उक्तञ्च-

**उदयेस्तमये मध्ये सूर्याचन्द्रमसोर्दिवि।**
**परिवेषः प्रदृश्येत तद्राष्ट्रमवसीदति।।**[3]

परिवेषः यदि दिवसे सूर्यस्य,रात्रौ चन्द्रस्य परिवेषः दृग्गोचरो भवेत्तदा राष्ट्रनायकस्य राज्ञः विनाशः निश्चितमेव। इत्यत्र शास्त्रवचनम्-

**दिवा सूर्ये परिवेषो रात्रौ चन्द्रे यदा भवेत्।**
**एकस्मिन् तदहोरात्रे तदा नश्यन्ति पार्थिवः।।**[4]

अनेन प्रकारेण श्रीहर्षः ज्योतिषशास्त्रान्तर्गतस्य परिवेषवर्णनं काव्यिकशैल्या एवं कृतमिति। सूर्यकिरणसकाशात् चन्द्रालोकयति। भास्कराचार्यः स्व सिद्धान्तशिरोमणौ लिखति-

**तरणिकिरणसंगादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति।**
**तदितरदिशि बालाकुन्तलश्यामलश्रीर्घट इव निजमूर्तिच्छाययैवातपस्थः।।**[5]

नैषधकारः श्रीहर्षः लिखति यत् राजा नलः यथा स्व-सारथियुक्तस्यन्दनादवतीर्य नगरे प्रविसति स्म, तथैव सूर्यबिम्वात् निस्सृतकिरणाः चन्द्रमण्डलान्तर्गताः भवन्ति। उक्तञ्च नैषधीयचरिते-

**रथादशौ सारथिना सनाथाद्,राजावतीर्याशु पुरं विवेश।**
**निर्गत्य विम्बादिव भानवीयात् सौधाकरं मण्डलमंशुसङ्घः।।**[6]

ज्योतिषशास्रस्यानुपमे संहिताग्रन्थे अस्य वर्णनं मिलति यत्- सूर्यस्य किरणाः जलमये चन्द्रबिम्वे प्रतिबिम्वितः सन् तमसः नाशकरो भवति। तथैव दर्पणोदरसंलग्नाः सूर्यकिरणाः प्रतिबिम्बिताः सन्तः मन्दिर-गर्भगृहस्य तमो नाशयति। उक्तञ्च बृहत्संहितायाम्-

**सलिलमये शशिनि रवेर्दीधितयो मूर्छितामसो नैश्यम्।**
**क्षपयन्ति दर्पणोदरनिहता इव मन्दिरस्यान्तः।।**[7]

पुनश्च-

**त्यजत्योर्कतलं शशिनः पश्चात् अवलम्बते यथा शौक्लम्।**

---

2. बृहत्संहिता, परिवेषलक्षणाध्यायः श्लो. सं. 01
3. अद्भुतसागरे परिवेषाद्भुतावर्ते, गर्गवचनम्
4. अद्भुतसागरे परिवेषाद्भुतावर्ते,गर्गवचनम्
5. सिद्धान्तशिरोमणौ शृङ्गोन्नतिवासना,श्लो.सं.1
6. नैषधीयचरिते- 6/7
7. बृ.सं. चन्द्रचाराध्यायः श्लो.सं. 2

**दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः।।**[8]

अमान्ते चन्द्रसूर्ययोः युतिकथनम्-

दर्शे चन्द्रसूर्ययोः संगमनं भवति। अर्थात् अमान्ते सूर्य-चन्द्रौ एकराशि-संशक्तौ भवतः। तस्मादेव कारणात् रात्रौ चन्द्रः नृ-दर्शनदक्षः न भवति। अर्थात् अस्तङ्गतत्वमिति भावः। इदमेव ज्यौतिषीयतत्त्वं स्वीकृत्य कविः दमयन्तीं प्रति राजानलमुखारविन्दात् इदं वदति। हे हंस! प्रतिमासं अमान्ते किं सूर्यः चन्द्रेण सह सङ्गं करोति? तेन धैर्येण सूर्यात् गृहीत-तीक्ष्णरश्मिना माम् ज्वालयितुं समुद्यतोऽसि? इत्यत्र श्रीहर्षोक्तिः यथा- **प्रतिमाससमौ निशाकरखगः संगच्छति यद्दिनाधिपतिम्।** अस्मिन्नेव प्रसङ्गे ज्योतिषशास्त्रस्यार्षग्रन्थे उक्तमस्ति-

**तुल्यौ राश्यादिभिः स्याताममावास्यान्तकालिकौ।**

**सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिभिःसमौ।।**[9]

अर्थात् सूर्यचन्द्रयोः राशितुल्यं जायते अमान्ते। तथा च पूर्णान्ते षड्राश्यन्तरितौ भवतः सूर्यचन्द्रौ। कुहुशब्दस्य प्रयोगः श्रीहर्षेण कृतो वर्तते। अदृष्टचन्द्रा अमावाश्या कुहुरिति नैषधीयतत्त्वविमर्शिते ज्ञायते। एतदेवाचार्यस्य ज्योतिषशास्त्रीयं कालज्ञानमस्तीति द्योतयति।

**पूर्णचन्द्रस्य क्षीणचन्द्रस्य च विचारः-**

ज्योतिषशास्त्रदृष्ट्या यस्मिन् पक्षे चन्द्रकलाः वर्धिताः, तस्य पक्षस्य शुक्लपक्षत्वम्। यस्मिन् पक्षे चन्द्रकलायाः क्रमिकह्रासो भवति, तदेव कृष्णपक्षः। क्षीणचन्द्रमा पापफलदस्तथा पूर्णचन्द्रमा शुभफलदः भवतीति रामदैवज्ञः। प्रसङ्गेऽस्मिन् श्रीहर्षः वदति- अत्र ज्योतिषशास्त्रीयं मतं विपरीतमिति प्रतिभाति। किमिति? विरहयुक्तानां जनानां बधे संयुतचन्द्रः पापफलदः भवतुमर्हति। तथा च यस्य सुधाः देवैः पीताः, एतादृशस्य क्षीणकलायुक्तस्य चन्द्रस्य पापरहितत्वमेव। एवञ्च तत्र चन्द्रमण्डलस्य परिधिविषयिणी चर्चाऽपि कृताऽस्ति। इदं चिन्तनं काव्यिकदृष्ट्या भवितुमर्हति। उक्तञ्च नैषधीये-

**विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम्।**

**सुरनिपीतसुधाकमपापकं ग्रहविदां विपरीतकथाः कथम्।।**[10]

**मुहूर्त-शकुनयोः चर्चा-**

यात्राकाले मङ्गलमयशब्दानां श्रवणे उच्चारणे च कार्यसिद्धिः भवतीति ज्योतिषशास्त्रस्य चिन्तनविषयः। परन्तु इत्यत्र महाकवि श्रीहर्षः भणति यत् दमयन्त्याः गमनकाले छलेन हास्यं कुर्वद्भिः सखिभिरुक्तम्- हंस(सूर्य) समीपं गमनं नोचितम्। कथमिति चेत् सूर्यस्य आतपाधिक्यत्वात् सा सूर्यातपेन पीडिता भविष्यति। इदं सखीनाम् वचांसि श्रुत्वा दमयन्त्युवाच। भविष्ये प्रियप्राप्तिकामा आदौ हंसशब्दं श्रुत्वा तस्याः अपशकुनानां नाशं याति। अर्थात् सूर्यसम्मुखं गन्तुकामाः ये तान् मङ्गलशब्दः हंस इति। तेन सुष्पष्टोऽयं भावः यत् दमयन्याः यात्रा सफला भविष्यतीति। ज्योतिषशास्त्रे गमनवेलायां हंसानां

8. बृ.सं. चन्द्रचाराध्यायः श्लो.सं. 3

9. सूर्यसिद्धान्तः, चन्द्रग्रहणे श्लो.सं. 07

10. नैषधीये 4/62

नाम अथवा तेषां शब्दश्रवणं मङ्गलमयं शुभकरञ्च भवति। उक्तञ्च-

**शस्ता न हंसाभिमुखी तवेयं**
**यात्रेति ताभिश्छलहास्यमाना**
**साऽऽह स्म नेवाशकुनी भवेन्मे**
**भाविप्रियावेदक एष हंसः।।**[11]

यात्रायां वामभागे राजशुकः मङ्गलशब्दं यद्युच्चारयति चेत् सोऽपि अतीव शुभप्रदः। उक्तञ्च शिशुबोधे-

**वामे शव-शिव-कुम्भाः दक्षिणे गो-मृग-द्विजाः।**
**नकुलः सर्वकार्येषु अहिः सर्वत्र बाध्यते।।**[12]

अनेन प्रकारेण जय-योगस्य विचारोऽपि श्रीहर्षेण कृतः। तत्र दमयन्त्याः सौन्दर्यमभिवर्णयन् उक्तमस्ति यत् – दमयन्त्याः केशपाशाः कुन्तलाश्च कृष्णपक्षस्य तथा पश्चाद्भागे परिदृश्यमानः ललाटः शुक्लपक्षस्य द्योतकः। अत्र कविः स्व-भाषायाम् एवं वदति यत् दमयन्तीरूपिणी कृष्णपक्षे अष्टम्याः जयदमुहूर्तसमाप्ते कामदेवः विजयमासुः। इत्यत्र टीकाकारः मल्लिनाथः पितामहस्य वचनमुद्धरति। तद्भवति विजयाय कृष्णाष्टमी यात्रायां सन्मङ्गलप्रदो भवतीति ज्योतिर्विदां चिन्तनम्। यदि कदाचित् कृष्णाष्टमी श्रवणानक्षत्रेण सह अथवा रोहिणीनक्षत्रेण सह योगकरः स्यात्तदा विजयेच्छुकानां शुभाय भवति। तद्यथा-

**जयदाविजिगीषूणां यात्रायामसिताष्टमी।**
**श्रवणेनाथ रोहिण्या जययोगो युता यदि।।**[13]

**दुरुधरायोगवर्णनम्-** ज्योतिषशास्त्रे चन्द्रयोगानां महती चर्चा विद्यते। दुरुधराचन्द्रयोगस्य प्रकारः। अस्य योगस्य वर्णनं नैषधे काव्ये मिलति। तद्योगः आलंकारिकरीत्या श्रीहर्षेण प्रतिपादितः। इत्यत्र दुरुधरायोगं दौरधुरीशब्दात् ज्ञायते। अत्र प्रसङ्गः यथा- कर्णे कुण्डलद्वयं विभूषयितुं सखयः दमयन्तीं प्रति प्रोवाच। धारिते कुण्डलद्वयमध्यवर्ती तस्याः(दमयन्त्यायाः) मुखचन्द्रः दुरुधरायोगमुत्पादयति। तद्यथा-

**अवादि भैमी परिधाय कुण्डले वयस्ययाऽऽभ्यामभितः समन्वयः।**
**त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरधुरिं धुरं ध्रुवम्।।**[14]

सूर्यं विहाय चन्द्रमुभयतः ग्रहाणां स्थितिः दुरुधरायोगकारकः। उक्तञ्च बृहज्जातके-

**हित्वार्कं सुनफानफादुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः।**
**शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ।।**[15]

---

11. नैषधीये 3/9
12. शिशुबोधे शुभाशुभशकुनविचारे श्लो. सं.73 अधो प्रतिपादितः।
13. नैषधीये 7/23 मल्लिनाथ टीकायाम्।
14. नैषधीये 15/42
15. बृहज्जातकम्, चन्द्रयोगाध्यायः,श्लो.सं.-3

परन्तु काचित् विशेषोक्तिः दुरुधरामवलम्व्य नारायणभट्टस्य नैषधीय-नारायणीटीकायां वर्तते। तद्भवति गुरुशुक्रयोः मध्यभागे चन्द्रस्य स्थितिः दुरुधरायोगमुत्पादयति। यतो हि गुरु-शुक्रौ ज्ञानस्य, वैभवस्य, सुन्दरतायाः, राजयोगस्य च कारकौ भवतः। अनयोः गुरुशुक्रयोर्मध्ये विद्यमानः चन्द्रः प्रभावयुक्तो भवति। योगेऽस्मिन् समुत्पन्नः धन-वाहन-बन्धुभिर्युक्तः, वैरिहन्ता, सुन्दरनेत्रयुक्तानां रमणीनां कटाक्षपीडिताश्च भवति। इत्यत्र कविः श्रीहर्षः दुरुधरा-योगमाध्यमेन दमयन्त्याः मुखालङ्करणं कृतम्। दमयन्त्याः मुखचन्द्रपानकर्ता राजानलोऽपि दुरुधरायोगोत्पन्नस्य फलस्य भोक्ता भविष्यतीति काव्यिकविमर्शः। तद्यथा- **गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत् तदा दुरुधराख्यः स्यात्।**[16]

**अष्टकवर्गस्यालंकारिकविवेचनम्-** कालः आसीत् जन्मपत्रिका भुर्जपत्रे दैवज्ञाः लिखन्ति स्म। ज्योतिषशास्त्रे अष्टकवर्गविचारे रेखाः शुभस्थानद्योतिकाः भवन्ति। सामुद्रिकशास्त्रानुसारं स्त्रियाः अधरे विद्यमानाः रेखाः शुभलक्षणसूचिकाः। इत्यत्र राजा नलः दमयन्त्याः अधरे स्थितान् रेखान् दृष्ट्वा वदति- तस्याः अधरस्थाः प्राकृतिकसौन्दर्यशालिनी रेखाः दन्तक्षतेन भुर्जपत्रे शुभाष्टकवर्गस्थाने रक्तवर्गं निर्मातीति कवेः भाषायां यथा-

**शुभाष्टवर्गस्त्वदनङ्गजन्मनस्तवाधरेऽलिख्यत यत्र लेखया।**
**मदीयदन्तक्षतराजिरञ्जनैः स भूर्जतामर्जतु बिम्बपाटलः।।**[17]

बृहत्पाराशराख्ये ग्रन्थे महर्षिपराशरस्य वचनम्-

**आयुर्दायैः परं योगैः फलान्यष्टकवर्गतः।**
**तन्वादीनां तु भावानां सूक्तैर्भावादिभिः फलैः।।**
**ज्ञात्वादौ करणं स्थानं बिन्दुरेखे च वर्गाणाम्।**
**क्रमादष्टकवर्गस्य पृथक् कृत्यं फलं वदेत्।।**[18]

चन्द्रग्रहणस्य कारणं भूच्छाया। एतस्य वर्णनमपि नैषधे काव्ये दृश्यते। तद्यथा-

**तत्तदिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारम्**
**निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः।**
**भूगोलच्छायामायामयगणितविदुन्नेयकायो भियाभू-**
**देतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः।।**[19]

अर्थात् मगधराज्यस्य विजययात्रायां समुत्सुकानामश्वानां खुराग्रेभ्यो निर्गतरजोभिः आकाशः धूम्राभः सञ्जातः। तेन शत्रोः प्रशमितप्रतापाग्निना समुत्पन्नं तमोमयिराहुः यदा राज्ञः कीर्तिरूपीचन्द्रेण साकं युद्धाय समाहूतस्तदा राहुः भयेन पृथिव्याः कपटमयं रूपं धारितवान् इति काव्यिकं विश्लेषणम्। परन्तु ज्योतिषशास्त्रदृष्ट्या भूच्छाया हि चन्द्रग्रहणस्य हेतुत्वेन सिद्ध्यति। उक्तञ्च सिद्धान्तशिरोमणौ-

16. नैषधीय नारायणीटीकायां 15/42
17. नैषधीये 9/ 117
18. बृहत्पाराशरहोराशास्त्रम्, अष्टकवर्गःश्लो.17-18
19. नैषधीये 12/94

**राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगच्छादतीनबिम्बम्।**
**तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतत्।।**[20]

इदमेवतथ्यं वराहमिहिरोऽपि स्व कालजयीसंहिताग्रन्थे एवमुक्तम्-

**भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।**
**प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात्।।**[21]

पुराकाले ग्रहणस्य कारणं राहुरिति जनाः जानन्ति स्म। काव्यिक-भावनया शास्त्रसद्भावदृष्ट्या एतादृशं चिन्तनं श्रीहर्षस्य वर्तते। ज्योतिषशास्त्रमान्यः कश्चन भिन्नः सिद्धान्तः स्वीये काव्ये प्रतिपादितम्। तद्भवति- चन्द्रे परिदृश्यमानं कलङ्कयुक्तं चिह्नं पृथिव्याः छाया मात्रम्। यदा दमयन्ती देवान् त्यक्त्वा राजा नलं वरितम् तदानीं कविः वदति- तेजस्वीनः सन्नपि देवानां क्षमा ही तेषां कलङ्ककारणम्। यथा तेजस्वी चन्द्रस्य कृते पृथिवी एव तस्य कलङ्कस्य कारणम्। उक्तञ्च नैषधीये-

**अहो ! महः सहायानां सम्भूता भवतामपि।**
**क्षमैवास्मैकलङ्काय देवस्येवामृतद्युतेः।।**[22]

इदं तथ्यं कदाचित् ज्योतिषशास्त्रं स्वीकुर्यात् परन्तु आधुनिकं विज्ञानं चन्द्रे दृश्यमानं कलङ्कं पृथिव्याः छायानेति वदति। कथमिति चेत् साम्प्रतं चन्द्रपृष्ठं प्रति वैज्ञानिकाः गत्वा चन्द्रपृष्ठस्थस्थितिं दृष्ट्वा निगदन्ति यत् चन्द्रे परिदृश्यमानं कलङ्कं तत्रस्थाः पर्वताः गिरयश्च सन्ति। निष्कर्षत्वेन नैषधीयचरितस्यानुसन्धानेन अध्ययनेन च ज्ञायते यत् महाकवेः श्रीहर्षस्य काव्यरचनाकौशलेन साकं ज्योतिषशास्त्रीयं गभीरं ज्ञानमासीदिति दिक्।

---

20. सिद्धान्तशिरोमणौ, ग्रहणवासना श्लो. सं.10
21. बृ.सं.राहुचारः श्लो.सं.-8
22. नैषधीये 17/129

# श्रीमद्देवीभागवते ज्योतिषशास्त्रम्

**डॉ. हरिनारायणधर द्विवेदी**
सहायकाचार्यः, विभागसंयोजकः
ज्योतिषशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः

वेदपुरुषस्य नयनद्वयरूपं ज्योतिषशास्त्र वेदाङ्गेषु महत्पूर्णं स्थानं लभते। येन प्रकारेण वेदाः पूजिताः, प्रसिद्धाश्च वर्तन्ते तथैव ज्योतिषशास्त्रमपि लोकप्रसिद्धं लोकोपकारकं च वर्तते। अत एव वेदाङ्गे अस्य स्थानं शिक्षादिषु ग्रन्थेषु निगदितं वर्तते-

**''छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते। ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।**
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।[1]''**

अत एव पुराणेषूपपुराणेषु सर्वत्र ज्योतिषशास्त्रस्य चर्चा प्राप्यते। अस्मिन् विषये भणितं विद्यते-

**इन्द्रायुश्चैव दिव्यानां युगानामेक सप्ततिः।**
**अष्टाविंशे शक्रपाते ब्रह्मणश्च दिवानिशम्।।**
**एवं त्रिंशद्दिनैर्मासो द्वाभ्यामाभ्यामृतुः स्मृतः।**
**ऋतुभिः षड्भिरेवावदं ब्रह्मणो वै वयः स्मृतः[2]**

अस्याशयः वर्तते एकसप्ततिः (71) दिव्ययुगानां मेलयित्वा एकः इन्द्रायुः भवति। अयं इन्द्रायुः अष्टधा यदा गच्छित तदा एकः ब्रह्मणः दिव्यदिनाम्भवति। एवमेव त्रिंशदिव्यदिनानां मेलयित्वा एकः दिव्यमासः भवति। दिव्यद्वयं मासमाहत्य एकः ऋतुः भवति। षड् ऋतून आहत्य एकं वर्षं द्वादशमासात्मकं भवति। एवञ्च शतं दिव्यवर्षमादाय एकब्राह्मणः आयुः भवति।

**वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा।**
**मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी।। 1.1.10**

ब्रह्मणः आयु विषये निगदित देवीभागवते-

**ततः परस्तादचलो लोकालोकेति नामकः।**
**अन्तराले च लोकालोकयोर्यः परिकल्पितः।।**
**यावदस्ति च देववर्षे ह्यन्तरं मानसोत्तरात्।**
**सुमेरोस्तावती शुद्धा काञ्चनी भूमिरस्ति हि।।[3]**

1. पाणिनीय शिक्षा श्लो. 41, 42
2. श्रीमद्देवीभागवत-09-38-50, 51
3. तत्रैव-8-14-1, 2

अस्मिन्नेव पुराणे सूर्यस्य गति-विषये चर्चा प्राप्यते, पुष्करद्वीपे शुद्धोदसागरात अग्रे लोकालोक-नामकः एकः विशालः पर्वतः विद्यते। अत्र द्विप्रकारकः लोकः प्राप्यते। तत्र एकस्मिन् लोके प्रकाशः प्राप्तः भवति द्वितीये लोके प्रकाशाभावः दृश्यते। द्वयोर्मध्ये पर्वतोऽयं सीमांशरूपः वर्तते।

मानसोत्तरपर्वतात् सुमेरुपर्वतपर्यन्तं यावत् लम्बमानं दूरं वर्तते। तथैव अस्य पर्वतस्य परिमापः वर्तते। अत्र सर्वसाधारण-प्राणिनः वासं न कर्तुं शक्नुवन्ति। स्थानमिदं देवानां वासाय वर्तते। यदि अत्र कोऽपि पदार्थः उच्चात् अधः पतति तदापि पृथक् खण्डितो न भवति। अतः अत्र मात्रदेवाः एव निवसन्ति। अस्य पर्वतस्याधीनाः सूर्यादारभ्य ध्रुव-ग्रह-नक्षत्रादयः वर्तन्ते। अस्मात् कारणादेव एतेषां ग्रहनक्षत्राणां प्रकाशः लोकालोक-पर्वतात् पृष्ठस्थ-निवासिनां जनानां कृते प्रकाशारम्भो भवति। लोकालोक-पर्वतोऽपरि ब्रह्मणः चत्वारः दिग्पालाः भवन्ति। इमे सर्वे लोकान् रक्षन्ति। पृथिव्याकाशयोर्मध्ये ब्रह्माण्डो विद्यते। अस्य मध्यभागे सूर्यः निवसति। एवमेव सूर्यमण्डलात् ब्रह्माण्डमण्डलं भूमण्डालात् पञ्चविंशति योजनात् दूरं विद्यते।

**तावदेवापदो दूरे तिष्ठन्ति परिपेलवाः।**
**यावदेव न महोस्य प्रसरः पुत्र दीयते।। 1.1.102**

मृतनाम चेतनशून्याण्ड-स्थितस्य सूर्यस्य नाम मार्तण्डोऽपि भवति। हिरण्यभयात् ब्रह्माण्डात् उत्पन्नात् सूर्यस्यापरः नाम हिरण्यगर्भोऽपि वर्तते। अत एव अयं सूर्यः दिक्, काल, आकाश, अन्तरिक्ष, पृथ्वी, स्वर्ग, नरक, पातालादीनां विभाजको भवति। यदि अयं सूर्यः न स्यात्तदा इयं सृष्टिरपि न स्यात्। सर्वेषां देव-दानव-मानव-पशु-पक्षी-स्थावर-जङ्गम-प्राणिनां प्राणस्वरूपात्मा सूर्य एव भवति। उक्तं हि विद्यते देवीभागवते-

**सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः।**
**मृतेण्ड एष एतस्मिञ्जातो मार्तण्डशब्द भाक्।।**
**हिरण्यगर्भ इति यद्धिरण्याण्ड समुद्भवः।**
**सूर्येण हि विभज्यन्ते दिशः खं द्यौर्महीभिधा।।**
**स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः।**
**देवतिर्यन्मुष्याणां सरीसृपसवीरुधाम्।।**
**सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः।**
**एतावान्भूमण्डलस्य सन्नवेश उदाहृतः।।**[4]

सूर्यस्य त्रिधा गतिर्भवति- शीघ्रा, मन्दा, समा इति। तथैव ग्रहणाम् अवस्थात्रयं भवति। 1. जारद्गवः 2. ऐरावतः 3. वैश्वनारः। एवमेव सूर्यस्य गतेः संज्ञारूपम्भवति- आरोहणम् अवरोहणञ्च। इयं गतिः जारद्गवः मध्ये भवति। ऐरावतः उत्तरे भवति। वैश्वनरः दक्षिणे भवतिः। प्रत्येकं दिशि अव्युच्छिन्न चिदात्मैकः पुमानस्तीह नेतरत्।

4. तत्रैव-8-14-17, 18, 19, 20

**स्वसंकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते।। 1.3.47**

वीथीत्रयं भवति। अस्यां वीथौ अश्विनी, भरणी, कृत्तिकानां नागवीथी कथ्यते। रोहिणी-मृगाशिरा-आर्द्राणां गजवीथी भवति। एवमेव पुनर्वसु-पुष्य-श्लेषानां ऐरावतवीथी कथ्यते। मघा- पूर्वाफाल्गुनी-उत्तराफाल्गुनीनाम् आर्षवीथी कथ्यते। हस्त-चित्रा-स्वातीनां गोवीथी भवति। विशाखा-अनुराधा-ज्येष्ठानां जारद्गववीथी भवति। मूल-पूर्वाषाढ़ा-उत्तराषाढानाम् अजवीथी भवति। श्रवण-धनिष्ठा-शतभिषानां मृगवीथी भवति। पूर्वाभाद्रपद-उत्तराभाद्रपद-रेवतीनां वैश्वानरवीथी भवति। अजवीथी, मृगवीथी, वैश्वानरवीथीनां दक्षिमार्गः भवति। उक्तं विद्यते-

**उदयास्तसमये चैव सर्वकालं तु सम्मुखे।**
**दिशास्वशेषासु तथा सुरर्षे विदिशासु च।।**
**यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः।**
**तिरोभावं च यत्रेति तत्रैवास्तमयं रवेः।।**
**नैवास्तमनमर्कस्य नोदयः सतः।**
**उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः।।**[5]

सुमेरुपर्वते ये प्राणिनः निवसन्ति तेषां मध्याह्नस्य सदैव प्रतीतिः भवति। यद्यपि सूर्य-रथः सर्वदा सुमेरुतः वामे प्रचलति। तथापि तेजसा वायुना प्रेरणया दक्षिणदिशि सूर्यो भवति। सूर्यः उदयकाले अस्तकाले च सर्वदा सर्वेषां सम्मुखो भवति। अत एव दिशासु विदिशासु ये केऽपि प्राणिनः निवसन्ति सर्वेषां प्राणिनां कृते सूर्यस्य दर्शनं भवति। एवम् उदयास्तकालः-

**ज्ञातज्ञेयस्य मनसो नूनमेतद्विलक्षणम्।**
**न स्वदन्ते समग्राणि भोगवृन्दानि यत्पुनः।। 1.3.5.6**

वस्तुतः सूर्यस्योदयः अस्तश्च न भवति। सप्तर्षिमण्डलात् ध्रुवलोकः त्रयोदशलक्षमुपरिवर्तते। अस्य नाम विष्णुपादोऽपि वर्तते। अत्रैव त्रिलोकवन्दितः ध्रुवः निवसति। देवनम्यः ध्रुवः कथ्यते। यतोहि इन्द्र-अग्नि-कश्यपादयो मुनयः ध्रुवं दृष्ट्वा प्रणामाञ्जलिं समपर्यन्ति। कालः कदापि तिष्ठति। दृष्टोऽपि न भवति। अस्य कालस्य ध्रुव-नक्षत्रादयः ज्योतिर्गणाः निरन्तरं भ्रमणं कुर्वन्ति। ऐषां केन्द्रस्थः ध्रुवः भवति। सर्वे ग्रहाः ध्रुवं परितः भ्रमन्ति। इमे ग्रह्यः वायुना प्रेरिताः भवति।

लोके यथा श्येन-पक्षी आकाशे विचरति तथैव भ्रमणशीला सर्वेऽपि ग्रहाः ध्रुवं भ्रमन्ति। भूमौ न पतन्ति। यतोहि प्रकृति-पुरुष-रूपेण स्थितः ब्रह्मा सदा इमान् रक्षन्ति। उक्तं विद्यते-

**अधस्तात्सवितुः प्रोक्तमयुतं राहुमण्डलम्।''**

सिहिंका गर्भादुत्पन्नः राहुः नक्षत्रसमं आकाशे विचरति। यद्यपि सूर्य-चन्द्रयोः अयं यथासमयं कष्टकारको भवति। तथापि विष्णोः प्रसादेन अमरत्वं प्राप्तः राहुः ब्रह्मणः विधानात् ग्रहदेवतासु मध्ये परिगणितः संजातः। राहु-ग्रहात् नीचैः सिद्धचरणानां विद्याधारणां पावनः लोकः विद्यते। अस्मिन्नेव पुराणे

5. तत्रैव-8-14-22, 23, 24

अन्तरिक्षस्य विषयेऽपि तत्र बहुसुन्दरं वर्णनं प्राप्यते। यथा-

**ततोऽप्यधस्ताद्देवर्षे यक्षाणां च सरक्षसाम्।**
**वासनातानवं राम मोक्ष इत्युच्यते बुधैः।**
**पदार्थवासनादार्ढ्यं बन्ध इत्यभिधीयते।। 1.3.5.7**
**पिशाचप्रेतभूतानां विहाराजिरमुत्तमम्।।**
**अन्तरिक्षं चलत्प्रोक्तं यावद्वायुः प्रवति हि।**
**यावन्मेधास्तथोद्यन्ति तत्प्रोक्तं ज्ञानकोविदैः।।**[6]

इत्थं देवीभागवते ज्योतिषशास्त्रस्य अद्भुतं तथ्यपूर्णं विवेचनं विद्यते। अतएव पुराणानामध्ययनं कर्तव्यमिति दिक्।

**दीर्घायुर्विषये युधिष्ठिरं प्रति-भीष्मोक्तिः-**

**युधिष्ठिर उवाच-**

शतायुरुक्तः पुरुषः शतवीर्य्यश्च जायते।
कस्मात्स म्रियते पुरुषः बाला अपि पितामहः?।।

**भीष्म उवाच-**

अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि।
अल्पायुर्येन भवति दीर्घायुर्वापि मानवः।
आचाराल्लभते आयुराचाराल्लभते श्रियम्।
आचाराल्लभते कीर्त्तीं पुरुषः प्रेत्य चेह च।।
दुराचारी हि पुरुषो नेहायुर्विन्दते महान्।
यस्मात् त्रसन्ति भूतानि तथा परिभवन्ति च।।
आचारलक्षणो धर्मः सन्तश्चरित्रलक्षणः।
साधूनाञ्च यथा वृत्तमेतदाचारलक्षणम्।।

6. तत्रैव-8-18-10, 11

# चन्द्रशृङ्गोन्नतिविचारः

**डा. विजयलक्ष्मीमहापात्रः**
सहायकाचार्या
ज्योतिषशास्त्रविद्याशाखा,
श्री सदाशिवपरिसरः, पुरी

ग्रहर्क्षादि-पिण्डनामाधारेण लोके शुभाशुभ-निरूपणमेव ज्योतिषशास्त्रस्य मुख्यप्रयोजनम्। तत्रापि चन्द्राधारेण तदधिकं विचारितमस्ति। क्रमेऽस्मिन् चन्द्रस्याकृतिवशात् समर्घ-महर्घता विचारे च प्रकृतविषयस्यावश्यकता भवति। अतोऽत्र चन्द्रशृङ्गोन्नति-विचारोपस्थाप्यते। चन्द्रशृङ्गयोरेकतरस्योन्नति चन्द्रश्रृङ्गोन्नतिरिति। चन्द्रविम्बे शुक्लस्यापचयोपचयवशादर्धाल्पे शुक्लाशुक्लप्रान्तयोराकृतिः शृङ्गवद् दृश्यते। तत्रापि उभयोः प्रान्तयोः द्वे शृङ्गे भवतः। तयोः कदाचिदुभयोः शृङ्गयोः समता कदाचिच्चैकस्य शृङ्गस्योन्नतिः भवति। अतस्तयोरेकतरस्योन्नतिः शृङ्गोन्नतिरिति।

वस्तुतश्चन्द्रे स्वगतप्रकाशस्याभावः परन्तु सः सूर्यकिरणसंयोगेन प्रकाशितो भवति। यतो हि आकाशे सूर्य एव तेजवान् अन्ये च ग्रहादयः सूर्यकिरणानां प्रभावेणैव ज्योतियुक्ता दृश्यन्ते। अतश्चन्द्रविम्बस्य यस्मिन् भागे सूर्यकिरणाः लगन्ति सोज्वलः तदितर-भागशच अनुज्वलो भवति। कृष्णपक्षस्योत्तरार्धे शुक्लपक्षस्य पूर्वार्धे च चन्द्रस्य किञ्चिद् भागोऽर्धर्द्दल्पभागः प्रकाशितः दृश्यते। तस्य प्रकाशित भागस्योभयपार्शे द्वौ भागौ शृङ्गवत् दृश्येते। शुक्लपक्षे प्रतीच्यां सूर्यास्तादनन्तरं कृष्णपक्षे च। सूर्योदयाद्पूर्वं तेषामपि विशेषतः शुक्लप्रतिपदान्ते कृष्णचर्तुदश्यान्ते च चन्द्रस्य दर्शनं शृङ्गवत् भवति। तस्मिन् समये चन्द्रमसः प्रकाशित-भागस्यानयनं कस्यां च दिशि शृङ्गोन्नतिरस्तीति वर्णनमस्ति। शृङ्गयो रशुक्लवृतदृश्यवृतसम्पातयोरेकतरस्योन्नतिरिति शृङ्गोन्नतिः।

चन्द्रविम्बः भूविम्वम्परितो भ्रमन् दृश्यते। तथा च चन्द्रविम्बगत कलङ्कं कोऽपि परिवर्तनं न दृश्यते। अतश्चन्द्रविम्बे स्वगतमौज्ज्वल्यं न विद्यते। चन्द्रः सूर्यकिरणः प्रकाशितो भवति। यस्मिन् भागे रविकिरणाः पतन्ति स एव भागः उज्ज्वलस्तदितरोऽनुज्वल इति । यथोक्तं भास्करेण[1] -

**तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति ।**
**तदितरदिशि बालाकुन्तलश्यामलश्रीर्घट इव निजभूमिच्छाययैवातपस्थः ।।"**

तत्र यतो रविविम्बाच्चन्द्रविम्वमल्पमस्त्यतो रविकिरणसंयोगाच्चन्द्रविम्बस्यार्धाधिक भागः प्रकाशितोऽर्धाल्पश्चाप्रकाशितो भवतीत्युक्तं कमलाकरेण .....[2]

1. सि.शि.गोलाध्यायः शृङ्गोन्नति- श्लो.सं - 1
2. सि.त.वि. शृङ्गोन्नत्याधिकारः - श्लो.सं - 1-2

**"स्वतस्तैजसादर्कगोलात्सदाऽल्पो विधोर्नीरगोलोऽर्करश्म्यन्तरे यः ।**
**सहस्रांशुदिश्यस्य चार्धाधिकं यत् भवेदुज्वलं स्वोर्ध्वतद्रश्मिसङ्गैः ।।**
**तदर्धाल्पकं चान्यदिक्स्थं रवेर्यत्वशुक्लं स्वभान्तः स्थितं सर्वदैव ।**
**सितं चासितं वोध्यमर्काल्पकानां तदन्याम्बुगोलात्कानामपीत्थम् ।।**

तथा च –[3]

**ये च निरमया गोलास्तेजोगोलाद्विवस्वतः।**
**स्वल्पाः स्युः सर्वतद्गोले शौकल्यमर्धाधिकं भवेत् ।।"**

अमान्ते सूर्यचन्द्रौ एकसूत्रगतौ भवतः। सूर्यकक्षाधश्चन्द्रः कक्षाऽतोऽमान्ते चन्द्रस्योर्ध्वभाग उज्ज्वलो भवति। अधश्चार्धाद् पृथिवी सम्मुख भागोऽनुज्ज्वलः। यथा यथा चन्द्रोऽग्रे गच्छन् षड् भान्तोरितो भवति तदा पूर्णोऽनुज्वलितभागः पृथिव्याभिमुखो भवति। इयं स्थितिः पूर्णिमासंज्ञिका भवति। यथोक्तिः -[4]

**सूर्य्यादधःस्थस्य विधोरधःस्थमर्धं नृदृश्यं संकलासितं स्यात्।**
**दर्शेऽथ भार्धान्तरितस्थ शुक्लं तत्पौर्णमास्यां परिवर्तनेन ।।**

अमान्ते चन्द्रस्योऽर्ध्वभागस्तु रविकिरणैः शुक्लो भवति। परन्त्वधो भागः कृष्णः अदृश्यश्च भवति। सोऽमान्तकालः एव। अयमेव चन्द्रस्यास्तकालः। ततश्चन्द्रश्शीघ्रगत्या पूर्वाभिमुखं गच्छन् सूर्याद् पूर्वदिशि यदाऽर्कांशान् (120) यावदन्तरितं भवति तदैव चन्द्रस्य दृश्यभागस्य शुक्लारम्भो भवति। स एव चन्द्रोदयकालः अर्थात् यथाऽर्कचन्द्रयोः पूर्वापरान्तरं द्वादशांशात्मकं भवति तदा चन्द्रस्योदयास्तौ भवतः। तद्यथा सूर्यसिद्धान्ते[5]

**उदयास्तविधिः प्राग्वत् कर्त्तव्यः शीतगोरपि ।**
**भागैर्द्वादशभिः पश्चात् दृश्ये प्राग् यात्यदृश्यताम्।**

यदाऽर्कचन्द्रयोरन्तरं भगणचतुर्थांशसमं भवति तदा चन्द्रस्यार्धभागमुज्वलं दृश्यते। अमान्ताद् पूर्णिमान्तं यावच्चन्द्रस्य शुक्लभागस्य वृद्धिर्भवति। पूर्णिमान्ते शुक्लमानं पूर्णो भूत्वा शनैः शनैः क्षीयते तावदेवामान्ते शुक्लस्याभावो दृश्यते। यथोक्तं भास्करेण-[6]

**कक्षा चतुर्थे तरणेर्हि चन्द्रकर्णान्तरे तिर्यगिनो यतोऽब्जात् ।**
**पादोनषट्काष्टलवान्तरेऽतो दलं नृदृश्यस्य दलस्य शुक्लम् ।।**

---

3. सि.त.वि. विम्बाधिकारः - श्लो.सं - 36
4. सि.शि. गोलाध्यायः - शृ.वा.श्लो.सं. - 2
5. सूर्यसिद्धान्तः चन्द्रशृङ्गोन्नत्याधिकारः दशमोध्यायः, श्लो.सं - 1
6. सि.शि.गो. शृ.वा श्लो.सं. 3, 4

**उपमितिमुपयाति शौक्ल्यमिन्दोस्त्यजत इनं व्रजतश्चमेचकत्वम् ।**
**जलमयजलजस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपतास्य ।।**

गोलीयसिद्धान्तानुसारेणाकाशस्थानां सर्वेषामेव विम्वानाम् अर्धाल्पमेव भूपृष्ठस्थाः जनाः पश्यन्ति। यतो हि स्वदृष्टिस्थानात् कस्यापि विम्बीयगोलस्य चतुर्दिक्षु कृताभिः स्पर्शरेखाभिराबृतदृष्टि सम्मुखार्धाल्पभाग एव दृश्यो भवति। यथोक्तं वास्तवचन्द्रशृङ्गोन्नतिसाधने-

**श्वस्थानां गोलविम्बानां रूपमर्धाल्पमेवहि ।**
**लोका विलोकयन्तीति स्पष्टं गोलविदां सदा ।।**

शुक्लपक्षे सूर्यास्तासन्ना कृष्णपक्षे च सूर्योदयासन्ना शृङ्गोन्नतिरवलोक्यते। यथोक्तं ग्रहलाघवे-

**मासस्य प्रथमेऽन्तिमेऽयवांऽघ्रौ**
**विधुशृङ्गोन्नतिरीक्ष्यते यदाह्नि ।**
**तपनास्तमथोदयेऽवगम्यास्तिथयः**
**सावयवाः क्रमादगतैष्याः ।।**[7]

**शृङ्गोन्नतिसाधनोपकरणानि –**

सैद्धान्तिकदृष्ट्या मासाद्यपादे पश्चिमक्षितिजासन्ने मासान्तपादे च पूर्वक्षितिजासन्ने शृङ्गोन्नति दर्शनं भवति। परन्तु संहितादिषु मासाद्यपदीयशृङ्गोन्नतेरेव फलोत्पादकत्वेन वर्णनमुपलभ्यते। अतो मुख्यतया सा शुक्लपक्षीया एव साध्यते। शृङ्गोन्नतिसाधनार्थं अभीष्टदिने तात्कालिकौ चन्द्रार्कौ कृत्वा नतोन्नतघटीद्वारा शङ्क्वादिभिः तयोर्भुजकोटयोरानयनपूर्वकं चन्द्रस्य वास्तविकशुक्लाङ्गुलसाघनेन च शृङ्गोन्नतिसाधनं भवति। तत्र शंकुमूलात् पूर्वापरसूत्रयोरन्तरं भूज लम्बरूपं क्षितिजे भवति। शंकुश्च ग्रहस्थानात् क्षितिधरातलोपरि लम्बः। क्षितिजे शङ्कुमूलस्वोदयास्तसूत्रान्तरं शंकुतलम्, स्वोदयास्त पूर्वापर सूत्रान्तरञ्च अग्रा। अत एतयोः अग्राशंकुतलयोरेकान्यदिशियोगान्तरसंस्कारेण भुजः सिद्ध्यति ।

अत्र चन्द्रभुजे रविभुजः सिद्ध्यति चेत् चन्द्रदिग्गतः चन्द्रभुज एव सूर्यभुजे शुद्ध्यति चेत् तदान्य दिग्गत स्पष्टभुजो भवति। कोटिश्च तत्र ऊर्ध्वाधरा सूर्यचन्द्रयोः केन्द्रगता याम्योत्तरवृतसमानान्तर धरातलयो लम्बरूपा भवति। अस्याः साधनं सूर्याचन्द्रमसोः शङ्कुयोगेन भवति। सूर्योदयकाले सूर्यस्य क्षितिजगतत्वात् रविशङ्क्वाभावः चन्द्रशङ्कुमिता च कोटि भवति। परञ्च सूर्यास्तानन्तरं सूर्योदयात् प्राक् च चन्द्रसूर्योयोः शङ्कुयोगेन स्पष्टकोटिः सिद्ध्यति। एतयोः स्पष्टभुजकोट्योवर्गयोगमूलेन चन्द्रसूर्ययोः केन्द्रान्तररूप कर्णो भवति ।

शृङ्गोन्नत्यानयनविषये स्वयमेव भास्कराचार्येण गणिताध्याये विवेचनं कृतम्। अत्र तैः केवलं

7. ग्रहलाघव.शृङ्ग.श्लो.1

शृङ्गोन्नतिवासनायाः स्वल्पमेव वर्णनं प्रदत्तम्। भास्कराचार्यात् प्राक् पश्चात् वा सर्वे ज्योतिर्विदः शृङ्गोन्नति विवेचनं कृतवन्तः। तेषां मध्ये विशेषतः कमलाकरभट्टैः भास्करस्य खण्डनं बहुषु स्थानेषु कृतम्। तैः चन्द्रविम्बस्य दृश्यशुक्लभागं समुचितं ज्ञात्वा सितांशं विम्बान्तरसूत्रयोः साधनञ्च कृत्वा सितांशेभ्यः शुक्लाङ्गुलानि साधितानि । तद्यथा[8]-

**तदन्तरज्या रविकर्णनिध्नी चन्द्रार्कविम्बान्तरसूत्र भक्ता ।**

**लब्धस्य चापं विधुवृतसंस्थं तद् भागतिभ्यं शमितं स्थितं स्यात् ।।**

परन्तु सिताङ्गुलनयनं तेनापि न युक्तियुक्तं विहितम्। अतो म.म.पं. सुधाकरं द्विवेदिभिः वास्तवरूपेण कृतम्। तैस्तत्र सर्वेषामाचार्याणां युक्तायुक्तमतानामालोचनं प्रदर्शय नवीनरीत्या परिलेखोऽपि प्रदर्शितः[9]।

वास्तव दृश्यवृतभूतले वास्तवशुक्लस्य परिणामं दीर्घवृत्तत्वं जायते। प्राचीनैराचार्यै वृत्तत्वमेवाङ्गीकृत्य परिलेखः प्रदर्शितः। कुत्र कस्मिन् देशे सदैव चन्द्रशृङ्गोन्नत्युन्नते भवतः। प्रायः गणितागतेन पञ्चाशदंशात्मकाक्षांश देशेषु सदा चन्द्रस्योतरशृङ्गं उन्नतं भवति। प्रसङ्गेऽस्मिन् म.म. सुधाकरणोक्तम्, यथा[10]-

**त्रिज्यागुण्यः सुधांशोः परमशरगुणः कालजीवाविभक्ताः ।**

**चापंलब्धस्य लब्धं यदिह वुध वरै स्तदुतान्त्य पमांशाः ।।**

**तेभ्यऽनल्पा पलांशाः सितविधिकुशलाः । यत्र तत्रोन्नतिः स्यात् ।**

**शृङ्गस्यैवोत्तरस्यां दिशि सकलतिथिष्वेव विद्वद्वरिष्ठा ।।**

**शृङ्गोच्चज्ञानम्** – शृङ्गयोः समत्वादि विवेचनावसरे भास्करेण पूर्वाचार्याणां ब्रह्मगुप्तादीनां कोटि-कर्णवशात् साधितं शृङ्गसमत्वतादिलक्षणं खण्डनं प्रोक्तं यत्-

**शृङ्गे समे स्तो यदि बाह्वभाव उर्ध्वाधरे ते यदि कोट्यभावः[11]।**

**त्रिज्या समौ तस्य च कोटिबाहू किंवा ममानेन नमो महद्भ्यः ।।**

परन्तु सिद्धान्तेनानेन एकस्यामेव स्थितौ भुज-कोटियोरभाववशात् दोषः आयाति। तद्यथा- यदा क्रान्तिवृतं पूर्वापरवृत्तानुरूपं स्यात्तदा स्वमध्यादुभयदिशि पादोनषट्काष्टकदलाल्पभागैर्नतांशैर्यदि रविचन्द्रौ तिष्ठतस्तदा तत्र तयोरेकवृतगतत्वात् स्पष्टभुजाभावः। तथा च तदुन्नतांश साम्यात् शंक्वोः साम्यं तत्संस्कारेण च स्पष्टशंकुरूपायाः कोटेरभावादेकत्रैव सम उर्ध्वाधरशृङ्गयोः लक्षणं घटते। परन्तु वस्तुतोऽत्र शृङ्गयोः समतैव भवति। एवमेव पूर्वापर-याम्योतरभिन्नाकारगतदृग्वृत्तेः स्थितयोः सूर्यचन्द्रयोः

8. सि.त.वि.शृ.अ.श्लो.सं- 30
9. वा.च.शृ.सा.श्लो.सं – 75-79
10. वा.च शृ.सा.श्लो.सं – 83
11. सि.शि.गणित.शृङ्गोन्नत्याधिकारे श्लो.सं.12

स्वस्वस्तिकात् पादोनष्टकाष्टदलाल्पैः समनतांशैरन्तरितयोः शङ्क्वोः समत्वात् स्पष्ट शङ्कोरभावः शृङ्गयोरूर्ध्वाधरता च सिद्ध्यति।

परन्त्वत्र भुजयोः समत्वादपि स्पष्टभुजाभावात् शृङ्गसमतानायति। वस्तुतोऽत्रापि शृङ्गसमत्वमेव भवति। अतएव मतस्यास्य कमलाकरेण विस्तृतरूपेण खण्डनं कृतं वर्तते। **"यस्यां सहस्रकिरणदिशि तत्र नूनमालोक्यते शशधरस्य सितान्नतत्वम्"**[12] इति सिद्धान्तशेखरोक्तया चन्द्राद्यस्यां दिशि सूर्यो भवति तस्यामेव दिशि चन्द्रसितोन्नतत्वं दृश्यते। तत्र सूर्याच्चन्द्रदिश्यैव भुजः भुजदिशि वलनदानमतो कमलाकरोक्तभास्करोक्तेन च **"स्यात् तुङ्गशृङ्गबलनान्यदिकस्थम्"** इत्यादिना वलनान्यदिक्स्थं चन्द्रशृङ्गौट्यं सूचितमस्ति। सामान्यतया याम्यशृङ्गोन्नतश्चन्द्रोऽशुभः सौम्यशृङ्गोन्नतश्च शुभकारको भवति। यदाह नारदः[13]

**याम्यशृङ्गोन्नतः नेष्ठः सौम्यशृङ्गोन्नतः शुभः ।**
**शुक्ले पिपीलिकाकारे हानिवृद्धि यथाक्रमात् ।।**

तत्राश्विन्यादिनक्षत्रेषु मेषादिराशिषु च शृङ्गोन्नतिवशात् शुभाशुभं समर्घः महर्घश्च विस्तरेण निरूपितोऽस्ति। क्रमेऽस्मिन् मीन-मेषयोर्याम्योन्नतशृङ्गोऽशुभप्रदः, मिथुनमकरयोः सौम्योन्नतः श्रेष्ठः वृषकुम्भयोः समः। कर्कसिंहयोः शरसन्निभः, धनुवृश्चिकयोः स्थूलः, कन्यातुलयोः स्थूल सदृशश्चन्द्रशृङ्गः, सुभिक्षप्रदोऽन्यथा दुर्भिक्षकारकः कलहप्रदश्च भवति।

एवमेव चन्द्रशृङ्गे मण्डले वा भौमादिग्रहैः निहिते क्रमेण क्षेम-अर्थ-दृष्टि-नृपति-जनानाञ्च नाशकृत् भवति। यथोक्तं तत्रैव –

**कुजाद्यैर्निहिते शृङ्गे मण्डले वा यथाक्रमम् ।**
**क्षेमार्थवृष्टि नृपति जनानां नाशकृच्छशि ।।**

शृङ्गोन्नतेः ह्रासवृद्धिवशेन भूस्थपदार्थेषु मानवादीनां जीवनेषु च परिवर्त्तनं परिदृश्यते। विशेषतया चन्द्रशृङ्गोन्नतेः प्रयोजनं संहिताग्रन्थेषु समुपलभ्यत इति।

---

12. सिद्धान्तशेखरे-
13. नारदसंहिता –अ.2, श्लो.-8

# स्कन्धत्रयात्मके ज्योतिषशास्त्रे संहिताशास्त्रस्य वैशिष्ट्यम्

**वेदप्रकाशपाठकः**
सिद्धान्तज्योतिषाचार्यः
ज्योतिषशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः

वेदाङ्गेषु चक्षुःस्वरूपस्य अनेकभेदयुक्तस्य निर्मलज्योतिषशास्त्रस्य त्रयः प्रधानभेदाः सिद्धान्त-संहिता-होराख्याः प्रमुखैः सर्वैरपि पूर्वाचार्यैः वर्गीकृताः। केषाञ्चन आचार्याणां मतानुसारेण प्रश्न-रमलेति स्कन्धद्वयं स्वीकृत्य पञ्च प्रभेदाः सन्तीति। परं स्कन्धत्रये न विद्यते कस्यापि विप्रतिपत्तिः। तद्यथा दैवज्ञो वराहमिहिरः-

**ज्योतिषशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।** [1]

तत्र सिद्धान्तापर नाम्नः गणितस्य लक्षणमाह भास्करः -

**त्रुट्यादि प्रलयान्तकालकलनमानप्रभेदः क्रमाच्-**
**चारश्च द्युसदां द्विधा गणितं प्रश्नास्तथा सोत्तराः ।।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।**[2]

अर्थात् सिद्धान्ते कालमाननिरूपणम्, अहर्गणानयनम्, वेधगणिताभ्यां ग्रहस्फुटीकरणम्, दिग्देश-कालज्ञानोपायनिरूपणम्, तथा कतिपय-तन्त्र-करण-व्यक्ताव्यक्त-चाप-ज्या-क्षेत्रगणितविषयाश्च विराजन्ते।

अथ द्वितीयसंहिताभागस्य लक्षणमाह बृहत्संहिताकारः[3] -

तत्र दिनकरादीनां ग्रहाणां चारास्तेषु च प्रकृति-विकृति-प्रमाण-वर्ण-किरण-द्युति-संस्थान-अस्तमन-उदय-मार्गमार्गान्तर-वक्र-अनुवक्रर्क्ष-ग्रहसमागमचारादिभिः फलानि नक्षत्रकृतविभागेन देशेष्वगस्त्यचारः सप्तर्षिचारः, ग्रहभक्तयो नक्षत्रव्यूह-ग्रहश्रृङ्गाटक-ग्रहयुद्ध-ग्रहसमागम-ग्रहवर्षफल-

---

1. बृहत्संहिता-१/९
2. सिद्धान्तशिरोमणिः मध्यमाधिकारे कालमानाध्याये श्लो.सं. ६
3. बृहत्संहिता-२/७

गर्भलक्षणरोहिणी-स्वात्याषाढीयोगाः सद्योवर्षकुसुमलता-परिघपरिवेषपरिघपवनोल्का दिग्दाहक्षितिचलन-सन्ध्याराग-गन्धर्वनगर-रजोनिर्घातार्घकाण्ड-सस्यजन्मेन्द्रध्वजेन्द्रचापवास्तु-विद्याङ्ग-विद्या-वायस -विद्यान्तर-वक्रमृग-चक्राश्वचक्र-वातवक्र-प्रसादलक्षण-प्रतिमालक्षण-प्रतिष्ठापन-वृक्षायुर्वेदो-दकार्गलनीराजन-खञ्जनकोत्पात-शान्ति-मयूर-चित्रकधूत-कम्बल-खड्ग-पट्ट-कृकवाक-कूर्मगोजा श्वेभ-पुरुष-स्त्री-लक्षणान्यन्तःपुरचिन्ता-पिटक-लक्षणोपानच्छेद-वस्त्रच्छेद-चामर-दण्ड-शयनाशन-लक्षण-रत्नपरीक्षा-दीपलक्षण-दन्तक-काष्ठाद्याश्रितानि शुभाशुभनिमित्तानि सामान्यानि जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्य-कर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। नारदपुराणेऽपि संहितास्कन्धस्य लक्षणम् [4] -

**संहिताशास्त्ररूपं च ग्रहचारोऽब्दलक्षणम् ।**<br>
**तिथिवासर-नक्षत्र-योगतिथ्यर्धसंज्ञकाः ।।**<br>
**मुहूर्तोपग्रहाः सूर्य-संक्रान्तिगोचरः क्रमात् ।**<br>
**चन्द्रताराबलं चैव सर्वलग्नार्तवाह्वयः ।।**<br>
**आधान-पुंस-सीमन्त-जातनामान्तमुक्तयः।**<br>
**चौलं कर्णच्छिदामौञ्जी क्षुरिकाबन्धनं तथा ।।**<br>
**समावर्तनवैवाह-प्रतिष्ठा-सद्मलक्षणम् ।**<br>
**यात्राप्रवेशनं सद्योवृष्टिः कर्मविलक्षणम् ।।**<br>
**उत्पत्तिलक्षणं चैव सर्वं सङ्क्षेपतो ब्रुवे ।।**

इदानीं होरास्कन्धलक्षणमुपस्थाप्यते। तद्यथा वराहः[5] -

होराशास्त्रे च राशि-होरा-द्रेष्काण-नवांशक-द्वादशांश-त्रिंशद्भाग-बलाबल-परिग्रहो ग्रहाणां दिक्स्थान-काल-चेष्टाभिरनेक-प्रकार-बलनिर्धारणं प्रकृति-धातु-द्रव्य-जाति-चेष्टादि-परिग्रहो-निषेक-जन्मकाल-विस्मापन-प्रत्ययादेश-सद्योमरणायुर्दाय-दशान्तर्दशाष्टक-राजयोग-चन्द्रयोग-द्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रय-भावावलोकन-निर्याण-गत्यनूकानि तत्कालप्रश्न-शुभाशुभ-निमित्तानि विवाहादीनां च कर्मणां कारणम्।

एवञ्च नारदपुराणेऽपि[6] -

**जातके राशिभेदाश्च ग्रहयोनि-र्वियोनिजे ।**<br>
**निषेकजन्मारिष्टानि स्यायुर्दायो दशाक्रमः ।।**<br>
**कर्मजीवं चाष्टवर्गो राजयोगाश्च नाभसाः ।**

4. नारदपुराणे-

5. बृहत्संहिता-२/५

6. नारदपुराणे-

**चन्द्रयोगाः प्रव्रज्याख्याः राशिशीलं च दृक्फलम् ।।**
**ग्रहभावफलं चैवाश्रययोगप्रकीर्णके ।**
**अनिष्टयोगाः स्त्रीजन्मफलं निर्याणमेव च ।।**
**नष्टजन्मविधानञ्च तथा द्रेष्काणलक्षणम्।**

एवम्भूतस्य त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य वैशिष्टय-प्रतिपादनावसरे बहुविधतया प्रशांसां कुर्वन् भास्कराचार्यः स्वीये सिद्धान्तशिरोमणौ वक्तिः। तद्यथा[7] -

**वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः॥**
**तस्माद्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम्।**
**यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च॥**

एतेषु प्रभागेषु संहिताभागः प्राणिमात्रे ग्रहप्रभावं कालस्थितिञ्च निरूपयति। सम्यक् हितं प्रतिपाद्यं यत्र सा संहिता। अथवा सम्यक् धीयते स्म इति संहिता। अत्र ग्रहाणां स्वभावाः, विभिन्नोत्पातविषयाः, वृष्टियोगाः, मुहूर्तादयोऽनेके विषयाः प्रतिपादिताः सन्ति। यथोक्तं महर्षिनारदेन[8] -

**संहिताशास्त्ररूपं च ग्रहचारोऽब्दलक्षणम्।**
**तिथिवासरनक्षत्रयोगतिथ्यर्धसंज्ञकाः।।**
**आधानपुंससीमन्तजातनामान्नभुक्तयः।**
**चौलं कर्णच्छिदा मौञ्जी क्षुरिकाबन्धनं तथा।।**
**समावर्तनवैवाहप्रतिष्ठानसद्मलक्षणम्।**
**यात्रा प्रवेशनं सद्यो वृष्टिः कर्मविलक्षणम्।।**

अर्थात् ग्रहचार-अब्दलक्षण-तिथि-वासर-नक्षत्र-योग-तिथ्यर्ध(करण)-आधान-पुंसवन-सीमन्त-जातकर्म-नामकरण-अन्नप्राशन-चौलकर्म-कर्णवेध-मौञ्जीबन्धन-क्षुरिका-बन्धन(चूडा-करण)-उपनयन-समावर्तन-विवाह-प्रतिष्ठा (वापी-कूप-तडाग-मन्दिर-गृहादीनां प्रतिष्ठा-सद्मलक्षणम् (गृहारम्भवास्तुकर्मादि)-यात्रा(अपूर्व-सपूर्व-द्वन्द्व)-प्रवेशन-सद्योवृष्टि-कर्मविलक्षण-(शकुनम्) प्रभृतीनि संहितास्कन्धान्तर्गतानि तत्त्वानि विलसन्ति।

सामान्यतः संहिताशास्त्रे सूर्यादीनां विशेषेण नक्षत्रेण सहोदयेन प्राणिषु सम्भवि प्रभावो ग्रहकृतपरिवर्तनं वर्षादियोगाच्च विषयाः संहितान्तर्गता भवन्ति। स्कन्धस्यास्य आरम्भः कदा जातः इति वक्तुं न शक्यते। वस्तुस्तु अस्य पर्याप्ता सामग्री वैदिकसंहितायां समुपलभ्यते। तद्यथा [9]-

7. सिद्धान्तशिरोमणिः-१/
8. नारदपुराणे-
9. अथर्ववेदः

**नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृत्याः।**

**शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ।।**

न केवलं संहितायां ब्राह्मणे वा अपितु पुराणे संस्कृतसाहित्येऽपि शुभाशुभनिर्देशकानि वाक्यानि स्पष्टतया विनिर्दिष्टाः दृश्यन्ते। तद्यथा रामायणे[10] -

**युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः।**

**भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ।।**

पुनश्च वाल्मीकिरामायणे श्रीरामचन्द्रस्य जन्मकालवर्णनावसरे ऋतु-मास-तिथि-लग्नादि विविधाकाशीयविषयाणां विशद् वर्णनं प्राप्यते। तद्यथा[11] -

**ततो यज्ञे समाप्ते तु ऋतुनां षट् समत्ययुः।**

**ततश्च द्वादशे मासे चैत्रे नवमिके तिथौ।।**

**नक्षत्रेऽदिति दैवत्ये स्वोच्चसंस्थेषु पञ्चषु।**

**ग्रहेषु कर्कटलग्ने वाक्पताविन्दुना सह।।**

**प्रोद्यमाने जगन्नाथं सर्वलोक नमस्कृतम्।**

**कौशल्या जन्मद्रामं दिव्यलक्षण संयुतम् ।।**

अर्थात् चैत्रमासे नवमीतिथौ, अदितिनक्षत्रे, स्वोच्चसंस्थेषु पञ्चषु ग्रहेषु, कर्कलग्ने किञ्च चन्द्रबुधयोः संयुते दिव्यलक्षणयुस्तस्य श्रीरामचन्द्रस्य जन्म बभूव। अग्रे महाराजदशरथस्य मृत्यसूचकानां लक्षणानां वर्णनावसरे महर्षिः वाल्मीकि इत्थं प्रतिपादयति [12]-

**अपि चाद्याशुभान् रामस्वप्ने पश्यामि दारुणम्।**

**सानिर्घता महोल्काश्च पतिता हि महाघनाः ।।**

**अवष्टब्धं च मे राम नक्षत्रं दारुणैः ग्रहैः ।**

**आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ।।**

**प्रायेण हि निमित्तानामीदृशानां समुद्भवे ।**

**राजा हि मृत्यमाप्नोति घोरं वाऽऽपदमुच्छति ।।**

महाभारतं तु पञ्चमः वेदः उच्यते। महाभारतविषये इयमुक्तिः सर्वप्रसिद्धा वर्तते। **यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्** । तत्र पाण्डवानां जन्मसमये ग्रहस्थितिः निरूपणावसरे महाभारते एवम् उल्लेखः प्राप्यते। तद्यथा[13] -

---

10. वाल्मीकिरामायणे
11. वाल्मीकिरामायणे- १/१८/०८-१०
12. वाल्मीकिरामायणे बालकाण्डे १८/८-१०
13. महाभारते-

तत्रादौ युधिष्ठिरस्य जन्मकालिकस्थितेः वर्णनम्-

**ऐन्द्रे चन्द्रसमायुक्ते मुहूर्तेऽभिजितेऽष्टमे।**
**दिवा मध्यगते सूर्ये तिथौ पूर्णेऽतिपूजिते।।**

एवमेव भीमस्य-

**मघे चन्द्रे समायुक्ते सिंहे चाभ्युदिते तथा।**
**दिवा मध्यगते सूर्ये तिथौ पुण्ये त्रयोदशे।।**

अर्जुनस्य-

**उत्तराभ्यां तु पूर्वाभ्यां फाल्गुनीभ्यां ततो दिवा।**
**जातस्तु फाल्गुने मासि तेनासौ फाल्गुनः स्मृतः।।**

अस्मिन्नेव ग्रन्थे महाभारतयुद्धात् पूर्वं महर्षिव्यासस्य धृतराष्ट्रं प्रति आकाशीयाशुभलक्षणं दृष्ट्वा नरसंहारस्यानिवार्यता सम्भाव्य ग्रहसंचारवर्णनं प्रतिपादितम्। तद्यथा[14] -

**श्वेतो ग्रहस्तथा चित्रां समतिक्रम्याधितिष्ठति।**
**अभावं हि विशेषेण कुरुणां तत्र पश्यति ।।**
**धूमकेतुर्महाघोरः पुण्यं चाक्रम्य तिष्ठति।**
**मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः।।**
**भगं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते।**
**शुक्रः पौष्टपदे पूर्वे सोमरुह्य विरोचते।**
**रोहिणी पीड्यत्येवमुभौ च शशिभास्करौ।**
**चित्रास्वात्यन्तरे चैव विष्ठितः पुरुषो ग्रहः ।।**
**वक्रानुवक्रं कृत्वा च श्रवणं पावकः पुनः।**
**ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः।**
**संवत्सर स्थायिनौ च ग्रहौ प्रज्वलितावुभौ।**
**विशाखायाः समीपस्थौ वृहस्पतिशनैश्चरौ।।**

अनेन प्रकारेण सम्पूर्णेऽपि संस्कृतवाङ्गमये ज्योतिषशास्त्रान्तर्गतस्य संहितास्कन्धस्य प्राधान्यं सर्वतो भावेन राराजमानाः दृश्यते।

14. महाभारते-

# श्रीपतिभटपरिचयस्तेषां कृतित्वञ्च

**आनन्दप्रकाशपाठकः**
लब्धस्वर्णपदकः,नेट,
अतिथिप्राध्यापकः(सहायकार्यश्रेणी)
ज्योतिशास्त्रविद्याशाखा
के.सं.वि.वि.लखनऊपरिसरः

आचार्य-श्रीपतेः स्थानं त्रिष्वपि स्कन्धेषु महन्महनीयं वर्तते। अस्य आचार्यस्य कालः ग्रन्थेऽस्मिन् कुत्रापि न प्राप्यते। तथापि जातककर्मपद्धति इति नाम्ना फलितग्रन्थे "कृतवान् श्रीपतिरग्रजाग्रणी"[1] इति उल्लेखो वर्तते। एवञ्च ज्योतिषरत्नमालामधिकृत्य ११८५ तमे शकाब्दे महादेवकृतटीकायां प्रथमे प्रकरणे अस्य परिचयः संक्षिप्तरूपेण प्राप्यते। तद्यथा-

"**कश्यपवंशपुण्डरीकखण्डमार्तण्डः केशवस्य पौत्रः नागदेवसूनुः श्रीपतिः संहितार्थमभिधातुमिच्छुराह**।" [2] इति पुनश्च अस्य ध्रुवमानसाख्ये ग्रन्थे "**भट्टकेशवपुत्रस्य नागदेवस्य नन्दनः। श्रीपती रोहिणीखण्डे ज्योतिश्शास्त्रमिदं व्यधात्**।।"[3] इत्युक्तिः प्राप्यते। अनेन ज्ञायते यत् श्रीपतिः कश्यपवंशीयः ब्राह्मणकुलोत्पन्नः रोहिणीखण्डवासीति आसीत्। तस्य पितुः नाम नागदेवाचार्यः तथा पितामहः केशवाचार्यः आसीत्। श्रीपतिः न केवलं संहिताशास्त्रस्य अपितु सिद्धान्त-जातकयोरपि मर्मज्ञः आसीत्। अस्य सिद्धान्तशेखराख्ये ग्रन्थे मध्यमाधिकारे "**श्रीमदार्यभट-जिष्णुनन्दन-श्रीत्रिविक्रमसुतादिसूरिभि**"[4] इत्यनेन आर्यभट्टस्य, जिष्णुनन्दन-ब्रह्मगुप्तस्य, त्रिविक्रमसुत-लल्लस्य च स्मरणं कृतो विद्यते। अनेन ज्ञायते यत् अयं श्रीपतिः एतेभ्यः आचार्येभ्यः परवर्तिः वर्तते। सिद्धान्तशिरोमणौ पाताधिकारे "**त्रिनवभवनजाता क्रान्ति**रित्यादिना शेखरोक्तलक्षणेन.."[5] इत्थं प्राप्यते। अनया मीमांसया भास्करः श्रीपतेः परवर्तीति सिद्ध्यति। अत्र ध्यातव्यं यत् लल्लस्य कालः ६७० शकाब्दः[6] एवञ्च भास्करस्य कालः १०३६ शकाब्दः वर्तते।[7] अतः श्रीपतेः कालः अनयोः मध्ये पततीति वक्तुं शक्यते।

1. जातककर्मपद्धतिः- ८/११
2. ज्योतिषरत्नमाला-महादेवकृतटीकायाम्
3. ध्रुवमानसाख्ये ग्रन्थे
4. सिद्धान्तशेखरस्य मध्यमाधिकरे श्लो. सं. ५८
5. सिद्धान्तशेखरस्य पाताधिकारस्य श्लो.सं. ३
6. गणकतरंगणिग्रन्थे
7. सिद्धान्तशिरोमणिः प्रश्नाध्याये श्लो. सं. ५८

**ग्रन्थकारस्य कृतीनां विचारः –**

त्रिस्कन्धविदा श्रीपतिना ज्योतिषशास्त्रस्य त्रिष्वपि प्रभागेषु ग्रन्थाः आकलिताः। तद्यथा-सिद्धान्तस्कन्धे 'सिद्धान्तशेखरः', 'धीकोटीदं करणम्' इति सिद्धान्तपक्षीयाः ग्रन्थाः, जातके 'जातकपद्धतिः', 'रमलपद्धतिश्च' तथा संहितायां 'ज्योतिषरत्नमाला' इति ग्रन्थानां रचना कृता। एतान् विहाय अन्येऽपि बहवः ग्रन्थाः अनेन रचिताः सन्ति। यथा-

रत्नसारः, श्रीपतिनिबन्धः, श्रीपतिसमुच्चयः, ध्रुवमानसं करणम्

गणिततिलकम्

दैवज्ञवल्लभः

अनेन आचार्येण सिद्धान्तग्रन्थेषु चत्वारः ग्रन्थाः रचिताः। अस्य सिद्धान्तशेखरनाम्ना ग्रन्थः सिद्धान्त-स्कन्धान्तर्गतेषु ग्रन्थेषु विशिष्टा कृति वर्तते। अस्मिन् विषये अस्य ग्रन्थस्य अन्ते स्वयमेव वदति ग्रन्थकारः श्रीपतिः[8]-

**पूर्वप्रणेतृकृत्तन्त्रसदुक्तियुक्तिमुक्ताफलैः क्रमनिवेशनभङ्गधीरः।**
**श्रीश्रीपतिर्गणकचक्रविभूषणाय सिद्धान्तशेखरममुं ग्रथयाञ्चकार।।**

एवं श्रीपतिः स्कन्धत्रयनिष्णातः आसीदिति अस्य ग्रन्थावलोकनेन अवबुध्यते।

**ग्रन्थकारद्वारा अधीतकृतीनां विचारः-**

आचार्यमहादेवेन स्पष्टीकृतं वर्तते यत् श्रीपतिना नानाविधग्रन्थानामवलोकनं कृत्वैव एते ग्रन्थाः रचिताः। तद्यथा ज्योतिषरत्नमालायाः महादेवकृतटीकायाम्-

**"गर्गवशिष्ठपाराशरादिसंहितां विलोक्य न केवलं गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च वाराहीसंहितारत्नकोशं च दृष्ट्वा। ननु यदि गर्गादिमुनिप्रणीतशास्त्रमवलोकितं तत् कथं वराहमिहिरादिथादरः सत्यं। मुनीनां बाहुल्यात्। बहुमत्पाद्यत्किल वराहमिहिरादिभिः बहुमतान्यवलोक्य स्वधिया क्रमोपनिबद्धाः तमपि विलोक्य।"**[9] इति।। विषयेऽस्मिन् श्रीपतिनापि उक्तम् -[10]

**विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम्।**
**दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्योतिषरत्नमाला।।**

इत्थं ज्ञायते यत् एतेषाम् आचार्याणां ग्रन्थानाम् अवलोकनं कृत्वैव अनेन आचार्येण स्वग्रन्थानां रचना कृता विद्यते। मुहूर्तसम्बन्धिताः बहवः ग्रन्थाः अस्माकं पूर्वाचार्यैः रचिताः सन्ति। अस्मिन् क्रमे वराहमिहिरकृत् बृहत्संहिता, लल्लाचार्यकृत् रत्नकोशः, पद्मनाभकृत् व्यवहारप्रदीपः, कालिदासप्रणीत-

8. सिद्धान्तशेखरस्य समाप्तौ
9. ज्योतिषरत्नमालायाः महादेवकृतटीकायाम्,
10. ज्योतिषरत्नमालायाः १/२

ज्योतिर्विदाभरणम्, केशवप्रणीत-मुहूर्ततत्त्वम्, नारायणकृत् मुहूर्तमार्तण्डः, श्रीरामदैवज्ञप्रणीत-मुहूर्त-चिन्तामणिः, रघुनाथदैवज्ञेन रचिता मुहूर्तमाला, नरपत्याख्येन दैवज्ञेन रचितः नरपतिजयचर्यास्वरोदयः एवञ्च श्रीपतिविरचिता ज्योतिषरत्नमाला प्रभृतयः ग्रन्थाः समुपलभ्यन्ते। एतेषां ग्रन्थानां स्वकीयं वैशिष्ट्यं वर्तत एव। एतेष्वेव ग्रन्थेषु श्रीपतिभटविरचिता ज्योतिषरत्नमाला ज्योतिर्विदां कृते कण्ठाभरणरूपा वर्तते।

अस्य ग्रन्थस्य वैशिष्ट्यं किमस्तीति मुहूर्तगणपतौ आचार्यः गणेशरावलः एवं प्रतिपादयति। तद्यथा -[11]

**ज्योतिर्विदाभरणभव्यवसन्तराजज्योतिर्निबन्धगणमण्डनरत्नमाला।**
**ग्रन्थान् मुहूर्तपदपूर्वकतत्त्वदीपमार्तण्डचिन्तितमणिप्रभुकल्पवृक्षात्।।**
**सम्यक् विचार्य कृतिनां विदुषां मतेन श्लोकैः प्रसिद्धसुगमार्थविदैः प्रणीतः।**
**ग्रन्थो मुहूर्तगणपत्यभिधो गुणज्ञैः प्रीत्या स्वचित्तसदने परिपूजनीयः ।।**

स्वपरवर्तिषु प्रायः समेषु मुहूर्तशास्त्रग्रन्थेषु यथा केशवाचार्य-रचित-मुहूर्ततत्त्वम्, नारायणदैवज्ञ-रचित-मुहूर्तमार्तण्डः, चक्रपाणिमिश्र-प्रणीत-मुहूर्तमाला, श्रीरामदैवज्ञविरचित-मुहूर्तचिन्तामणीत्यादि ग्रन्थेषु एतेषाम् आचार्याणां प्रभावः दृश्यते।

**ज्योतिषरत्नमालापरिचयः-**

ज्योतिषरत्नमाला श्रीपतेः अन्यतमा रचना रूपेण स्वीक्रियते। श्लोकदृष्ट्या ग्रन्थोऽयं बहुविस्तृतो नास्ति। विंशत्याध्यायोपेतेऽस्मिन् ग्रन्थे अनुष्टुप्-स्रग्धरा-मालिनी-हरिणी-इन्द्रवज्रा-उपेन्द्रवज्रा-उपजाति-मन्दाक्रान्ता-आर्यादीनां बहूनां वृत्तानां प्रयोगः कृतः विद्यते। ग्रन्थोऽयं प्राचीनाचार्याणां प्रणीतग्रन्थानां साररूपमस्तीति आचार्यैः स्वयमेव स्वीकृतम्।

पूर्वाचार्याणां साररूपं ग्रन्थोऽयं विविधमहत्त्वपूर्णविषयैः सज्जीकृतः विद्यते। तद्यथा -[12]

**संवत्सरादितिथिवारगुणास्ततश्च**
**योगाभिधप्रकरणङ्करणप्रशस्तम्।**
**भानां फलानि तदनु क्षणजा गुणाश्च**
**पश्चादुपग्रहफलं रविसंक्रमोऽत्र।।**
**सद्गोचरः शशिबलश्च विलग्नचिन्ता**
**संस्कारजाश्च विधयोऽग्निनृपाभिषेकः।**
**यात्राविवाहविधिरालयसन्निवेशो**
**वेश्मप्रवेशनववस्त्रसुरप्रतिष्ठा।।**

11. मुहूर्तगणपतौ - १/३
12. ज्योतिषरत्नमाला- ३०/१०-११

ग्रन्थस्यास्य मङ्गलाचरणे आचार्येण कालस्य वन्दना कृता विद्यते। तद्यथा-[13]

**प्रभवविरतिमध्यज्ञानवन्ध्या नितान्तं विदितपरमतत्त्वं यत्र ते योगिनोऽपि।**
**तमहमिहनिमित्तं विश्वजन्मात्ययानामनुमितमभिवन्दे भग्रहैः कालमीशम्।। १।।**

अस्मिन् वृत्ते आचार्यः कालरूपमीशं प्रणमति। किम्भूतं कालमीशम्? यः विश्वस्य प्रभव (उत्पत्ति)-मध्य-(स्थिति)-विरति(विनाश) कारकः वर्तते। अर्थात् यः जगतः उत्पत्ति-स्थिति-संहाररूपः वर्तते तं कालम् अहं वन्दे। पुनः किम्भूतं कालमीशम्? यत् तत्त्वमवगन्तुं विदितपरमतत्त्वा योगिनोऽपि नितान्तं ज्ञानवन्ध्या अर्थात् ज्ञानहीनाः सन्ति, तं कालमीशं परमेश्वरं वन्दे। पुनः किम्भूतं कालमीशं वन्दे? यः भग्रहैः अर्थात् नक्षत्रग्रहैः अनुमितम् अनुमेयं वर्तते। अपि च यः विश्वजन्मात्ययानां निमित्तरूपं वर्तते। अत्र विश्वजन्मात्ययानामिति पदेन जगतः जन्म-मरणयोः भावः(अर्थः) अवगन्तव्यः। तमुपर्युक्तं गुणविशिष्टं कालमीशमहं (श्रीपतिभटदैवज्ञः) इह ग्रन्थारम्भप्रसङ्गे निर्विघ्नपरिसमाप्त्यर्थम् अभिवन्दे।

अस्मिन् मङ्गलाचरणे कालस्य द्वैविध्यं प्रदर्शितं वर्तते। अत्र विश्वजन्मात्ययानामिति पदेन लोकानामन्तकृत्कालस्य तथा भग्रहैः अनुमितमिति पदेन कलनात्मकस्य कालस्यावबोधः जायते। भग्रहैः कथमनुमितमिति चेत् "अदृश्यरूपाः कालस्य मूर्तयो भगणाः स्मृताः" इति। अर्थात् सृष्ट्यारम्भादेव ग्रहगतिवशात् वर्ष-युग-कल्पादिव्यवस्था जाता। पुनः तेषां ग्रहनक्षत्राणां संहारे तमोमयस्य कल्पप्रमाणस्य ब्रह्मणः अहः (दिनम्) संपूर्णतां याति। "इत्थं युगसहस्रेण भूतसंहारकारकः कल्प" इति। अनेन प्रकारेण भग्रहैरेव कालस्यानुमानं जायते।

**जातककर्मपद्धतिपरिचयः-**

"वक्ष्ये जातककर्मपद्धतिमहम्"[14] इत्यनेन जातककर्मपद्धतेः आरम्भः क्रियते आचार्यैः। अस्यापर नाम श्रीपतिपद्धति वर्तते। अस्य ग्रन्थस्य विषये आचार्यः श्रीपतिः वदति [15]-

**अध्यायानामष्टके वृत्तसङ्ख्या सञ्जातास्यां षट्त्रिचन्द्रप्रमाणा ।**
**प्रोक्तानुष्टुप्छन्दसा ग्रन्थसङ्ख्या श्लोकैनैकेनाढ्या हि द्विशत्या।।**

अर्थात् ग्रन्थेऽस्मिन् अष्टौ अध्यायाः, षट्त्रिंशत्याधिकशत- (१३६) संख्यका श्लोकाः वर्तन्ते। ग्रन्थे प्रतिपादिताः श्लोकाः प्रायः अनुष्टुपछन्दसि वर्णिताः सन्ति। अस्य ग्रन्थस्य मङ्गलाचरणे वाग्देव्याः वन्दना कृता विद्यते। तद्यथा -[16]

**नत्वा तां श्रुतिदेवतां त्रिसमयज्ञानोद्गतेः कारणं**

13. ज्योतिषरत्नमाला- १/१
14. जातककर्मपद्धतिः १/१
15. जातककर्मपद्धतिः ८/१२
16. जातककर्मपद्धतिः १/१

**तत्पादाम्बुरुहप्रसादविकसद्बोधो बुधः श्रीपतिः।**
**शिष्यप्रार्थनया विचार्य सकलान् होरागमार्थान् मुहुः**
**वक्ष्ये जातककर्मपद्धतिमहं होराविदां प्रीतये ॥**

**सिद्धान्तशेखरपरिचयः-**

श्रीपतिना विरचितोऽयं ग्रन्थः सिद्धान्तस्कन्धे परिगण्यते। अयं ग्रन्थः पूर्वार्द्धमुत्तरार्धं चेति भागाभ्यां विंशत्यध्याये नवशतसमैः मनोरमैः श्लोकैः निबद्धः वर्तते। अस्य ग्रन्थस्य वैशिष्ट्य-प्रतिपादनावसरे स्वयमेव श्रीपतिनोक्तम् -[17]

**निजगुरुपदवृन्दं कृत्वा मनस्यतिभक्तितो**
**गणकतिलकः श्रीपूर्वोऽयं पतिर्द्विजपुङ्गवः।**
**स्फुटमविषमं मन्दप्रज्ञप्रबोधविवृद्धये**
**ललितवचनैः सिद्धान्तानां करोति हि शेखरम्।।**

अस्य ग्रन्थस्य किमपि व्याख्याविवरणादिकं सम्प्रति नोपलभ्यते। तथापि केवलं मक्किभट्ट कृता 'गणितभूषण' व्याख्या आदितः चतुर्थाध्यायस्य त्रिप्रश्नाध्यायसंज्ञकस्य पञ्चसप्ततिः श्लोकपर्यन्तमेव उपलब्धो वर्तते।

अनेन प्रकारेण उपर्युक्ततथ्यैः इत्थं वक्तुं शक्यते यत् अयम् आचार्यः श्रीपतिः स्वसमयस्य सम्पूर्णभारतवर्षस्याद्वितीयः पण्डितः आसीदिति शम्।

## शुक्रस्य बाल्यास्तवार्द्धक्यकथनम्-

प्राच्यामुदेति दिवसे खलु यत्र शुक्रस्तस्मात्परं त्रिदिनमस्य च बाल्यमुक्तम्।
अस्तङ्गतो भवति यत्र दिने प्रतीच्यां पूर्वं ततः शरदिनं खलु वार्द्धकं स्यात्।।
पूर्वास्तदिवसात् पूर्वं पक्षं क्षीणं भृगोः सुतः।
पश्चिमोदयतः पश्चात्पुष्टो दिग्भिर्दिनैर्भवेत्।।

## गुरोर्बाल्यास्तवार्द्धक्यकथनम्-

गुरोर्बाल्यञ्च वार्द्धक्यं बुधैः पक्षमुदाहृतम्।
उदयात् परतः पूर्वः भवेतामस्ततो हि ते।।
मकरन्दप्र.- पृ.सं. १२२।।

17. सिद्धान्तशेखरे १/२

# अक्षक्षेत्रविमर्शः

**विभामिश्रा**
सिद्धान्तज्योतिषाचार्यः
ज्योतिषशास्त्रविद्याशाखा
के.सं.वि.वि. लखनऊपरिसरः

ज्योतिषशब्दः "द्युतेरिसन्नादेशश्चजः" इयुणादि सूत्रेण द्युतिधातोः इसन् प्रत्यये दकारस्य जकारादेशे गुणे कृते ज्योतिः इत्थं निष्पद्यते। अत्र सूर्यादिनां ग्रहाणां, अश्विन्यादिनां नक्षत्राणां, धूमकेत्वादिज्योतिः पदार्थानां स्थितिः, गतिः, स्वरूपमित्यादि विषयाः यस्मिन् शास्त्रे निरुपयन्ते तच्छाशास्त्रं ज्योतिषनामधेयम्।

प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इति धिया ज्योतिषशास्त्रस्य किं प्रयोजनमिति जिज्ञासमाने सति किमपि विशिष्टं प्रयोजनं भवत्येव इति विचारधारायामवगाहते मनः। अभियुक्तानां मानसशङ्का निवारर्णार्थमुच्यते -[1]

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चितकरः।।**

एवञ्च -[2]

**तस्मात् द्विजैरर्ध्ययनीयमेतत् पुण्यं रहस्यं परमञ्च तत्त्वम्।**
**यो ज्योतिषां वेत्ति नरः स सम्यक धर्मार्थकामान् लभते यशश्च।।**

एवं प्रकारकस्य कल्पवृक्षसदृशस्य ज्योतिषशास्त्रस्य षडङ्गानि प्रतिपादितानि सन्ति। तद्यथा [3]-

**जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि।**
**अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे।।**

एतेषु षडङ्गेषु स्कन्धत्रयाः सिद्धान्त-संहिता-होराख्याः प्रामुख्यं भजन्ति। तद्यथा प्रश्नमार्गे -[4]

**गोलो गणितञ्चेति द्वितयं खलु गणितसंहिते स्कन्धे।**
**होरासंहितयोरपि निमित्तमन्यत्र यच्च होराख्ये ।।**

अर्थात् गणितगोलयोः अन्तरभावः सिद्धान्तस्कन्धे, जातकप्रश्नमुहूर्तानामन्तरभावः होरा स्कन्धे एवञ्च अन्तिमाङ्गत्वेन संहितास्कन्धः गण्यते। ज्योतिषशास्त्रस्यास्य त्रिषु स्कन्धेषु सिद्धान्तस्कन्धः कश्चन् वैशिष्ट्यं धारयति। वस्तुतस्तु सिद्धान्तस्कन्धे मूलरूपेण ग्रह-नक्षत्रसम्बन्धितविषयाणां साधनोपायाः

1. सि.शि.गणित.का.श्लो.११
2. सि.शि.गणित.का.श्लो.१२
3. प्रश्नमार्ग.१.४
4. प्रश्नमार्ग.१.५

वर्णिताः भवन्ति। एतेषां समेषां ग्रह-नक्षत्रादिनामाश्रभूतेन गोलं तिष्ठति। यथोक्तं भास्कराचार्येण सिद्धान्तशिरोमाणौ गोलाध्याये "ते गोलाश्रयिण" [5] इति। पुनश्च तत्रैव-[6]

**दृष्टान्त एवावनिभग्रहाणां संस्थानमानप्रतिपादनार्थम् ।**
**गोलः स्मृतः क्षेत्रविशेष एष प्राज्ञैरतः स्याद्गणितेन गम्यः ।।**

गोले अष्टौ अक्षक्षेत्राणि प्रसिद्धानि सन्ति। एभिः अक्षक्षेत्रैः गोलेऽन्तर्हितानां नैकानां विषयाणां ज्ञानं सरलतया जायते। अत्र सर्वादौ किं नाम अक्षक्षेत्रमिति जिज्ञासा मनसि समुदेति। समुत्पन्नस्यास्य जिज्ञासायाः समाधानार्थमुच्यते- अक्षांशवशात् उत्पन्नानि क्षेत्राणि अक्षक्षेत्राणि भवन्ति। अर्थात् एतादृशं क्षेत्रं यत्र एकः भुजः अक्षांशसमः, अपरः लम्बांशसमः, तृतीयः त्रिज्यासमः भवति। एतत् क्षेत्रं अक्षक्षेत्राख्यं भवति। निरक्षे अक्षांशाभावात् अस्य क्षेत्रस्य उत्पत्तिः न भवति। अतः एतत् क्षेत्रं साक्षदेशे एव उत्पद्यते। पुनः अत्र किं नाम अक्षांशः? तदुच्यते- निरक्षदेशाद् यथा यथा उत्तरतो गच्छति तथा तथोदग्ध्रुवमुन्नतं पश्यति तथा यैर्भागैर्ध्रुवः उन्नतस्तैरेव भागैरक्षसंज्ञैः । एवञ्च गोलपरिभाषायाम् -[7]

**याम्योत्तरे तथाक्षांशाः समस्थानध्रुवान्तरे।**
**खस्वस्तिकान्निरक्षीयखमध्यं यावदंशकाः।।**

अर्थात् खस्वस्तिक-निरक्षखस्वस्तिकयोः वा स्वस्थानध्रुवस्थानयोः अन्तरम् अक्षांशः। सरलशब्देन इत्थमपि वक्तुं शक्यते यत् क्षितिजात् ध्रुवोन्नतिः अक्षांशः भवति। अक्षांशवशेन निर्मितं क्षेत्रम् अक्षक्षेत्रमिति तु पूर्वमेव प्रतिपादितम्। एवं विधस्य अक्षक्षेत्रस्य चर्चा सर्वप्रथमं सर्वाङ्गिन सारल्येन च भास्कराचार्येण सिद्धान्तशिरोमाणौ कृता विद्यते। तद्यथा -[8]

**भुजोऽक्षभा कोटिरिनाङ्गुलोना कर्णोक्षकर्णः खलु मूलमेतत्।**
**क्षेत्राणि यान्यक्षभवानि तेषां विद्येव मानार्थयशः सुखानाम्।।**

अर्थात् अक्षभा[9] भुजः। अक्षभा इत्यनेन पलभा ज्ञेयः। निरक्षखस्वस्तिके स्थिते रवौ या द्वादशाङ्गुलशङ्कोः छाया सा पलभा, सा एव अस्मिन् अक्षक्षेत्रे भुजसंज्ञकः। पुनश्च द्वादशाङ्गुलशङ्कुः कोटिः एवं पलकर्णः (शङ्क्वग्रबिन्दोः छायाग्रबिन्दुं यावत्) कर्ण इति अवयवत्रयघटितत्रिभुजमेव मूलाक्षक्षेत्रम्। एवञ्च अस्य क्षेत्रस्य विषयज्ञानं विद्या इव मानार्थयशस्करं भवति। अस्मिन् विषये आचार्यभास्करैः अष्टौ अक्षक्षेत्राणि प्रदिपादितानि सन्ति। तद्यथा[10] -

**लम्बज्यका कोटिरथाक्षजीवा भुजोऽत्र कर्णस्त्रिभुजे त्रिभज्या।**
**कुज्या भुजः कोटिरपक्रमज्या कर्णोऽग्रका च त्रिभुजं तथेदम्।।**

5. सि.शि.गोल.गोलप्रशंसा.श्लो.६
6. सि.शि.गणित.त्रिप्रश्न.श्लो.१३ भाष्ये
7. श्रीसीतारामशर्मणा कृत् गोलपरिभाषा.श्लो.७६
8. सि.शि.गणित.त्रिप्रश्न.श्लो.१३
9. एवं विषुवती छाया स्वदेशे या दिनार्धजा। दक्षिणोत्तररेखायां सातत्र पलभा स्मृता।। सू. सि.त्रि.श्लो. १२
10. सि.शि.गणित.त्रिप्रश्न.श्लो.१४-१७

**तथैव कोटिः समवृत्तशङ्कुरग्रा भुजस्तद्धृतिरत्र कर्णः।**
**भुजोऽपमज्या समना च कर्णः कुज्योनिता तद्धृतिरत्र कोटिः।।**
**अग्रादिखण्डं कथिता च कोटिरुद्धृत्तना दोः श्रवणोऽपमज्या।**
**उद्धृत्तना कोटिरथाग्रकाग्रखण्डं भुजस्तच्छ्रवणः क्षितिज्या।।**
**खण्डं यदूर्ध्वं समवृत्तशङ्कोर्यत् तद्धृतेस्तावथ कोटिकर्णौ।**
**अग्रादिखण्डं भुज एवमष्टौ क्षेत्राण्यमून्यक्षभवानि तावत् ।।**

एते भास्करोक्तान्यष्टक्षेत्राणि अधः प्रस्तूयते-

| क्रम.सं. | **भुजः** | **कोटिः** | **कर्णः** |
|---|---|---|---|
| 1. | पलभा | द्वादशाङ्गुलशङ्कुः | पलकर्णः |
| 2. | अक्षज्या | लम्बज्या | त्रिज्या |
| 3. | कुज्या | क्रान्तिज्या | अग्रा |
| 4. | अग्रा | समशङ्कुः | तद्धृतिः |
| 5. | क्रान्तिज्या | कुज्योनतधृतिः | समशङ्कुः |
| 6. | उन्मण्डलशङ्कुः | अग्रादिखण्डम् | क्रान्तिज्या |
| 7. | अग्राग्रखण्डम् | उन्मण्डलशङ्कुः | कुज्या |
| 8. | अग्रादिखण्डम् | समशङ्कूर्ध्वखण्डम् | तद्धृत्यूर्ध्वखण्डम् |

एतेषां अष्टौ अक्षक्षेत्राणां स्वरूपं स्पष्टीकरणार्थं अधः प्रस्तूयते। तद्यथा-



प्रसङ्गेऽस्मिन् आचार्यकमलाकरोक्तमतमपि उपस्थाप्यते। तेषां मते निरक्षखस्वस्तिके स्थिते रवौ नतांशाः अक्षांशसमाः तज्ज्याऽक्षज्याभुजः। स्वखमध्यात् निरक्षखमध्यः अधो स्थितः वर्तते किञ्च तयोरन्तरं अक्षांशसमः भवति। पुनश्च स्वखमध्यात् ग्रहं यावत् नतांशाः भवन्ति। अतः सूर्यः यदा निरक्षखमध्ये स्थितः भवति तदा नतांशाः अक्षांशसमाः सिद्ध्यन्ति। अस्य अक्षांशस्य ज्या[11] अक्षज्या भुजः। एवमेव निरक्षखमध्यात् समस्थानं यावत् लम्बांशाः भवन्ति। किञ्च ग्रहात् क्षितिजं यावत् उन्नतांशाः भवन्ति। अतः लम्बांशाः उन्नतांशसमाः कोटिः। गोलकेन्द्रात् निरक्षखमध्यं यावत् त्रिज्या कर्ण इति। लम्बज्या, अक्षज्या, त्रिज्येति अवयवजनितक्षेत्रमेव कमलाकरेण अक्षक्षेत्रमूलं सिद्ध्यति।

यतः सर्वाण्येतानि सजातीयानि क्षेत्राणि सन्ति। अत एव एकस्य भुजकोटिकर्णज्ञानात् तदितरस्य समेषां क्षेत्राणामपि ज्ञानं सारल्येन सम्पद्यते। अस्याक्षक्षेत्रस्य माहात्म्यं सम्पूर्णेऽपि गोले तु अस्त्येव तथापि त्रिप्रश्नाधिकारोक्तदिग्देशकालज्ञाने विशेषेण विद्यते। दिक्-निर्धाणे देशनिर्धारणे च छायासहितानामति-महत्त्वपूर्णविषयाणां सिद्धिः अनेन अक्षक्षेत्रेण सम्भाव्यते।

ॐ प्राणश्च मेऽपानश्च व्यानश्च मेऽसुश्च मे चित्तञ्च मऽआधीतञ्च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोतञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम्।

11. चापैकप्रान्तकेन्द्रस्थसूत्रे या लम्बरेखिका। चापान्यप्रान्ततोऽर्धज्या सैव ज्या कथ्यते बुधैः ।। गो.प.श्लो.१३४

# लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः

(सत्रम्-२०२२-२३)




उत्तरप्रदेशस्य राजधान्यां लखनऊ (लक्ष्मणपुरी)नामके नगरे अवस्थितोऽयं राष्ट्रिय-संस्कृत- संस्थानस्य लखनऊ-परिसरः स्वस्थापनादिवसात् (२ अगस्त १९८६ दिनाङ्कात्) भारतीयां संस्कृतिमभिरक्षयन् संस्कृत प्रचार- प्रसारादिषु क्षेत्रेषु महदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़ परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रे सरो वर्तते ।



अस्मिन् परिसरे १९९५ तमस्य ख्रिस्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभाग-स्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर १९९५ तः मई २०११ यावत् आसीत्। एतेषामागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवश्छात्राः ज्योतिषाचार्योपाधिं विद्यावारिध्युपाधिञ्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार प्रसारादिकर्मणि शास्त्राध्यापनादिकर्मणि च संलग्नाः विद्यन्ते । इमे श्रीकामेश्वरसिंहदरभङ्गाविश्वविद्यालयस्य कुलपतिपदे दिनांक 29 अप्रैल 2017 तः 30 मई 2020 शनिवासरं यावत् सेवां विधाय अद्यत्वे केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊ-परिसरस्य निदेशकपदस्य शोभामभिवर्धयन्ति। एतेषां निदेशकत्वे लखनऊ-परिसरस्य शोभा अनुदिनं शुक्लपक्षस्य चन्द्र इव वर्धमाना विद्यते।

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन-अध्यापन-निमित्तमाधुनिकयन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयन्त्रम् (२०१६-१७)सत्रे ज्योतिषविभागेन सम्प्राप्तम्। अनेन यन्त्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भवन्ति।

**सत्रेऽस्मिन् विभागीयाचार्याणां नामानि -**

अस्मिन् सत्रे लखनऊपरिसरे ज्योतिषविभागे अष्टौ अध्यापकाः आसन्। तेषु विभागस्य पत्रिकायाः अस्याः सम्पादकस्य प्रो.मदनमोहनपाठकस्य स्थानान्तरं निदेशकत्वेन हिमाचलस्थे केन्द्रीयसंस्कृत-विश्वविद्यालयस्य वेदव्यासपरिसरे संजातम्। तेषां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-

| नाम | पदम् | | परिसरेऽस्मिन् कार्यभारग्रहणतिथिः- |
|---|---|---|---|
| १. **प्रो. सर्वनारायणझाः** | परिसर-निदेशकः | | २८ दिस. २०२० |
| २. **प्रो. मदनमोहनपाठकः** | आचार्योऽध्यक्षश्च | | ०६ जून २०११ तः ८ जून २०२२ या. |
| ३. **डॉ. हरिनारायणधरद्विवेदी** | सहायकाचार्यः | | २० अप्रैल २०२२ |
| ४. **डॉ. उमेशकुमारपाण्डेयः** | सहायकाचार्यः | (संविदा) | २१ जून २०११ तः |
| ५. **डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः** | सहायकाचार्या | ,, | ०१ अगस्त २०१२ तः |
| ६. **डॉ. अनिरुद्धनारायणशुक्लः** | सहायकाचार्यः | ,, | १५ मार्च २०२२ तः |
| ७. **डॉ. अश्विनीकुमारपाण्डेयः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |
| ८. **श्रीआनन्दप्रकाशपाठकः** | सहायकाचार्यः | (अ.प्रा.) | २४ फरवरी २०२१ तः |

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियते। यस्य प्रमाणस्वरूपं अत्रत्याश्छात्राः समग्रेऽपि भारते फलित-सिद्धान्तविभागद्वयोरपि परीक्षायां सर्वाधिकानङ्कानवाप्नुवन्ति।

अत्र परिसरे छात्राणां विकासाय बहुविधाः कार्यक्रमाः सञ्चाल्यन्ते। येन कार्यक्रमेण परिसरीयाः छात्राः एव नहि अपितु बहिस्थाः जना अपि लाभान्विताः भवन्ति। तेषां कार्यक्रमाणां विशदवर्णनं अग्रे विधाप्यते।

### भास्कराचार्यपरिषद्-

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति । अनेनापि छात्राः लाभान्विताः भवन्ति।

### ज्योतिषपरिचयपाठ्यक्रमस्य वृत्तम्-

सर्वसामान्याः जनाः अपि ज्योतिषशास्त्रं जानीयुस्तदर्थं त्रैमासिकज्योतिषपरिचयपाठ्य-क्रमस्य आयोजनं प्रतिसत्रं प्रचलति। सत्रेऽस्मिन् करोना-महामारी-कारणात् ज्योतिष-परिचय-पाठ्यक्रमस्य आयोजनम् अवरुद्धं जातम्।

कार्यक्रमेऽस्मिन् अध्येतृवर्गेषु सामान्याः नागरिकाः, बैंककर्मिणः, सुरक्षाकर्मिणः, चिकित्सकाः, अभियन्तारः, विभिन्न-विभागीयाधिकारिणः, विविधव्यवसायिनः, नेतृगणाः, पौरोहित्यकर्मरताः, मिडिया-बान्धवाः अन्ये सामाजिकाश्च अध्येतृरूपेण समुपस्थिताः भवन्ति। अस्य **पञ्चदशचक्रस्य** आयोजनं २०२१-२२ सत्रे भवितव्यम् आसीत्। परन्तु विभिन्नव्यस्तताकारणात् सत्रेऽस्मिन्नपि अस्य कक्षा नैव प्रचलिता। अस्तु, अयं त्रैमासिकज्योतिषपरिचयपाठ्यः पूर्वनिर्धारितकालानुसारेणैव प्रतिसप्ताहं दिनत्रयं दिनचतुष्टयं वा सायं 5 वादनात् 6 वादनं यावत् प्रचलति। अनेन कार्यक्रमेण बहवः छात्राः अध्येतारश्च लाभान्विताः भवन्ति।

# कलिमाहात्म्यम्

सन्तः क्वापि न सन्ति सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति सन्ति यदि वा मात्सर्ययुक्ताश्च ते ।
राजानोऽपि न सन्ति सन्ति यदि वा लोभाद्धनग्राहिणो
दातारोऽपि न सन्ति सन्ति यदि वा सेवानुकूलाः कलौ ।।
धर्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरे गतं
पृथ्वीमन्दफला नराः कपटिनः चित्तञ्च शाठ्योर्जितम्।।
राजानोऽर्थपराः न रक्षणपराः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ।।

## संस्कृत - गीतिका

**प्रो.रामकुमारशर्मा**
आचार्योऽध्यक्षश्च, साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुर-परिसरः

त्यज संसारं गतसमसारम्
स्मारं स्मारं भवतरणम्
स्वान्त ! कलय राधारमणम् ।।१।।
यस्य बोधलवकणिकासुरया निन्दसि सर्वान्मत्तः ।
यस्य सेवने जीवनकालः सकलो भवता दत्तः ।।
प्राप्ते मरणे कृतसमहरणे
त्राता नहि तद् व्याकरणम्
स्वान्त ! कलय राधारमणम् ।।२।।
कालिदासकवितानिःष्यन्दा भवता रसा निपीताः ।
मम्मटपण्डितराजविचारा आजीवनञ्च गीताः ।।
काले क्रुद्धे कण्ठे रुद्धे
साहित्यं नहि हितकरणम्
स्वान्त ! कलय राधारमणम् ।।३।।
ग्रहगणनालीनेन न भवता कदापि कालो गणितः ।
सोऽद्य शिरसि जरया स्वभगिन्या नृत्यति कामं कुपितः ।।
क्षीणा शक्तिर्लीना भक्तिः
ज्योतिषविद्या नहि शरणम्
स्वान्त ! कलय राधारमणम् ।।४।।
धर्मशास्त्रमधिकृत्य सर्वदा विहितः स्वप्नविचारः ।
किन्तु न विदितः कदापि भवता स्वप्नोऽयं संसारः ।।
नहि चित्तं शुद्धं नहि तद् बुद्धम्
धर्मशास्त्रमपि नोद्धरणम्
स्वान्त ! कलय राधारमणम् ।।५।।
विधिमीमांसामांसलमतिना नात्मा भवता ज्ञातः ।
मधुपुष्पितवाणीकुविचारे यातः सायं प्रातः ।।
विगतसहायः स्थूलः कायः
मीमांसा नहि गतिकारणम्
स्वान्त! कलय राधारमणम् ।।६।।

## भास्करोदयपत्रिकायाः सप्तम-अङ्कस्य लोकार्पणम् :-



सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकःडॉ.मदनमोहनपाठकश्च

दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

## भास्करोदयपत्रिकायाः त्रयोदश-अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च

दिनाङ्कः - २२ नवम्बर २०१६ शनिवासरः, लखनऊ

## भास्करोदयपत्रिकायाः चतुर्दश-अङ्कस्य लोकार्पणम् :-



भास्करोदयपत्रिकायाः चतुर्दश-अंकस्यं लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रभारिप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. ब्रजेशपाठकमहोदयाः, परिसरस्य वरिष्टाचाष्टाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।

दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ

गोवं ास्य परिरक्षणं कुरु। राष्टस्य परिवर्धनं कुरु।।



भास्करोदयनामिकायाः ज्योतिष-शोधपत्रिकायाः विगताङ्काः-



ISSN No.:2278-0815